5

प्राचीनकामरूपपरिचयः

डॉ० अशोक चटर्जी शास्त्री

एम०ए०, डी० फील०, पी-एच० डी०, डी०लिट्०, साहित्य-नव्यधर्मशास्त्र-
ऋग्वेद-पुराण-प्राचीनधर्मशास्त्रतीर्थ, महोपाध्याय, वाचस्पति
अध्यक्ष, संस्कृत विभाग, कलकत्ता विश्वविद्यालय
तथा यु० जी० सी० राष्ट्रीय अध्यापक

परिमल पब्लिकेशन्स

दिल्ली

प्रकाशकः :

परिमल पब्लिकेशन्स
२७/२८, शक्तिनगर,
दिल्ली-११०००७.

मूल्यम् : १०० रूप्यकाणि

प्रथम संस्करण : १९९१.

मुद्रक :

आर० आर० प्रिंटर्स
X-३ए, ग०नं० २, ब्रह्मपुरी,
दिल्ली-११००५३.

DEDICATED

TO MY GRANDSON

RAHUL

(nee NILBHAI, SAHEBJAN)

With Affectionate Love.

भूमिका

अखिलं भारतमण्डलं सुप्राचीनकालादेव कामरूपस्य प्राचीनमहिम्ना देदीप्यमानम् आसीत्। नरकभगदत्त इत्यादिभ्य आरभ्य भास्करवर्मपर्यन्तं ये प्रथितयशसः राजानः सिंहासनमारूढ़ाः कामरूपमलंकृतवन्तस्ते केचन पौराणिकप्रसिद्धाः के वा इतिहासविदां मते सुस्थिरा आसन्।

अस्य कामरूपस्य प्राचीनेतिहासपर्यालोचनकाले विभिन्नसमयेषु उपलब्धानां नृपैः प्रदत्तानां शिलालेखानां प्राथमिकतया दृष्टिपातः करणीयः। एवं प्राथमिकता अवश्यमेव स्वीकरणीया। तथा च महाभारतरामायणमहापुराणोपपुराणौपपुराणानि अपि आलोचनीयानि। इमान्यपि कामरूपेतिहासपर्यालोचने आकररूपाणि, स्थानीयलौकिकसाहित्येषु मुद्रासु लौकिकनाटिकाकलासु अपि ऐतिहासिकतत्त्वं निहितं वर्त्तते, अतः सर्वमिदं हृदि निधाय सुप्रयत्नेन महताध्यवसायेन परिश्रमेण च शिलालेखादीनां विश्लेषणं रामायणमहाभारतपुराणादीनां पर्यालोचनं तथा लौकिककलानाटिकामुद्रासाहित्यस्य समीक्षणं कृत्वेव प्रस्तुतोऽयं ग्रन्थो विद्वत्समाजे समुपस्थितो वर्त्तते।

विंशतिवर्षाणि यावत् विश्वविद्यालये कामरूपशासनलेखं पाठयन् अध्ययन् च अहमिदमनुभवामि यत् यद्यपि कामरूपस्य प्राचीनेतिहासोद्घाटनाय स्थाने स्थाने काले काले प्रान्तीयभाषाभिस्तथा आङ्गलभाषाभिश्च विख्याता ग्रन्था उपलभ्यमानास्तथापि अद्यत्वे संस्कृतभाषया नैकोऽपि तादृशो ग्रन्थोऽस्माकं दृष्टिपथं समायाति। अतो ग्रन्थोऽयमस्मिन् विषये प्राथम्यपदवीमगाहते।

अत्र कामरूपस्य राजनीतिकेतिहासो, धर्मजीवनं, ध्यानधारणाधर्मरीतिः, धर्म्यं कर्म, समाजजीवनं, विशेषतः स्त्रीणां स्थानं, तासां भूषणादीनि, वर्णाश्रमव्यवस्थापनम्, अर्थनीतिचिन्तनम्, बहिर्भ्रमणमन्तर्गमनं चेत्यादीनि विषयविभागक्रमेण सन्निवेशितानि वर्तन्ते।

कामरूपसम्बन्धिशिलालेखादयो विभिन्नपत्रपत्रिकादिषु विशेषतः एपिग्राफिया इण्डिका, कर्पास इन्स्क्रिप्सनाम् इण्डिकेराम्, कर्पास इन्स्क्रिप्सनां ल्याटिनेराम्, जर्नल एसियाटिक, कामरूपशासनावली, इण्डियन् हिस्टरिकल

सोसाईटि, आसाम रिसर्च सोसाईटि इत्यादिषु विक्षिप्ता वर्त्तन्ते, तेषां सर्वेषां सामाग्रिकमालोचनमपि अत्र कृतम् ।

विषयेऽस्मिन् पण्डितप्रकाण्डाः कणकलालवडुया-वाणीकण्ठकाकति-पद्मनाभभट्टाचार्य-विरिञ्चिकुमारवडुया पि० सि० चौधुरी-आर० डि० चौधुरी महाभागाः प्राग्रेसरास्तथा मार्गप्रदर्शकाः। गेट-डाउनि इत्यादयः पाश्चात्त्याः विपश्चिता अपि प्रातःस्मरणीयाः। एतेषां सर्वाणि पुस्तकानि अधीतानि आलोचितानि च। श्रीमद्भ्यः विश्वरञ्जनशास्त्रिभ्यः मुकुन्दमाधवशर्मभ्यः तथा नरेन्द्रनाथशर्मभ्यः अपि अस्माभिः अस्मिन् अवसरे धन्यवादाः प्रदीयन्ते। ते असाधारणपरिश्रमेण कामरूपैतिह्यं प्रति सर्वेषां दृष्टि आकृष्टवन्तः ।

मम धर्मपत्नी "गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ" श्रीमती झर्णा चट्टोपाध्यायः सर्वदा मम सारस्वताराधनासु दत्तदृष्टिः। अतस्तस्यै कृतज्ञतां आविस्करोमि ।

मम प्राणप्रिया पौत्री कुलाङ्कुरभूता तोया चट्टोपाध्याय एव मम मनःसु सर्वत्र विराजते। सा मम जीवनालम्बनभूता। तस्यै लक्षलक्षान् आशीर्वादान् समर्पयामि।

परिमलपब्लिकेशन्ससंस्थानमस्माकं साधुवादार्हम्। तस्य प्राणपुरुषेभ्यः श्री के० एल० जोशीमहाशयेभ्यः सप्रश्रयमभिनन्दनं प्रयच्छामि ।

अन्ते च भगवतीं कामरूपां महादेवीं कामाख्यां भूयोभूयः प्रणमामि ।

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

इति ।

श्री अशोकचटर्जी शास्त्री
अध्यक्षः, संस्कृतविभागः
कलिकाताविश्वविद्यालयस्य
तथा
संस्कृतराष्ट्रीयाध्यापकः

श्रीफलहारिणीकालिकापूजामहोत्सव
११.६.१९९१

विषयसूची

		पृ० सं०
भूमिका	...	(उ)-(ऊ)
प्रथमपरिच्छेदः		
राजनीतिकेतिहासः	...	१-५४
द्वितीयपरिच्छेदः		
वैष्णवधर्मः	...	५५-६८
शैवधर्मः	...	६८-८५
शाक्तधर्मः	...	८६-१०२
बौद्धधर्मः	...	१०२-१०७
तृतीयपरिच्छेदः		
आर्थिकीदशा	...	१०८-११३
भूमिव्यवस्था	...	११३-११७
करव्यवस्था	...	११७-१२५
खाद्यान्नव्यवस्था	...	१२५-१३३
औद्योगिकस्थितिः	...	१३३-१३७
चतुर्थपरिच्छेदः		
नारीणां स्थितिः	...	१३८-१४५
खाद्यविशेषव्यवस्था	...	१४५-१४६
मनोरञ्जनम्	...	१४६-१४८
परिवहनसाधनानि	...	१४८
परिवारव्यवस्था	...	१४९
विवाहः	...	१४९-१५१
जातिव्यवस्था	...	१५१-१५३
वर्णेषु ब्राह्मणः	...	१५३-१६१
अन्यजातयः	...	१६१-१६५

प्राचीनकामरूपपरिचयः

प्रथमपरिच्छेदः

राजनीतिकेतिहासः

अत्र नास्ति कोऽपि सन्देहः, यत् कामरूपराज्यमेव प्राचीनतमम्। पुरा जम्बुद्वीपस्य चत्वारो विभागा आसन्। तेष्वेव भागेष्वन्तर्गतमस्ति कामरूपराज्यम्। यद्यपि कामरूपराज्यं प्राचीनतमं विद्यते तथापि पुराकाले अस्य राज्यस्य नाम कामरूपमिति नासीदपि तु प्रागज्योतिष्राज्यनाम्नास्योल्लेखः समुपलभ्यते। रामायणेऽपि प्राग्ज्योतिषः राज्यस्योल्लेखः संप्राप्यते—

योजनानि चतुः षष्टिर्वराहो नाम पर्वतः।
सुवर्णभृङ्गः सुश्रीमानगाधे वरुणालये॥

तत्र प्राग्ज्योतिषं नाम जातरूपमयं पुरम्।
यस्मिन् वसति दुष्टात्मा नरको नाम दानवः॥

तत्र सानुषु चित्रेषु विशालासु गुहासु च।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥[1]

आसामप्रान्ते प्राप्ते एकस्मिन् हस्तलिखिते ग्रन्थेऽपि अस्य राज्यस्य प्राग्ज्योतिरिति चाप्यभिधानं संलिखितमस्ति[2]। रामायणे प्रथमकाण्डस्य द्विंत्रिशतमेऽध्याये सप्तमश्लोके प्राग्ज्योतिषोऽथवा कामरूपस्य स्थाने धर्मारण्यमिति नाम दरीदृश्यते।

असूर्तरजसो राम धर्मारण्यं महीपतिः।
चक्रे पुरवरं राजा वसुश्चक्रे गिरिव्रजम्[3] **॥**

इतिहासविदामस्ति विदितचरम्, यत् पुराकाले प्राग्ज्योतिषराज्ये दानवराजः

---

१. वाल्मीकिरामायण, किष्किन्धाकाण्ड, ४२.३०-३२.

२. अध्यात्मरामायण, आदिकण्ड, ३६.

३. वा० रा०, आदिकाण्ड, ३२.७.

नरकः राज्यमकरोत्। अस्य पौनःपुन्येनोल्लेखः ऐतिहासिकग्रन्थेषु दरीदृश्यते। रामायणस्य किष्किन्धाकाण्डे द्विचत्वारिंशत्सर्गेऽपि प्राग्ज्योतिषः राज्यस्य दानवराजस्य नरकस्य च वर्णनं कविना कृतं विद्यते। अत्र सीतायाः अन्वेषणाय नियोजितान् कपिपुंगवान् वानरराजः सुग्रीवः भौगोलिकं ज्ञानं ददत् अवदत् यत् प्राग्ज्योतिःपुरं तत्स्थानात् प्रचीच्यां दिशि सुस्थितं वर्तते। वानरराजसुग्रीवप्रदत्तभौगोलिकस्थितिपरिशीलनेन ब्रह्मदेशः (वर्मा) एव प्राग्ज्योतिःराज्यमासीदिति सम्भावना सञ्जायते, किन्तु अत्रास्ति विद्वद्भिर्विचार्यं यत् ते प्रेष्यमाणाः वानराः किष्किन्धातः प्रतीच्यां दिशि प्रस्थितेषु सत्सु किं ते प्राग्ज्योतिषं देशं गन्तुं समर्थाः भूयासुः। अनेनैतद् ज्ञायते यत् तत्र सुग्रीवः दिशां ज्ञानविषये भ्रान्तः आसीत्। अत्र सुग्रीवेनैतद् वक्तव्यमासीत् यत् ये वानराः प्राच्यां दिशि सन्ति गन्तारः ते प्राग्ज्योतिषं पुरं गच्छेयुः, ततः किष्किन्धा प्रतीच्यां दिशि स्थिता वर्तते। अन्यथा रामायणस्य साक्ष्यानुरोधेन वयं वक्तुं शक्नुयाम यत् किष्किन्धातः पश्चिमभागः प्राग्ज्योतिःपुरमिति नाम्ना ख्यातमासीत्। अस्यैव भागस्य शासकः नृपतिः दानवराजः नरकः आसीत्। ऐतिहासिकदृष्ट्या अत्र परिशीलनेन ज्ञायते यदत्र पूर्ववक्तव्येऽस्ति भ्रान्तिः, यतः देशस्य पूर्वीयप्रान्ते स्थितस्य कामरूपराज्यस्यैव प्राचीननाम प्राग्ज्योतिरित्यासीत्। महाभारते सभापर्वणि अर्जुनेन क्रियमाणस्य दिग्विजयस्य वर्तते वर्णनम्,[1] तत्र यदार्जुनः पूर्वस्यां दिशि स्थितैः राजभिः सार्धं युयुत्सुः सन् अगच्छत्, तस्मिन् समये प्राग्ज्योतिषः राज्ञा भगदत्तेन सहार्जुनस्य घोरतमं संगरमभवत्। अनेनैतिहासिकसंग्रामप्रसङ्गेन ज्ञायते यत् प्राग्ज्योतिषः राज्यस्य स्थितिरिन्द्रप्रस्थादस्ति पूर्वस्यां दिश्येव। अत एव एवं कल्प्यते यदर्जुनः उत्तरस्यामाशायामगच्छत् कुलिन्ददेशस्य साकलद्वीपपर्यन्तं गत्वा प्राग्ज्योतिषः उत्तरपश्चिमसीमानमस्पृशत्, अनेनैवमप्यनुमीयते यच्चीनदेशस्य किञ्चिदंशोऽपि प्राग्ज्योतिर्राज्ये सम्मिलितः आसीत्। महाभारतस्य सभापर्वणि षड्विंशत्यध्यायस्य नवमश्लोकानुसारेणैवमपि ज्ञायते यत् राज्ञः भगदत्तस्य सेनायां बहवः चीनदेशीयाः सैनिका आसन्[2]। अनेन वर्णनेनैतदनुमानं द्रढीभवति यच्चीनदेशस्य एकोंऽशः प्राग्ज्योतिषिराज्ये संकलित आसीत्, अन्यथा चीनदेशीय सैन्यस्य कथं स्यात् सम्भवः? अश्वमेधपर्वणि अपि एवमेवोल्लेखः समुपलभ्यते

---

१. महाभारत, सभापर्व, ३०.२६-२७.

२. तत्रैव, २६.९.

यत् पाण्डवानां अश्वमेधीयः अश्वः जालन्धरदेशमतिक्रम्य प्राग्ज्योतिःराज्यं प्राविशत्[1]।

कविकुलचूडामणेः महाकवेः कालिदासस्य रघुवंशकाव्यस्य चतुर्थसर्गे रघुणा कृतस्य दिग्विजयस्यास्ति वर्णनम्, तत्र रघुः उत्तरस्यां दिशि गत्वा हिमाचलप्रदेशीयान् देशान् जित्वा अनन्तरं प्राग्ज्योतिःराज्यं प्रविश्याजयत्। महाभारतस्य सभापर्वण्येव एकस्मिन् स्थाने लौहित्यजनपदस्य नामागम्यते, यदा तु ब्रह्मपुत्रनदस्य नामान्तरमेव लौहित्येति। "लौहित्यमगमद् बली" अस्यार्थः लौहित्यनदसामीप्यात् लोहित्यदेशोऽपि सम्भाव्यते। एवं निश्चीयते यत् लौहित्यदेशः प्राग्ज्योतिषः देशस्य पश्चिमदक्षिणसीमासंलग्नभूभाग एवासीत्।

महाभारतस्योद्योगपर्वणि द्रोणपर्वणि च नरकस्योल्लेखो वर्तते। महाभारते वर्णितः नरकः भौमः—भूमिपुत्रः इति प्रत्यपाद्यत, किन्तु नरकः वराहपुत्रः आसीत्, अत्र महाभारतं मौनमेव तिष्ठति, परन्तु आश्रमवासिपर्वणि न्यगद्यत भगदत्तस्य पितामहः तपस्तप्त्वा, तस्य प्रभावेण महेन्द्रलोकं प्राप्नोति स्म।[2] किन्तु भगदत्तोऽयं सम्भवतः प्राग्ज्योतिषः राज्यस्य राजा नासीत्, अपितु अयमन्य एव भगदत्तः आसीत्। तत्रैव वनपर्वणः द्विचत्वारिंशदुत्तरशततमे (१४२) अध्यायेऽन्यः एकः नरकः विवर्णितः वर्तते, तस्य विषये प्रतिपादितमेवं वर्तते यत् सः दितेः पुत्रः आसीत्, सः इन्द्रपदलभार्थं तपस्तपन् आसीत्, भगवता विष्णुना मायया सः अहन्यत। महाभारतस्य नीलकण्ठयां टीकायां अस्मिन् विषये विवर्णितम्, यत् नरकोऽयं भौमः भूमिपुत्रः आसीत्। किन्तु इदं समीचीनं न प्रतिभाति यतः एक एव व्यक्तिः युगपत् कथं दितेः भूमेश्च सन्ततिः भवितुं शक्यते।

हरिवंशे विष्णुपुराणे चापि प्राग्ज्योतिषःपुरस्य नरकस्य च वर्णनं मिलति। किन्तु तत्र नरकस्य वर्णनं नास्ति। ब्रह्माण्डपुराणेऽपि भारतवर्षीय-प्राच्यदेशानां वर्णने प्राग्ज्योतिषःराज्यस्यापि तत्रोल्लेखः अस्ति, किन्त्वत्रापि कामरूपदेशस्य नाम न प्राप्यते। कालिकापुराणे द्वयोः प्राग्ज्योतिष्कामरूपयोः वर्णनमुपलभ्यते तथा चोभयोः विवेचनमपि कृत विद्यते[3]—

अस्य मध्ये स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज ह।
ततः प्राग्ज्योतिषा येयं पुरी शक्रपुरीसमा॥

---

१. महाभारत, आश्वमेधिकपर्व, ७४-७५.

२. तत्रैव, आश्रमवासिकपर्व, २०.१०.

३. कालिकापुराण ३८.११९, ५१.६७.

शम्भुनेत्राग्निनिर्दग्धः कामः शम्भोरनुग्रहात् ।
तत्र रूपं यतः प्राप कामरूपं ततोऽभवत् ॥

कविकुलगुरुणा महाकविना कालिदासेन रघुवंशमहाकाव्ये[1] प्राग्ज्योतिः राज्यं कामरूपं चोभयं कथितम् । कालिकापुराणे नरकस्योत्पत्तेः, तेन प्राग्ज्योतिषः कामरूपराज्यस्य वा सम्प्राप्तिः, भगवता श्रीकृष्णेन नरकस्य संहारः इत्यादिविषयाः वर्णिताः[2] । कामरूपराज्यस्य समेषां शासकानां शासने यद् वर्णितं तत्र नरकः संयोजित एव वरीवर्तते । अतः एतद्विषये कालिकापुराणस्य-साक्ष्यम् समुपस्थापयितुं प्रतिभाति समीचीनम् ।

सत्ययुगे भगवता वाराहरूपेणावतीर्य प्रलयसागरे निमग्नां पृथ्वीमुज्जिहीर्षया रजस्वलायां पृथिव्यां गर्भाधानमकरोत्, अस्मिन्नवसरे देवैः भगवतः अस्य कार्यस्य विरोधः कृतः यतः एवं स्थितौ स्थितायां, अशुद्धायां पृथिव्यां गर्भस्याधानात् या सन्ततिः सन्जायते सासुरस्वभावादासुरी भविष्यति, एवमासीद्धारणा देवानाम् । वसुन्धरा वासुदेवस्य शरणमभजत, तेन तस्याः गर्भयातनायाः शान्तिरभवत् । तदैवाकाशवाण्यप्यभवत् यत् त्रेतायुगे रावणवधस्यानन्तरं तस्यै सन्ततेरवाप्तिर्भविष्यति तथा च पुत्रजन्मानन्तरं यदा पृथ्वी भगवन्तं स्मरिष्यति तदा स आगत्य तस्याः जीवनयात्रायाः व्यवस्थां करिष्यति ।

त्रेतायुगे आसीदेकः सुप्रसिद्धः नृपतिः, तस्य जनक इति नाम आसीत् । स विदेहदेश शशास । तस्य कापि सन्ततिर्नासीत् । स राजा पुत्रकाम्यया पुत्रकामेष्टिनामकं यज्ञमकरोत्, तेन स यज्ञभूमौ द्वौ पुत्रौ एकां कन्यां च लेभे । यज्ञभूमेः कर्षणसमये भूमिगह्वरात् तेन सा कन्या अलभ्यत । अतएव तस्याः कन्याया नाम सीतेति अभवत् । पृथ्वी जनकं बभाषे यदेषा कन्या एव रावणवधस्य कारणं भविष्यति । तुभ्यमेकः पुत्रोऽपि मया दास्यते, तस्य त्वया रक्षणं कर्त्तव्यम् । किंचित् समयानन्तरं पृथ्वी यज्ञभूमौ पुत्रमेकं प्रसूय, रात्रौ जनकाय सूचनां दत्वा तिरोहितः । स राजा तत्र गत्वा तं वालमपश्यत्, गृहमानीय स्वपत्न्यै चाददात्, तस्य सम्यक् संस्कारादिकमकारयत्. राजपुरोहितेन तस्य नामकरणं "नरक" इति चक्रे । स्वयं पृथिवीमागत्य धात्रीवेषा तस्य

---

१. रघुवंश, ४.८१, ८३.
२. तत्रैव, ३६-४०.

वालस्य पालनं करोति स्म। सा एकस्मिन् दिवसे जनकादनुमतिं गृहीत्वा तं गंगातटे आनयत् तत्र तस्य जन्मवृत्तान्तं तस्मै चाकथयत्। स बालः स्वपितुः दर्शनाय औत्सुक्यमदर्शयत्, तदा सा नारायणं अस्मरत् तदैव तत्र भगवान् नारायणः समुपस्थितो भूत्वा तस्यै तस्मै च दर्शनमयच्छत् एवं ताभ्यां साकमेव गंगायां निमग्नोऽभवत्। एवं क्षणमात्रमेव स नारायणः ताभ्यां सह कामरूप-मध्यस्थितकामाक्षाधिष्ठितप्राग्ज्योतिःपुरं समुपस्थितोऽभवत्। तस्मिन् समये तस्मिन् देशे किरातानां वास आसीत्।

प्राग्ज्योतिषः पुरस्याधिपतिः घटकः नारायणं नरकं पृथ्वीं च दृष्ट्वा, एतैः सार्धमायोधनार्थं युद्धक्षेत्रं समवतरत्। नारायणस्यादेशं लब्ध्वा नरकः किरातान् विजित्य, घटकस्य शिरः कण्ठादच्छिनत्। एवं सः किरातान् दिक्करवासिनीं यावत् व्यताडयत्। ततो नारायणः नरकाय प्राग्ज्योतिषः राज्यं दत्त्वा करतोयानाम्नीं कल्लोलिनीं यावत् ब्राह्मणक्षत्रियवैश्यद्विजातीनां भगवत्याः कामाक्षादेव्याः आवासभूमेः मध्ये आवासभूमिं परिकल्प्य, विदर्भ-राजस्य कन्यायाः मायायाः पुत्रेण नरकेण सहोद्वाहं कारयित्वा, प्राग्ज्योतिषां राजसिंहासने मायया सह नरकमभ्यर्पिचत्। सर्वं कार्यजातं सम्पाद्य "द्वापरे तव पुत्रलाभो भविष्यति, एतन्मध्ये त्वया देवतानां ब्राह्मणानां च विरोधो नैव कर्त्तव्यः, तथा च त्वया जगन्मातुः भगवत्याः कामाक्षायाः एवोपासना कर्त्तव्या, एतस्य मम आदेशस्यावहेलनायां तव प्राणनाशो भविष्यति" एवं आदिश्यो-पदिश्य भगवान् नारायणोऽन्तर्दधे। नरकोऽपि नारायणनिर्देशानुसारं कांश्चित् दिवसान् यावत् द्वितीयः इन्द्रः इव राज्यं कुर्वन् शुशुभे। द्वापरयुगस्यान्तिमे चरणे वलिपुत्रो वाणः शोणितपुरस्य सम्राडभूत्। तेन सह नरकस्य सुमधुरः सम्बन्धः आसीत्। हिन्दीभाषायामस्ति एका उक्तिः "देखा देखी पाप और देखा देखी पुण्य" वाणः सुराणां द्रोही आसीत्, सुरैः सह तस्य आचरणं दृष्ट्वा सोऽपि देवानां ब्राह्मणानां च द्रोही अभवत्। एकदा ऋषिः वशिष्ठः महादेव्याः कामा-क्षायाः दर्शनार्थं प्राग्ज्योतिषिराज्ये अगमत्, तत्र नरकः तमत्रासयत्, तेन स ऋषिः रुष्टोऽभवत् अशपच्च नरकम्—"नररूपधारी नारायणः अतिशीघ्रं तव विनाशं करिष्यति तदैव राज्यतः कामाक्षा देवी अपि अन्तर्हिता भविष्यति।"

योगिनीतन्त्रेऽपि संक्षेपात् विवरणमिदं लभ्यते। वशिष्ठशापात् कामाक्षादेवी तत् स्थानमत्यजत्। तत्रैव शापस्यास्य विषयेऽस्ति यद् यदा सा कामाक्षा तद्विषये भगवन्तं शंकरं सर्वं न्यवेदयत् तदा स देवो महादेवस्तस्य

शापस्योद्धारं अकथयत्[1]। शापप्रभावात् सा देवी यदान्तर्दधे तदा तस्मिन् राज्ये बहूनि अमंगलान्यभवन्। अमंगलानामाधिक्यात् नरकः चिन्तितोऽभवत् तथा च वाणं स्वचिन्तायाः विषयं अकथयत्, वाणः तं उपादिशत्—ब्रह्माणं आराध्य वरं प्राप्नुहि तेन शापस्य निराकरणं भविष्यति। नरकेण तथैवाचरितम्, शतवर्षाणि तपस्तप्त्वा वरान् लेभे, परन्तु ऋषेः शापवशात् सोऽसुरः कमपि वरं नायाचत। वाणपरामर्शानुसारं नरकः असुरान् सेनाध्यक्षान् विधाय, इन्द्रेण युद्ध्वा, तमजयत्, देवमातुः अदितेः कुण्डलम्, वरुणस्य छत्रं चाहरत्।

नररूपेणावतीर्णः नारायणः श्रीकृष्णः इदानीं द्वारकायां वसन् आसीत्। तत्रेन्द्रो गत्वा नरकस्य सर्वमेव दुष्कृतं न्यवेदयत् प्रतिकारस्य याचनां चाकरोत्। देवराजस्येन्द्रस्य प्रार्थनया वशीभूतः भगवान् श्रीकृष्णः शीघ्रमेव गरुडमारुह्य नरकस्य राज्ये अगच्छत्, तत्र च तेन सह घोरं युद्धं कृत्वा चक्रेण तस्य शिरः अकृन्तत्। नरकस्य सन्ततेः पालनार्थं कृष्णः प्रार्थ्यते। भगवान् श्रीकृष्णः प्राग्ज्योतिषराज्ये तस्य पुत्रं भगदत्तं अभ्यषिचत्। एवं देवानां सर्वं कार्यं विधाय नारायणः श्रीकृष्णः प्रचुरं धनं, निधीन् रत्नानि अदितेः कुण्डलं वरुणस्य छत्रम् आदाय द्वारकां न्यवर्तत।

नरकस्य विषये हरिवंशे, विष्णुपुराणे, श्रीमद्भागवतपुराणे च संक्षेपात् वर्णनं अस्ति। परन्तु तेषु नरकः देशस्य जनकस्य सन्ततिरिति नोपलभ्यते, उपलभ्यते च तेन अदितेः वरुणस्य च कुण्डलछत्राहरणम्[2]। महाकविवाणभट्टकृते हर्षचरिते अस्ति वर्णितं यत् भास्करवर्मा नरकहृतं वरुणछत्रं स्वदूतद्वारा हर्षवर्धनाय उपहारस्वरूपमयच्छत्[3]। कालिकापुराणस्यानुसारम्—

अदितेः कुण्डलयुगं ब्रह्मणा निर्मितं स्वकम्।
ददौ स्वकर्णादाकृष्य पुत्र्यै मेधातिथेस्तदा ॥[4]

वर्णनेनानेन ज्ञायते यद् अदितिः मेधातिथेः कन्यायाः अरुन्धत्या

---

१. योगिनीतंत्र, पूर्वार्द्ध, द्वादशपटल, ३९-४०.

२. हरिवंश, ६३-६४ ; विष्णुपुराण, ५.२९ ; श्रीमद्भागवतपुराण, १०.५९.

३. हर्षचरित, सप्तम उच्छ्वास।

४. का०पु०, २३.१२६.

विवाहावसरे स्वकीयकुण्डले अरुन्धत्यै अयच्छत्। अत्र पृच्छा जायते यत् नरकेण कथं कुण्डले अह्रियताम् ? सम्भाव्यते यत् देवमात्रा पुनः कृते कुण्डले, ते एव तेन अपाह्रियेताम्। एवमेव वरुणच्छत्रस्य विषयेऽपि विचारः समुद्भवति यत् वरुणात् नरकेण हृतं छत्रम्, तच्च तस्मात् श्रीकृष्णेन गृहीतम्। पुनश्च भास्करवर्मणा कुतः प्राप्तं यत् कान्यकुब्जेश्वराय हर्षवर्धनाय उपहारीकृतम् ? अत्रैवं सम्भाव्यते यत् श्रीकृष्णस्य गोलोकप्रस्थानानन्तरं द्वारिकापुर्याः पतनानन्तरं च वज्रदत्तेन तस्योत्तराधिकारिणा वा येन केन प्रकारेण तच्छत्रं लब्धम्, तदैव भास्करवर्मणा कान्यकुब्जेश्वराय हर्षवर्धनायोपहारीकृतम्। हर्षचरिते यादृशं वारुणस्य छत्रस्य वर्णनं समुपलभ्यते तत् पुराणेषु वर्णितस्य वारुणस्य छत्रस्य वर्णनाद् भिन्न, अस्य किं कारणम् ? अनुमीयते यद् अत्र कृष्णस्य प्रभावः एवं कारणमिति।

राजतरंगिण्याः द्वितीये तरंगे नरकेण वरुणाद् गृहीतस्य छत्रस्य विशेष उल्लेखो वर्तते। कश्मीरराजः मेघवाहनः प्राग्ज्योतिषोऽधिपतेः कन्यायाः छायायाः स्वयंवरेऽगच्छत्।

तत्र तं वारुणं छत्रं छायया राजसन्निधौ।
भेजे वरस्रजा राजकन्यका चामृतप्रभा॥
तेन तस्य निमित्तेन वृद्धिमागामिनीं जनाः।
अजानन्नम्बुवाहस्य पाश्चात्त्येन च वायुना॥
राजा हि नरकेणैतद् वरुणादुष्णवारणम्।
आनीतमकरोच्छायां न विना चक्रवर्त्तिनम्[1]॥

अनेनावगम्यते यत् तच्छत्रस्य प्रभावेणैव नरकः स्वकन्याममृतप्रभां मेघवाहनाय प्रायच्छत्, स लब्धवान् च। हर्षचरितस्य सप्तमे उच्छ्वासे भास्करवर्मणः दूतैः अस्य विषये वहुवारं उल्लेखः कृतः। राजतरंगिण्याः तृतीये तरंगे कश्मीरराजः मेघवाहनः दिग्विजयार्थं प्रस्थानमकरोत् एवं अन्यद्वीपस्योपरि आक्रमणार्थं समुद्रतटीयवनप्रान्तस्य भूमिमगच्छत्। तत्र वरुणः मायया मेघवाहनात् स्वछत्रमहरत्। अस्य छत्रस्य वैशिष्ट्यमिदमासीत् यदिदं स्वदिव्यप्रभावेण स्वयमेव गतिशीलमभवद्[2]।

---

१. कल्हणकृतराजतरंगिणी, द्वितीयतरंग, १४८-१५०.

२. तत्रैव, तृतीयतरंग, २७-७०.

स्टाइन्‌महोदयैः आंगलभाषायां राजतरंगिण्याः अनुवादः कृतः। स्टाइन्‌महोदयानां विचारतः मेघवाहनस्य राज्यकालाः ३०८८ लौकिकाब्दाः अर्थात् १२९० ख्रिष्टीयाब्दाः सन्ति। अनया गणनया ज्ञायते यत् कश्मीर-राजः मेघवाहनः भास्करवर्मणः हर्षवर्धनाच्च पूर्ववर्ती आसीत्। यदि गणना एषा सुसंगतिः अभविष्यत् तदा एव हर्षचरिते लिखितस्य कथायाः सुसंगतिः अभविष्यत्। अतः गणनैषा न विचारसहा। किं वरुणेन दयया कस्मै छत्रं प्रादीयत, इदं सन्देहास्पदं प्रतिभाति। भास्करवर्मणः दूतेन हर्षस्य निकटे वारुणस्य छत्रस्य वर्णनं अभवत् इत्यपि प्रमाणं नोपलभ्यते, नो लभ्यते च श्रीकृष्णेनास्योद्धारकार्यम्। इदमपि नोपलभ्यते यत् वरुणेन मायया मेघ-वाहनात् छत्रं हृतम्। अतः इदं वक्तुं शक्यते यत् दैवीयुद्धे इदम् शुम्भस्यावासे आसीत्।

"छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति।"[1] वराहरूपधारी भगवान् यस्य पिता, भूतधात्री धरित्री माता, त्रेताद्वापरयुगं यावद् यस्य राज्यम्, स्वर्गो मर्त्यः च यस्य नाम्ना अकम्पत तस्य नरकस्य यशः अथ यावत् असुरनाम्ना सह दोहरीस्थले संरक्षितमस्ति। गौहाटीतः नातिदूरं नरकासुर-स्यैकः पर्वतः विद्यते। सम्भवतः अस्योपर्येवास्यावासः आसीत्। कामाक्ष्यधि-ष्ठानान्नातिदूरं पर्वतस्योपरि नरकासुरस्यापरः प्रस्तरमण्डलः पन्था विद्यते। अस्य मार्गस्य निर्माणविषयेऽस्ति एका किंवदन्ती, किंवदन्तीय गुणाभिराम-बरुआमहोदयस्य संकलिते ग्रन्थे आसामस्येतिहासेऽपि वर्तते। अनया किंवदन्त्या नरकस्यासुरीप्रवृत्तेरपि परिचयः समुपलभ्यते। नरकेणासुरेण कामाक्षादेव्याः पुरतः विवाहस्य प्रस्तावः कृतः, देव्यापि सापेक्षपणः पुरः समुपस्थापितः (condition) यत् "यदि त्वं रात्रौ एव-प्रभातवेलायाः पूर्वमेव अत्र एकस्य मन्दिरस्य मार्गस्य निर्माणं कर्त्तुं शक्नोसि तदैवाहं त्वया सार्धं पाणिग्रहणं कर्त्तुं शक्ता इति मे पणः"। देव्याः एवं सम्भाषणं श्रुत्वा स नरकः झटित्येव विष्णोः शरणमगमत्, तत्र सः मध्यरात्रौ सर्वकार्यसम्पादनाय तमादिशत्। कार्यं सम्पूर्णम्-एवासीत् अस्मिन्नेवावसरे महामायाया. भगवत्याः मायया प्रातःकालसूचकः कुक्कुटादीनां शब्दः श्रुतिपथमगच्छत्। अतः सोऽसुरः तत्कार्यसम्पादनं कर्त्तुमप्रभुरभवत्, तत्रासीच्च पणः (condition) यत् यदि मध्यरात्रौ एव उक्तं कार्यं अभविष्यत् तदैव मम त्वया सह विवाहोऽपि

---

१. चण्डी, ५.९७.

अभविष्यत् । अतः विवाहः नाभवत् । यस्मिन् स्थाने जगदम्बायाः कामाक्षा-देव्याः आयतनं मन्दिरं वास्ति तत् स्थानमतीव संकीर्णमस्ति, अस्ति च ख्यातिः, यद् मन्दिरस्यास्य निर्माणं विश्वकर्मणा कामदेवेन च कृतम् ।

अन्ते विष्णुलोकं गते नरके, तस्यात्मज्योतिः पुत्रः भगदत्तः प्राग्ज्यो-तिषःराज्यस्य नृपतिरभवत् । महाभारतस्य सभोद्योगभीष्मद्रोणपर्वसु अस्य विवरणं वर्तते । नरकपुत्रः भगदत्तः आयोधनकौशले आसीत् पटुवरः । दिग्विजयिना अर्जुनेन साकं भगदत्तः दिनानि अष्टौ यावद् आयोधनमयुध्यत, अन्ते च उभयोर्मध्ये सन्धिर्जाता । तस्य पित्रा नरकेण देवराजेनेन्द्रेण समं युद्धमयुध्यत । परन्तु भगदत्तः आत्मानं इन्द्रसखा इति घोषयति । इन्द्रसखा भगदत्तः स्नेहवात्सल्यभावाप्लुतवचसा कौन्तेयमर्जुनं सम्बोधयति—

अहं सखा महेन्द्रस्य शक्रादनवरो रणे ।
न शक्ष्यामि च ते तात स्थातुं प्रमुखतो युधि ।

त्वमीप्सितं पाण्डवेय ब्रूहि किं करवाणि ते ।
यद् वक्ष्यसि महाबाहो तत् करिष्यामि पुत्रक ।।

अस्य वात्सल्यस्य अन्यदपि कारणमेकमासीद् यद् अस्य दुहिता भानुमती दुर्योधनस्य पाणिगृहीती भार्या आसीत् । प्राग्ज्योतिषःपुरस्य वास्तविकं प्रतिनिधिरूपं नगरं "गौहाटी" नगरं विद्यते, अस्मिन् नगरे एकः प्राचीनतमः अस्ति सरोवरः, अस्य विषये अस्ति एका किंवदन्ती यदस्य निर्माणं भानुमत्याः विवाहावसरेऽभवत्[1] । दुर्योधनः भगदत्तविषयकं परिचयं स्वपित्रे धृतराष्ट्राय ददत् वदति—

प्राग्ज्योतिषाधिपः शूरो म्लेच्छानामधिपो बली ।
यवनैः सहितो राजा भगदत्तो महारथः ।।

अस्मिन् परिचये वैवाहिकवृत्तस्योल्लेखो नास्ति । परन्तु कामरूपप्रचलित-मर्यादानुसारं राजाभगदत्तः दुर्योधनस्य श्यालकोऽस्ति[2] । भारतीयैतिहासिकमहा-ग्रन्थे महाभारते एतत्तु सम्यक् समुपलभ्यते यद् अष्टादशदिवसीय-महाभारतीय-

---

१. महाभारत, सभापर्व, ५१.१४.

२. श्री गुणाभिरामबरुआ, आसामेर इतिहास, अध्याय ३.

महायुद्धे भगदत्तः दुर्योधनपक्षीयः सन् अर्जुनेन सह द्वादशदिवसानि यावत् संगरमकरोत्, तथा चान्ते अर्जुनेन परास्तश्चाभवत्। यदा स प्राग्ज्योतिषाधिपतिः भगदत्तः जराग्रस्तो जातः तदा तस्य मस्तकस्य चर्मणा तस्य दृष्टिरावृताभवत्, तदा सः दृष्ट्युन्मीलनाय वस्त्रपट्टिकया तच्चर्म संयमन्नासीत्—

बली संछन्ननयनः　　शूरः परमदुर्जयः।
अक्ष्णोरुन्मीलनार्थाय बद्धपट्टो ह्यसौ नृपः[1] ॥

भगदत्तः मरणदिवसे स्वसैनिकैरनुगम्यमानः परमेण कौशलेन युध्यमानोऽर्जुनेन सह अमोघेन वैष्णवेन इषुणा अर्जुनं प्राहरत्, भगवान् श्रीकृष्णोऽर्जुनं संरक्षयन् तां वैष्णवीं शक्तिं स्ववक्षस्येव जग्राह। ततश्च कौन्तेयोऽपि भगवतः श्रीकृष्णस्य निर्देशानुसारं तस्य लौहकंचुकानि वस्त्राणि खण्डं खण्डं कृत्वा तुमुले तं न्यपातयत्। भगवान् श्रियः पतिः श्रीकृष्णः भगदत्तवधाय कौन्तेयमर्जुनं प्रोत्साहितं कुर्वन् निरदिशत्—

विमुक्तपरमास्त्रेण जहि पार्थमहासुरम्।
वैरिणं युधि दुर्धर्षं भगदत्तं सुरद्विषम्[2] ॥

भगवता श्रीकृष्णेन भगदत्ताय असुरसंज्ञा प्रदत्ता। परन्तु भगदत्तः स्वं 'इन्द्रस्य सखा' इति गौरवेणालंचकार। निधनपुरप्राप्तेन भास्करवर्मणः अभिलेखेन, विशेषतश्च पंचमश्लोकेन भगदत्तस्येन्द्रसखापदवी समुपलभ्यते[3]। महाभारतेऽपि भगदत्तः इन्द्रसखोपाधिनाऽलंकृतो दरीदृश्यते—

निहत्य तं नरपतिमिन्द्रविक्रमं सखायमिन्द्रस्य तदैन्द्रिराहवे।
ततोऽपरांस्तव जयकांक्षिणो नरान् बभञ्ज वायुर्बलवान् द्रुमानिव[4] ॥

अस्यामवस्थायां भगवतः श्रीकृष्णस्य युक्तिः कथं सम्भाव्यते ? अत्र भगवतः श्रीकृष्णस्य युक्तिरेवं सम्भाव्यते यत् स तदानीं दिव्यदृष्टयातीतस्य तुलनां कुर्वन् पश्यन् आसीत्। तदैव श्रीकृष्णः भगदत्तस्य वैष्णवास्त्रं स्ववक्षसि अग्रहीत्, एवं तस्यास्त्रस्य प्राप्तिः कथं भगदत्ताय जाता, अस्याः विषये पूर्वमेव

---

१. महाभारत, द्रोणपर्व, २८.४५.
२. तत्रैव, २८.३७-३८.
३. निधनपुरताम्रशासन, श्लोकः ५.
४. म०भा०, दोणपर्व, २८/अन्तिमश्लोकः।

प्रतिपादितम्, पूर्वस्मिन् जन्मनि भगदत्तोऽसुर आसीत्, अत्र कोऽपि सन्देहो नास्ति। महाभारते सभापर्वणि दृश्यते—

वाष्कलो नाम यत्तेषामासीदसुरसत्तमः।
भगदत्त इति ख्यातः स जज्ञे पुरुषर्षभः॥[1]

भगदत्तस्यात्मजस्य वज्रदत्तस्य महाभारतस्याश्वमेधपर्वणि वर्णनं कृतमस्ति[2]। महाभारतीयाष्टादशदिवसीययुद्धसमये सम्भवतः वज्रदत्तः बालक एवासीत् अत एव सः तस्मिन् सम्मिलितो नाभवत्।

हतो वृद्धो मम पिता शिशुं मामद्य योधय॥[3]

पितृहन्त्रार्जुनेन समं वज्रदत्तः आत्रिदिवसमयुध्यत। अन्ते वज्रदत्तस्य सारथिः आहतो भूत्वा युद्धभूमौ अपतत्, तेन वज्रदत्तोऽपि भूमौ अपतत्। तदा अर्जुनः तेन सह युद्धाद् विरतो भूत्वा सन्धिमकरोत्। वज्रदत्तपराक्रमविषयिणी वार्ता निधनपुरप्राप्ते भास्करवर्मणः अभिलेखे प्राप्यते—"शतमस्त्रमखण्डवलगतिरतोषयद् यः सदा संख्ये[4]"। इन्द्रपालस्याभिलेखेऽपि वज्रदत्तविषये चोट्टंकितं विद्यते—

दोर्वज्रवीर्य्यपरितोषितपाणिः[5]।

वज्रदत्तः युद्धेन सुरपतिमिन्द्रं कदा कुत्र चाऽतोषयदत्र विषये पुराणेष्वितिहासेषु च तूष्णीभाव एवोपलभ्यते, तथापि ४०० वर्षपश्चात् प्रचारिताभिलेखे अपि यदुल्लेखोऽस्ति स नात्यन्तमेव भ्रमात्मक इति। आलोच्यमानेषु समेषु ताम्रशासनेषु नरकभगदत्तयोः कथाः उल्लिखिताः वर्तन्ते। एवमेव धर्मपालस्य ताम्रपत्रादतिरिक्तसमेषु ताम्रपत्रेषु चोक्ता कथा समुपलभ्यते। भास्करवर्मणः इन्द्रपालस्य च पत्रेषु वज्रदत्तः भगदत्तस्य पुत्रः इति प्रतिपादितं वरीवर्तते। परन्तु वनमालस्य, वलवर्मणः, रत्नपालस्य च शासनेषु वज्रदत्तः भगदत्तस्य भ्रातेति दर्शयितुं विद्यते—

---

१. महाभारत, आदिपर्व, ६७.९.
२. तत्रैव, अश्वमेधपर्व ७५-७६.
३. तत्रैव, ७६.४.
४. निधनपुरलेखस्य अष्टमश्लोकः।
५. इन्द्रपालस्याभिलेखे।

कृष्णेन तं (नरकं) निहत्य च सृष्टौ भगदत्तवज्रदत्ताख्यौ।
तस्य नरकस्य सुतौ तद्वनिताकरुणविलापहतहृदयेन[1] ॥

वनमालशासनस्य चतुर्दशश्लोकेन ज्ञायते यत् नरकं हत्वा तस्य द्वौ पुत्रौ भगदत्तवज्रदत्तौ प्राग्ज्योतिषः अधिपतिः अधिकारी च सृष्टौ। वनमालताम्रपत्रं शासनस्य विषययोजकेन, लेखकेन लिपिकारेण च कुतः सम्वादमेतत् प्राप्तमिति नास्ति स्पष्टम्। एतत् स्पष्टं प्रतीयते यत् स महाभारतस्य विरोधी विद्यते। कालिकापुराणेऽपि नरकपुत्रगणेषु भगदत्तस्य गणनास्ति परन्तु तत्र वज्रदत्तस्योल्लेखो नैव मिलति—

ऋतुमत्यां तु जायायां काले स नरकः क्रमात्।
भगदत्तं महाशीर्षं मदवन्तं सुमालिनम् ॥
चतुरो जनयामास पुत्रानेतान् क्षितेः सुतः[2]।

पूर्ववर्तिषु वनमालवलवर्मरत्नपाललेखेषु कमाधारमधिकृत्य वज्रदत्तः नरकस्य पुत्रत्वेन भगदत्तस्य भ्रातृत्वेन प्रदर्शितो वरीवर्तते। परन्तु विषयोऽयं कल्पनायाः दूरमेव वर्तते। भास्करवर्मणः ताम्रशासनस्य रचनाकालस्य, रत्नपालपौत्रस्य इन्द्रपालस्य ताम्रशासनस्य लेखकस्यानुसारं वज्रदत्तः भगदत्तस्य पुत्रः आसीत्। महाभारतीया कथापि तत्रोल्लिखिता वर्तते।

कविकुलप्रदीपस्य वाणभट्टस्य हर्षचरिते विषयोऽयमधिकजटिलता समापन्नो वर्तते। भास्करवर्मणः दूतः कान्यकुब्जेश्वरस्य सभायामागत्य तं निवेदयति—'महात्मनस्तस्य (नरकस्य) अन्वये भगदत्तपुष्पदत्तवज्रदत्तप्रभृतिषु व्यतीतेषु वहुषु मेरूपमेषु महत्सु महीपालेषु'। भगदत्तवज्रदत्तयोः मध्येऽयं कः पुष्पदत्तः समुपस्थितः। पुष्पदत्तो वज्रदत्तस्य पुत्रो भवितुं शक्यते, परन्तु वज्रदत्तादादौ पुष्पदत्तस्योपस्थितिश्चिन्त्या। अत एव विषयोऽयमितिहासविदां विदुषां कृते समस्यात्मकशोधस्य च विषयः[3]। महाभारतादिषु ग्रन्थेषु

१. वनमाललेखस्य १४म श्लोकः।

२. कालिकापुराण, ४०.१-२.

३ भास्करवर्मणोऽभिलेखेषु पुष्यवर्मणो नाम पूर्वपुरुषस्तु विद्यते। परम्परासु पुष्यपुष्पशब्दयोरेकरूपता समुपलभ्यते। यथा—

पुष्यरथः पुष्परथश्च पुष्यमित्रः पुष्पमित्रश्च।

अत एव सम्भाव्यते यत् पुष्यवर्मणः परिचयः भास्करवर्मणः दूतेन कान्य-

प्राग्ज्योतिषः राजसिंहासनस्योपरित्रयाणां नृपाणामाधिपत्यमिति समुपलभ्यते—नरकः, भगदत्तः, वज्रदत्तश्च। एतेषां समये प्राग्ज्योतिषो राज्यस्य कियद्विस्तारः आसीत् अत्र विषये सम्यक् प्रतिपादयितुं न पारयामः। यथा पूर्वमेव प्रतिपादितं यत् प्राग्ज्योतिषो राज्यस्यान्तर्गते चीनदेशस्य कश्चिदंशः आसीत्, तिब्बतराष्ट्रं यावत् प्राग्ज्योतिषः राज्यस्य विस्तारः आसीत्[1]।

कुब्जेश्वराय हर्षवर्धनाय पुष्पवर्मा एवंरूपेण प्रदत्तः। भगदत्तवज्रदत्तयोः मध्ये पुष्पवर्मणश्चोल्लेखः प्रमादत एव जातः, यतोऽस्य स्थितिरन्ते एवावश्यकीया वर्तते। द्वयोः दत्तयोः मध्ये पुष्पवर्मापि पुष्पदत्ततां गतः। एवमेकान्यापि विप्रतिपत्तिः समायाति यद् दुर्योधनपक्षतः संगरं कुर्वन्—

भगदत्तसुतो राजन् कृतप्रज्ञो महाबलः।
श्येनवच्चरता संख्ये नकुलेन निपातितः॥

—म० भा०, कर्णपर्व, ५.२९.

सम्भवतोऽयमेव भगदत्तपुत्रः वज्रदत्तस्य ज्येष्ठभ्रातासीत्। यतः प्रथममेवोक्तमस्ति यद् वज्रदत्तस्तदानीं बालकः आसीत् अतः सः युद्धक्षेत्रमवतरितुमसमर्थ एवासीत्। उपरितनोद्धृते श्लोके यत् कृतप्रज्ञशब्दः, स न कस्यापि नाम अपि तु विशेषणमेवास्ति। यतोऽनेकेषां पण्डितप्रवराणामनुमानेनायं शब्दः विशेष्य एव प्रतिभाति। तर्हि किमयमेव वज्रदत्तज्येष्ठभ्राता पुष्पदत्तः। उभयोः नामयोः पर्यालोचनया, दत्तयोजनया च एवं 'पुष्प' इति कोमलतमं 'वज्र' इति कठोरतमं च सार्थकयोः पदयोः, तयोश्चोत्तरं 'दत्त' शब्दस्य प्रयोगात् प्रतीयते द्वावपि भ्रातरावेव। यतः एतादृशी प्रवृत्तिः लोके दृश्यतेऽपि। एकस्मिन् परिवारे दृष्टम्, यत् पितरौ षण्णां कन्यायामेवं नामकरणमकुरुताम्—'रन्जना, साधना, वन्दना, कामना, वासना, अर्चना'। अत्र समेषां नाम्नां अन्ते 'ना' इति वर्तते। एतादृश्यामवस्थायां वज्रदत्तस्य पूर्वं पुष्पदत्तनाम्नः सार्थक्यं भवितुमर्हति। कुरूक्षेत्रयुद्धे भगदत्तः पुष्पदत्तश्च द्वावपि पितापुत्रौ वीरगतिं प्राप्तवन्तौ, अतः राजशृंखलायां पुष्पदत्तस्य नाम नोपलभ्यते। यतः सः पुष्पदत्तः राजपदवीं नैव प्राप्तवान्।

१. युधिष्ठिरस्य राजसूययज्ञे बहवो राजानः समागताः, तेषु प्राग्ज्योतिषोऽधिपतिः राजा भगदत्तोऽपि समुपस्थित आसीत्, तस्मिन् यागे सः युधिष्ठिराय उपहारमयच्छत्—

युधिष्ठिरस्य राजसूययज्ञे[1] 'सह म्लेच्छैः सागरानूपवासिभिः' इत्यभिधीयते। पूर्वसागरवासी[2] एवं पर्वतवासी[3] इति द्वे अभिलेखेऽपि भगदत्तस्य वर्तेते। अत्रैवं प्रतीयते यत् ब्रह्मपुत्रमहानदस्योतरपूर्वदिग्भागे स्थितां पर्वतमालामतिक्रम्य चीनदेशस्य समुद्रस्योपपर्यन्तं भागमेकमधिकृत्य भगदत्तः राज्यविस्तारं अकरोत्[4]। भगदत्तेन वज्रदत्तेन कृतेषु युद्धेषु हस्तिनामुल्लेखः सम्प्राप्यते, अद्यापि हस्तिनः आसामप्रान्तस्य गौरवं विद्यते, कामरूपस्य राज्ञां हस्तिचिह्नांकितासु राजमुद्रासु हस्तिनां प्रतिष्ठा दरीदृश्यते।

श्रीहट्टमण्डलस्य मैमनसिंहमण्डलस्य च मध्ये पर्वतारण्यभागे भगदत्तस्य निवासभूः आसीत्। प्राचीनप्राग्ज्योतिषराज्ये पूर्वीयबंगालप्रदेशस्य कश्चित् भागः अंशः सम्मिलित आसीत्। सम्भाव्यते यत् केचित् कामरूपराजा मध्ययुगे ब्रह्मपुत्रमहानदं तीर्त्वा पूर्वीयवंगालप्रदेशस्य एकस्मिन् भागे स्वाधिपत्यं स्थापितवन्तः।

पुराणेतिहासवेत्तारः विद्वांसः प्राग्ज्योतिस्तस्याधिपतीनांच विवरणं

आजाने यान् हयान् शीघ्रान् आदायानिलरहंसः।
× × × ×
अश्मसारमयं भाण्डं शुद्धदन्तत्सरूनसीन्॥

—म०भा०, सभापर्व, ५१.१५-१६

श्लोके प्रदर्शिता सामग्री भूतानदेशीया (भूटानदेशीया) वर्तते, अतो ज्ञायते भूतानदेशः प्राग्ज्योतिषो राज्यस्यैव भूभाग आसीत्। अतः तिब्बतदेशेन सह प्राग्ज्योतिषो राज्यस्य मधुरः सम्बन्धोऽपि ज्ञायते। रणे अर्जुनस्य च प्राग्ज्योतिषः विजयेनापि एवमेवोपलक्ष्यते।

१. महाभारत, सभापर्व, ३४.१०.
२. तत्रैव, उद्योगपर्व, ४.११.
३. तत्रैव, द्रोणपर्व, २५.५२.
४. वनमालवर्मणः ताम्रशासनस्य ५ एवं ६ श्लोके उट्टंकितं वर्तते यत भगदत्तः पितुः नरकस्य राज्यं लब्ध्वा न तुतोष अतः भगदत्तः आशुतोषस्य तपः तप्त्वा वरमधिगम्योपरिस्थितपर्वतपत्तनानि जग्राह। एवं सः स्वराज्यमुत्तरपूर्वभागे वितस्तार। अतः पूर्वसागरपर्यन्तो भूभागस्तस्य राज्यस्यांगमासीत्। अत एव तस्य पितुः शत्रुः इन्द्रः यः पूर्वदिग्भागस्याधिपतिरासीत्, तेनेन्द्रेण भगदत्तेन सह सुसम्बन्ध स्थापितः, एवं सुरलोकं यावत् तस्य प्रतिपत्तिरासीत्।

दातुमयतन्त, एवं प्राग्ज्योतिषा (कामरूपेण) सम्बन्धितानां समुपलब्धानां च ताम्रपत्राणां नूतनदृष्टया तथ्यं प्रस्तोतुं कृतयत्नाः विद्यन्ते ।

आसामप्रान्ते अद्यावधि अशोकस्य स्तम्भशिलालेखो नोपलब्धः तथा चीनदेशीययात्रिक-ह्वेन्त्सांग-महोदयस्य विवरणेनापि तत्कालं यावत् बौद्ध-धर्मस्य प्रचारप्रसारः नाभवदिति ज्ञायते ।

गुप्तवंशीयानां राज्ञां कामरूपे प्रभावः राज्यविस्तारश्चासीदिति तेजपुरस्य निकटे, ब्रह्मपुत्रतटीयभागे पाषाणगात्रेषु ५१० गुप्ताब्दांकसंख्या प्राप्यते । तथा चान्यदपि अस्ति दृढतरं प्रमाणं यत् प्रयागस्थितसमुद्रगुप्तस्य स्तम्भलेखे कामरूपस्योल्लेखो वर्तते । अन्यानि च सन्ति समतटम्, डवाकनाम-स्थानम्, कामरूपम्, नेपालदेशः, कर्तृपुरम् । दिग्विजयार्थं प्रस्थिताः दूरस्थिताः मालवीयाः निकटस्थिताः गुप्तवंशीयाः मगधदेशीयाः वा ते ते सर्वे एव राजानः पूर्वोत्तरस्थितानां राज्यानां राजभिः सहावश्यमेव युयुधुः ।

भास्करवर्मणः विधनपुरे प्राप्तेऽभिलेखे तस्य तस्मिन् एकादशानां पूर्वपुरुषाणां परिगणनोट्टंकिता वर्तते । सा यथा—

राज्ञां तत्पत्नीनां च नामानि

१. पुष्पवर्मा (ईसवीय चतुर्थशतकस्य मध्यभागे)
२. समुद्रवर्मा—पत्नी—दत्तदेवी
३. बलवर्मा—पत्नी—रत्नवती
४. कल्याणवर्मा—पत्नी—गन्धर्ववती (ई० ५म शतके)
५. गणपतिवर्मा—पत्नी—यज्ञवती
६. महेन्द्रवर्मा—पत्नी—सुव्रता
७. नारायणवर्मा—पत्नी—देववती
८. महाभूतिवर्मा—पत्नी—विज्ञानवती (ई० ६ शतके)
(नामान्तरम्—भूतिवर्मा)
९. चन्द्रमखवर्मा—पत्नी—भोगवती
१०. स्थितवर्मा—पत्नी—नयनदेवी
११. सुस्थितवर्मा—पत्नी—श्यामादेवी
(नामान्तरम्—मृगांकवर्मा)

सुप्रतिष्ठितवर्मा   भास्करवर्मा
(ईसवीय सप्तमशतकस्य पूर्वार्धम्)

कविकुलचूडामणेः कान्यकुब्जेश्वरराजसभाभूषणस्य बाणभट्टस्य हर्षचरितस्य सप्तमोच्छ्वासे महाभूतिवर्मणः आरभ्य भास्करवर्मपर्यन्तानां सर्वेषां राज्ञां नामानि निर्दिष्टानि । उभयोर्मध्ये केवलमन्तरमेतावदेव यत् महाकविना बाणेन हर्षचरिते महाभूतिवर्मणः स्थाने भूतिवर्मा इति नाम निर्दिष्टम्, सुस्थितवर्मणः स्थाने च सुस्थिरवर्मा इति नामोल्लेखः कृतः । हर्षचरिते भास्करवर्मणः एकं उपनाम 'कुमार' इत्यप्युपलभ्यते । परन्तु अद्य यावद् उपलब्धानां राज्ञां शासनेषु (अभिलेखेषु) इदं नूतनं नाम नैवागतम् । कतिवर्षपूर्वं नालन्दाभग्नस्तूपखननावसरे भास्करवर्मणः राजमुद्रायाः एकं खण्डं समुपलब्धम्, तस्मिन् गणपतिवर्मणः आरभ्य भास्करवर्मणः यावत् समेषां राज्ञां तन्महिषीणां च नामानि उट्टंकितानि सन्ति यानि अभिलेखेषु केवलं पार्थक्यमेतावन्मात्रं एवास्ति यत् नयनदेवीस्थाने नयनशोभा एवं श्यामदेवीस्थाने श्यामलक्ष्मीनामनी लिखिते वर्तेते ।[1]

भास्करवर्मणः राज्यकालविषये नास्ति कोऽपि भ्रमः, यतः एतन्निर्विवादमस्ति यत् कान्यकुब्जेश्वरहर्षवर्धनस्य राज्यकालः ६०६ ई० अस्ति, अस्मिन्नेव समये भास्करवर्मणः दूतः मैत्रीप्रस्तावमादाय हर्षवर्धनस्य सभायामागत आसीत् । अतः तस्मिन्नेव समये भास्करवर्मा प्राग्ज्योतिषः कामरूपराज्यस्याधिपतिरासीत् । चीनदेशीयः यात्रिकः ह्वेन्त्सांगमहोदयः कामरूपं ६४३ ईसवीयवर्षे अगच्छत् । तत्र तस्मिन् समये भास्करवर्मा शासकः आसीत् । इतिहासविदः कालनिर्णयार्थं ऐतिहासिकगणनानुसारं प्रत्येकस्य राज्ञः २५ वर्षाणि यावत् कालं स्वीकुर्वन्ति । अर्थात् चतुर्णां पुरुषाणामेकाशताब्दिः स्वीक्रियते । अनया गणनया महाभूतिवर्मणः भूतिवर्मणो वा राज्यकालः षष्ठशतकस्य प्रारम्भकाल एव भवेत् एवमनुमातुं शक्यते । अस्य प्रामाण्यार्थमन्यदपि वक्तुं शक्यते यत् समुद्रवर्मा तस्य पत्नी दत्तदेवी उभयोः नामसादृश्ये सति सम्भवतः समुद्रवर्मणः पिता पुष्पवर्मा समुद्रगुप्तस्य समकालीन आसीत् । पुष्पवर्मा न केवलं समुद्रगुप्तस्यातिराजत्वमेव स्वीकृतवान् अपि तु मित्रतासम्बन्धद्वारा राज्ञः समुद्रगुप्तस्यादेशमादाय स्वात्मजस्य पुत्रवध्वाश्च नामकरणं सम्राजः तस्य महिष्याः च नाम्ना चकार अथवा तन्नाम्नीं कन्यामनुसन्धाय तया साकं समुद्रवर्मणः विवाहोऽक्रियत[2] ।

---

१. जर्नल आफ दी बिहार एण्ड उड़ीसा सोसायटी, मार्च १९२०, पृ० १५१-१५२.

२. तस्मिन्काले कामरूपराजैः, गुप्तसम्राजां नाम्नामनुकरणमक्रियत एवं

अस्मिन् मध्ययुगे यैः राजभिः कामरूपसिंहासनं भुज्यते स्म तेषु भास्करवर्मा ह्यासीदतीव कीर्तिमान् भाग्यशाली च। वयं त्रिषु स्थलेषु तस्य विशुद्धमितिहासं प्राप्नुमः—

१. महाकविवाणभट्टकृतहर्षचरितसप्तमोच्छ्वासः।

२. भास्करवर्माभिलेखाः।

३. चीनदेशीययात्रिकह्वेन्त्सांगमहोदयस्य यात्राविवरणम्।

महाकविवाणभट्टप्रदत्तहर्षचरितकथानुसारं हर्षवर्धनः स्वज्येष्ठभ्रातुः राज्यवर्धनस्य गौडराजद्वारा वधं श्रुत्वा गौडराजेण सह योद्धुं प्रातिष्ठत्। भास्करवर्मणो राजदूतः हंसवेगः उपहारजातमादाय मैत्रीकरणार्थं यात्रामार्गमध्ये एव

मन्दिरादीनां निर्माणे गुप्तवंशीयानां राज्ञां नीतेरनुकरणं चाक्रियत। अस्मिन् विषयेऽनेकानि प्रमाणानि समुपलभ्यन्ते। राखालदासबनर्जीमहोदयः तेजपुरनगरसमीपं दशपर्वतियाग्रामस्य एकस्य भग्नावशिष्टस्य मन्दिरस्य तोरणद्वारे तान्येव चिह्नानि अपश्यत्—"Plastic art of the Gupta period and its influence on later medieval art".

अभिलेखसमानतां दृष्ट्वा कोऽपि प्रसिद्धेतिहासकारः चिन्तितोऽभवत्। डॉ० विंसेण्ट स्मिथमहोदयेन 'अर्ली-हिस्ट्री ऑफ इण्डिया' नामकस्वग्रन्थे लिखितम्, यत् भास्करवर्मा सम्भवतः हिन्दुधर्मावलम्बी कोचजातीयः आसीत्। परन्तु ताम्रशासने लिखितैकादशपूर्वपुरुषात्मिका तालिका न प्रमाणयति उक्तं मतम्। अत्रापि स्मिथमहोदयाः कथयन्ति यत् पुष्पवर्मणः समुद्रवर्माणं यावत् प्रसिद्धस्य राजग्रन्थस्यानुकरणं दृष्ट्वा एतदनुमातुं शक्यते यदेषा वंशावलिः न प्रमाणीभूता। एतादृशं दृष्टान्तं नास्तीतिहासेऽतीव दुर्लभम्, अतो नाम्नाद्यनुकरणस्य सत्वेऽपि नामावलिरेषा न कथंचिदप्रमाणीभूता। यतो हि भास्करवर्मा लब्धविपुलख्यातिः प्राचीनस्य सुवंशस्याधिपतिरासीत्। महाभारतादिषु ग्रन्थेषु एतेषां राज्ञां कीर्तिः घुष्यते। एवंभूतस्य कुलीनस्य नृपतेः विषये एवंभूतस्य निन्दोपायस्यावलम्बनं नावश्यकमेवापि त्वतीवानुचितम्। अस्तु यथा स्यात् तथा स्यात्, परन्तु स्मिथमहोदयस्य यन्मतं यत् भास्करवर्मा कोचजातीयः आसीत् तत् सर्वथासंगतं भ्रमात्मकं च।

तममिलत् ।[1]

भास्करवर्मणः पिता सुस्थितवर्मा येन महासेनगुप्तेन पराभूतोऽभवत्, तस्यैव पुत्रं भ्रातृव्यं वा हर्षचरिते नरेन्द्रगुप्तशशाङ्कमेव गौडाधिपतिरिति प्रतिपादयति—

श्रीमहासेनगुप्तोऽभूत् तस्माद्वीराग्रणी सुतः ।
सर्वधीरसमाजेषु लेभे यो युधि वीरताम् ॥
श्रीमत्सुस्थितवर्मयुद्धविजयश्लाघापदांकं मुहुः ।
यस्याद्यापि विबुद्धकुन्दकुमुदक्षुण्णांच्छहारं सितम् ॥
लौहित्यस्य तटेषु शीतलवनेषूत्फुल्लनागद्रुम-
छायासुप्तविबुद्धसिद्धमिथुनैः स्फीतं यशो गीयते ॥

आदित्यसेनस्यापसदलेखानुसारं डा० फ्लीट्महोदयैः सुस्थितवर्माणं मध्यदेशस्य मौखरीराजवंशीयोऽधिपतिः प्रमाणीकृतः । किन्तु "लौहित्यस्य तटेषु" इति उक्तमतं निरस्यति । यतः शशांकः सार्वभौमराजपदवीलब्धुकामः आसीत्, अतः भयेन भास्करवर्मणा तस्योपरि आक्रमणकारिणा हर्षवर्धनेन सार्धं मैत्रीं सन्धिबन्धनमकार्षीत् । विविधमुपहारजातमादायागतेन भास्करवर्मणो राजदूतेन हंसवेगेन सम्पूर्णं वृत्तान्तं हर्षवर्धनाय न्यवेद्यत । न्यवेद्यत च भास्करवर्मणश्चिरसंकल्पं यत् सः महादेवपादारविन्दादृतेऽन्यं न नमस्यते । तस्यैव शासनेन नीचाः सम्पन्ना भवितुं शक्नुवन्ति । समुद्रवसुधे जयतः । मृत्युना प्रबलप्रभावशालिना हर्षवर्धनेन सह मैत्री काम्या ।[2] वस्तुस्थितिरियमस्ति यद् हर्षवधनेन भास्करवर्मणः मैत्रीं स्वीकृत्य स्वप्रधानदूतः बहूपहारसामग्रिसम्भारभरितः

---

१. बहूपहारैः सह भास्करवर्मपूर्वपुरुषाणामभोगनामकवारुणछत्रमपि आसीत् । पुराणादिषूल्लिखितनरकाहृतं दितिछत्रमेव तत् सम्भाव्यते । 'यशश्च वरुणस्य बहिरवृत्तिहृदयमिदमातपत्रमाह्वयामीव' । इदमेव छत्रं कृष्णेनापि हृतमासीत् । इदं विहायापि भगदत्तेत्यादिभ्यः बहुमूल्याभूषणान्युत्कृष्टमहत्पात्रमृगचर्मबहुविधवाहनहस्तलिखितग्रन्थनानासुगन्धिद्रव्यमृगनाभिबहुप्रकारकर्जीवजन्तुकिन्नरवानरशुकसारिकायारिकाद्युपहारीभूताः पदार्थाः आसन् ।

२. अयमस्य शैशवादारभ्य सकल्पः स्थेयान् स्थाणुपादारविन्दद्वयादृते नाहमन्य नमस्कुर्यामिति ।

भास्करवर्मणः सम्मानार्थं प्रेषितः। इदं वृत्तं भास्करवर्मणः ताम्रानुशासने प्राप्यते "महान् रौप्याश्चपत्तिसम्पत्युपात्तजयशब्दान्वर्धस्कन्धावारात् कर्णसुवर्णवासकात्।" अस्मिन् समये कर्णसुवर्णः भास्करवर्मणोऽधीनमासीत्। सम्भवतः उभाविमौ हर्षवर्धनभास्करवर्माणौ मिलित्वा घोरशत्रुशशांकं कर्णसुवर्णात् पराजितं कृत्वा, तस्या राजधानीं प्रविश्य, तत्र विजयोत्सवमकुरुताम्, तत्रैव चास्य ताम्रानुशासनस्य विधानमपि अकुरुताम्। लेखेनानेन प्रतीयते यत् भास्करवर्मणः शासनकालादेव प्रारभ्यास्य ताम्रशासनस्य प्रसारोऽभवत्। किन्तु गुप्ताब्दे ३०० शतके गंजामनामकस्थाने प्राप्ते ताम्रानु[1]शासने महाराजाधिराजविरुदेन शशांको भूषितो वर्तते। अनेन ताम्रानुशासनेन प्रतीयते यत् तत्कालं यावत् हर्षवर्धनभास्करवर्मभ्यां कर्णसुवर्णं स्थायिरूपेण विजितं नाभवत्। सम्भवतः शशांकस्य मृत्योरुपरान्तमेव (आनुमानिके ६२५ ईसवीये) कर्णसुवर्णं हर्षवर्धनस्याधिकारे आगतमासीत्। भास्करवर्मणो निधनपुरताम्रानुशासनेन ज्ञायते यत् तस्य ज्येष्ठभ्राता सुप्रतिष्ठितवर्मासीत्। तस्य विषये तस्मिन् लेखे अतीव स्वल्पपरिचयः प्राप्यते—

यस्योन्नतिः परार्था विद्याधरचक्रवर्तिसेव्यस्य।
सगजस्य सुप्रतिष्ठितकटकस्य कुलाचलस्येव॥[2]

अनेन ज्ञायते यत् सुप्रतिष्ठितवर्मणापि हर्षवर्धनस्य ज्येष्ठभ्रातुः राज्यवर्धनस्येव स्वल्पकालं यावदेव राज्यमक्रियत। अत एव परोपकारनिमित्तादेव तस्योन्नतिरभूत्। चीनदेशीययात्रिकह्वेन्त्सांगमहोदयस्य यात्राविवरणे भास्करवर्मा कुमार इति अभिख्यया भूषितो विद्यते। सम्भवतः स्वज्येष्ठभ्रातुः राज्यकाले इयमभिख्या लब्धा स्यात्। एवं सिंहासनारूढे जातेऽपि सः ज्येष्ठभ्रातुः सम्मानार्थं कुमारनामैव प्रचारितवान्।[3] किन्तु भास्करवर्मणः कुमारनामकरणस्यान्यदपि कारणं भवितुमर्हति। दूतस्य वाक्ये—'तस्य च सुगृहीतनाम्नो देवस्य सुस्थितवर्मणः देव्यां श्यामादेव्यां भास्करद्युतिर्भास्करवर्मापर-

१. एपिग्राफिया इण्डिका, खण्ड ६, पृ० १४३.

२. भास्करवर्मणः निधनपुरस्य ताम्रानुशासनम्, श्लोक २१.

३. हर्षवर्धनस्य विषये ह्वेन्त्सांगयात्रिणा लिखितं यत् सोऽपि ज्येष्ठभ्रातुर्मृत्योरुपरान्तमनिच्छापूर्वकमेव राज्यस्य भारमग्रहीत् तथा च 'कुमारशिलादित्य' इति नामापि अग्रहीत्।—वाटर—ह्वेन्त्सांग, खण्ड १, पृ० ३४३.

नामा तनयः शान्तनोः भागीरथ्यां भीष्म इव कुमारः समभवत्।'[1] अत्र भीष्मेण सह भास्करवर्मणः तुलना कृता विद्यते। सम्भाव्यते यत् तावत् कालं यावत् सः भीष्म इव अविवाहित एव स्यात्। किन्तु तस्य ताम्रशासने कुमार इति अपरनाम नैव प्राप्यते। अनेनैव प्रतीयते यत् शासनादेशकाले भास्करवर्मा विवाहितो जातः स्यात् तथा च कुमारनाम्नः निषेधमकरोत्। किन्तु ह्वेन्त्सांग-महोदयः भास्करवर्मणः राज्यस्यान्तिमे समये कामरूपमागच्छत् तथा च भास्करवर्माणं कुमारनाम्नाऽभूषयत्। अनेन प्रतीयते यत् तत्कालं यावत् भास्करवर्मा विवाहं नाकार्षीत्।

चीनदेशीययात्रिकह्वेन्त्सांगमहोदयः ६४३ ईसवीये वर्षे कलोतूनाम्नीं नदीं तीर्त्वा कामरूपराज्यमागच्छत्। अनेन प्रतिभाति यत् तस्मिन् समयेऽपि कलोतूनदी (करतोया नदी) कामरूपराज्यस्य पश्चिमसीम्नि अवस्थितासीत्। प्रथममेवोल्लेखः कृतः यत् नरकस्य समयेऽपि सैव सीमासीत्। वनपालदेव-वर्मणो राज्यकाले ततोऽपि २०० वर्षानन्तरमपि एवं तस्यापि वहुकालानन्तरं यावत् करतोया नदी कामरूपराज्यस्य पश्चिमसीमासीत् धर्मपालवर्मणो शुभं-कर पाटकताम्रशासनेऽपि निर्दिष्टमस्ति यत् तत्कालपर्यन्तमपि करतोया नदी कामरूपस्य पश्चिमप्रान्तस्य सीमानिर्देशिकासीत्। चतुःसहस्रवर्षाणि यावत् गौडमगधेत्यादिप्रतिष्ठितमहत्वपूर्णराजाणां सन्निकटे सद्भिरपि कामरूपस्य नृपैः स्वराज्यस्य सीमा न लघुरक्रियत। वृत्तमिदं भास्करवर्मणस्तथा तस्य पूर्ववर्तिनां राज्ञां राजनीतिकमहत्त्वस्य एवमुत्कर्षस्य परिचायकमेव विद्यते। श्रीहट्टमण्डलस्य प्रायः पूर्वभागस्य पंचखण्डनिधनपुरे भास्करवर्मणः ताम्र-शासनममिलत्। अनेन केचित् विद्वांसः वदन्ति यत् तत् स्थानमपि कामरूप-स्यान्तर्गतमेवासीत्। किन्तु शासनस्यास्य चन्द्रपुरीविषयान्तर्गतमयूरशाल्मगृह-क्षेत्रसम्वन्धितश्रीहट्टस्य पंचखण्डात् कोऽपि सम्वन्ध एव नास्ति। यद्यपि ताम्रशासनद्वारा प्रायः स्थावरभूमीत्यादिरेव प्रतीयते स्म तथापि ताम्रशासनं किमपि स्थावरं द्रव्यं नैव भवति। अत एव येन ताम्रशासनेन कामरूपमण्डले एकखण्डभूमिः दीयते तदेव वैद्यदेवप्रदत्तशासनं तस्मात् वहुदूरं वाराणसीनगरस्य समीपं कमौलीनामकस्थाने प्राप्तमस्ति।[2] कामरूपस्यान्तर्गतचन्द्रपुरीविषयक-भूमिदानसम्वन्धिशासनमिदं वहुदूरस्थश्रीहट्टस्यान्तर्गते पचखण्डप्रशासने

---

१. हर्षचरितसप्तमोच्छ्वासः।

२. गौडलेखमाला, पृ० १२७।

(परगना) प्राप्तम्, अस्मिन् विषये आश्चर्यस्य नास्ति भूमिः। निधनपुरस्य ताम्रशासनस्य तृतीयफलकस्य प्रथमपृष्ठे 'पट्टकप्रति' अनेन नाम्ना उभयोर्बोधो भवति, प्राचेयस्य गोत्रस्य साधारणस्वामी, अन्यश्च कात्यायनगोत्रीयः साधारण-स्वामी, अथवा तस्य वंशस्य लोपे कात्यायनगोत्रीयः मनोरथस्वामी अथवा तस्य वंशस्य केनापि सार्धं तत् ताम्रशासनं समागतम्, एवं च सः मनोरथस्वामी पंचखण्डं समागतः स्यात् तथा च तत् ताम्रशासनमपि पंचखण्डप्रदेशे तेना-नीतं स्यात्।

यथा पूर्वमेव निर्दिष्टम्, यत् भास्करवर्मणो राज्यकालस्यान्तिमावसरे, एवं भारतभ्रमणस्यान्तिमे चरणे ह्वेन्त्सांगमहोदयः कामरूपमगच्छत्। तेन च कामरूपस्य विषये तस्य विचाराणामुल्लेखः कृत एव। भास्करवर्मणो विषये विदुषा ह्वेन्त्सांगेन बहुप्रशंसा चाक्रियत। स स्वयात्राविवरणे लिखति यत् शासकः (राजा) जात्या ब्राह्मणः आसीत् तथा नारायणदेवस्य वंशधरश्च। तस्य नाम भास्करवर्मा अर्थात् स सूर्यस्येव प्रतापशाली आसीत्। तस्यान्यत् नाम कुमारः अर्थात् युवा विद्यते स्म। अस्मिन् वंशे राज्यभारः वंशपरम्परया आगच्छन्नासीत्। राजा भास्करवर्मा विद्याप्रेमी आसीत्, तस्य प्रजाः तस्या-दर्शाणामनुकरणशीला आसन्। देशान्तरतोऽपि बहवो विद्वांसः तस्य राज-धान्यामध्ययनार्थं आगच्छन्। यद्यपि सः स्वयं बौद्धो नासीत् परन्तु श्रमणाना-मपि समादरमकरोत्। ह्वेन्त्सांगः भास्करवर्माणं ब्राह्मणं स्वीकरोति, अनेन ज्ञायते यत् सः तस्मिन् काले बौद्धधर्मेण प्रभावितदेशे भास्करवर्मणोऽसाधारणं व्यक्तित्वं दृष्ट्वा तथा च तस्य विशुद्धाचारं दृष्ट्वा, एवं तं नारायणदेवस्य वंशधरं ज्ञात्वा एव तं ब्राह्मणमित्याह। अस्य वैदेशिकस्येदं महत्वपूर्णं वक्तव्यं प्रशंसात्मकं प्रतीयते। निधनपुरशासने भास्करवर्मणः विषये येषां विशेषणानामुल्लेखोऽभवत् तत्सर्वं सत्यमिति विवादः एव नास्ति। अपि तु तत्समकालीनो भारतसम्राट् हर्षवर्धनः स्वमित्रं भास्करवर्माणं अतीव सम्मान-यति स्म। एकस्यां शोभायात्रायां स्वयमिन्द्रस्य स्थानं गृहीत्वा भास्करवर्माणं ब्रह्मणः स्थानं स्वदक्षिणपार्श्वे अदात्। अस्य राजवंशस्यैव सर्वदैतादृशमेव सम्मानमासीत् यत् कालिदासेन रघुवंशे[1] सूर्यवंशविख्यातसम्राड्विवाहावसरे कामरूपाधिपतिना सह श्रेष्ठव्यवहारस्योल्लेखः कृतः।[2]

---

१. रघुवंशे पंचमे सर्गे।

२. ततोऽवतीर्य्याशु करेणुकायाः स कामरूपेश्वरदत्तहस्तः।
वैदर्भनिर्दिष्टमयो विवेश नारीमनांसीव चतुष्कमन्तः॥—रघुवंश ७.१७.

६४२ ईसवीये वर्षे हर्षवर्धने स्वर्गं गतेऽपि भास्करवर्मा जीवन् आसीत्। स्वर्गं गते हर्षे तस्यैकेनामात्येन अरुठाश्वेन (अर्जुनेन) तस्य राज्य-सिंहासनं स्वायत्तीकृतम्। चीनदेशस्य राजदूतः भारतमगच्छत्। त्रिविष्ट-पदेशात् (तिब्बतदेशात्) अर्जुनेन प्रेरितः सन् प्रत्यगच्छत्। पुनश्च स सेना-मादायार्जुनस्य राज्ये आक्रमणमकरोत्। तदा भास्करवर्मा महतीं सेनामादाय अर्जुनस्य साहाय्यमकरोत्। तदा ६४९ ईसवीये वर्षे भास्करवर्मा पूर्वीयभार-तस्याधिस्वामिसंज्ञया विभूष्यते स्म।[1] भास्करवर्मणः कालान्तरमेकस्य राष्ट्रविप्लवस्य संवादः प्राप्यते। रत्नपालवर्मणः ताम्रशासनतः ज्ञायते। क्रमानुसारमस्य वंशस्य समग्रपृथ्वीपालनकारिनृपतीनामुपरि दैवप्रकोपात् शालस्तम्भवंशीयम्लेच्छराजभिरधिकारोऽक्रियत। अस्मिन् वंशे पुरुषानुक्रमात् विग्रहस्तम्भप्रभृतिराजानोऽजायन्त। एषां संख्या प्रायेण विंशतिर्भवेत्। तेषु नृपतिः त्यागसिंहः सन्ततिविहीन एव स्वर्गमगच्छत्। स्थितिमेनां दृष्ट्वा जनः प्रजापृथ्वीपालनसमर्थं नरकवंशे जातं ब्रह्मपालवर्माणं राजपदाय वृणोतिस्म।[2]

ब्रह्मपालशासनप्रदायको रत्नपालवर्मासीत्। रत्नपालवर्मणः शासनस्य प्रत्येकाक्षरं समालोच्य डॉ० हार्लेमहोदयेन ११०० ईसवीयवर्षं स्थिरीकृतम्।[3] तच्छाशनं रत्नपालस्य राज्यस्य २५ वर्षे प्रदत्तमासीत् अतः रत्नपालस्य राज्यस्य प्रारम्भकालः ११ शतकस्य प्रथमभागोऽथवा १० शतकस्यान्तिमो भागः भवेत्। तस्य पिता ब्रह्मपालो निश्चितरूपेण दशमशतकस्यान्तिमे भागे

---

१. भिन्सेण्ट स्मिथ, अर्ली हिस्ट्री आफ इण्डिया, पृ० ३२७।

२. एवं वंशक्रमेण क्षितिमथ निखिलां भुञ्जतां नारकाणां।
राज्ञां म्लेच्छाधिनाथोविधिचलनवशादेव जग्राह राज्यम्।
शालस्तम्भः क्रमस्यापि हि नरपतयो विग्रहस्तम्भमुख्या।
विख्याताः सम्बभूवुर्द्विगुणितदशतासंख्यया संविभिन्नाः।
निर्वंशं नृपमेकविंशतितमं श्रीत्यागसिंहाभिधन्।
तेषां वीक्ष्य दिवंगतं पुनरहो भौमो हि नो युज्यते।
स्वामीति प्रविचिन्त्य तत् प्रकृतयो भूभाररक्षाक्षमं।
सागन्ध्यात् परिचक्रिरे नरपतिं श्रीब्रह्मपालं हि यम्।

३. जर्नल आफ दी एशियाटिक सोसाइटी आफ बंगाल, पार्ट १, खण्ड १, १८९८, पृ० १०२।

राजा भवेदिति। तस्मात् पूर्वं शालस्तम्भात् प्रारम्य त्यागसिंहं यावद् एकविंशतिसंख्यकैः राजभिः कामरूपस्य राजदण्डः परिचालितः। एकस्यां शताब्दौ सप्तानां राज्ञां शासनकालस्वीकरणे शालस्तम्भस्य सप्तमशताब्देः समयः भवति। अत एव विद्वांसः स्वीकुर्वन्ति यत् भास्करवर्मणः कंचित् समयान्तरं नरकभगदत्तादीनां सिंहासनं म्लेच्छाधिपतिना शालस्तम्भेन स्वायत्तीकृतमासीत्। यद्यपि रत्नपालस्य लेखे शालस्तम्भः म्लेच्छोपदेनोपाधिना कथ्यते स्म तथापि शालस्तम्भीयवंशजातराजभिः आत्मानं नरकभगदत्तवंशगतमेवोद्घोषितम्।[1]

शालस्तम्भीया नृपतयः स्वराज्यमुद्रायां तामेव चतुरस्राकारहस्तिमूर्तिउट्टंकयन्ति स्म। यद्यपि भास्करवर्मणः राजमुद्रा अग्निपक्वा तथापि सा चमसाकारासीत् तथा च हस्तिचिह्नांकितासीत्। रत्नपालादिभूपानां राजमुद्रा तथैवासीत्।

शालस्तम्भवंशस्यैकस्य राज्ञः निश्चितसमयः प्राप्यते, दारगंजमण्डलान्तर्गते तेजपुरस्य समीपे ब्रह्मपुत्रस्य तटे कस्यापि पाषाणस्योपरिलिखितेन लेख्येन, तत्सम्बन्धिवार्ता पूर्वमेव लिखिता, तस्मिन् लेखे हर्जरवर्मानाम लभ्यते, तत्र गुप्तवंशीयाब्दांकाः ५१० स्पष्टतयोल्लिखिताः। अनेन ज्ञायते यत् हर्जरवर्मा ८२९-३० ईसवीये वर्षे वर्तमान आसीत्। अत्र हर्जरवनमाल-बलवर्म-रत्नपाल-प्रभृतीनां राज्ञां शासने प्रचलितयोः श्लोकयोः आधारं अंगीकृत्य शालस्तम्भवंशविवरणं प्रस्तूयते—

---

१. अस्मिन् प्रसंगे वनमालबलवर्मणोः ताम्रशासनं द्रष्टव्यं विद्यते। एतेषामपि राजमुद्रायां "प्राग्ज्योतिषाधिपतयः" विशेषणं विद्यते। कैः कारणैः एते राजानः म्लेच्छपदेन अदूष्यन्त, अस्मिन् सम्बन्धे हर्जरवर्मणः शासने सम्भवतः भविष्यवाणीरूपेण किमपि वक्तव्यमासीत्। यत् तस्य फलकस्य प्रथमपृष्ठस्य द्वितीयपंक्तौ "अतो म्लेच्छाभिधास्तु भविष्यास्तव पार्थिव" उल्लिखितमस्ति। अस्ति दुःखस्य वार्ता यत् श्लोकस्यास्योत्तरभागः पूर्णरूपेण पठितुं नाशक्यत तथा च प्रथमफलकस्याद्यावधि प्राप्तिरेव न जाता।

२. नामेदं हर्जरवनमालबलवर्मताम्रशासने 'शालस्तम्भः' एवमुल्लिखितमस्ति। 'शाल एवं 'साल' इमे द्वेऽपि शुद्धस्यैव वृक्षस्य विशेषणस्य वोधके स्तः।

क्रमः ताम्रशासनानि	राज्ञः नाम	आनुमानिकसमयः
१. हर्जरवनमालवलवर्म-रत्नपालताम्रशासनम्	शालस्तम्भः[१]	सप्तमशताब्देरुत्तरार्धः
२. हर्जरवलवर्मलेखे	विजयः	———
३. रत्नपालस्य ताम्रशासनम्	विग्रह्-स्तम्भ[१]	———
४. हर्जरवलवर्मशासनम्	पालकः[२]	अष्टमशताब्दिः
५. हर्जरशासनम्	कुमारः	———
६. ,,	वज्रदेवः	———
७. हर्जरवनमालशासनम्	हर्षवर्मा	———
८. हर्जरशासनम्	वलवर्मा	———
९. ,,	चक्रः	———
१०. ,,	आरथी[३]	———
११. वनमालशासनम्	आरथः[४]	———
१२. हर्जरवनमालशासनम्	प्रालम्भः[५] (तस्य पत्नी जीवदेवी)	नवमशताब्दिः

---

१. विग्रहस्तम्भस्य नामान्तरं नदी अपि भवितुं शक्यते। अस्योपनामापि भवितुं शक्नोति। वलवर्मणः शासने रणस्तम्भमिति एवं इन्द्रपालस्य द्वितीयशासने संग्रामस्तम्भमिति अस्मिन् प्रसंगे द्रष्टव्ये स्तः।

२. पालक-कुमार-वज्रदेव-हर्षवर्मणः एतेषु प्रत्येकः स्वपूर्ववर्तिराजपुत्रः आसीत् न वा अस्योल्लेखः नैव प्राप्यते।

३. चक्रः आरथी च द्वौ भ्रातरौ आस्ताम्, तयोः मध्ये न एकोऽपि राजपदवीं लब्धवान्। हर्जरवर्मणः लेखात् ज्ञायते यत् एतौ द्वावपि गुरोः वाक्यं ग्रहीतुं असमर्थौ आस्ताम्—

४. अयं अरथिनः ज्येष्ठपुत्रः आसीत्, अत एव अयं आरथोऽभिधीयते स्म। प्रालम्भः अस्य भ्राता आसीत्। आरथः राजाभवत् अथवा न, अस्य किमपि सम्यक् प्रमाणं नोपलभ्यते।

५. हर्जरस्य शासने जीवदेव्याः नाम वर्तते परन्तु प्रलम्भस्य नाम नैव प्राप्यते।

क्रमः ताम्रशासनानि	राज्ञः नाम	आनुमानिकसमयः
१३. हर्जरवनमालबलवर्म-ताम्रशासनम्	हर्जरः[1] (तस्य पत्नी मंगल-श्रीयासीमतरा)	५१० गुप्ताब्दांकाः
१४. हर्जरवनमालबलवर्मशासनम्	वनमालः	———
१५. बलवर्मशासनम्	जयमालः नामान्तरम् वीरबाहुः (पत्नी अम्बा)	———
१६. ,,	बलवर्मा	दशमशताब्दिः
१७. रत्नपालस्य शासनम्	श्रीत्यागसिंह (एकविंशतितमो राजा)	———

बलवर्मणः ताम्रशासनस्याक्षराणां आलोचनां कृत्वा डा० हाल महोदयेन तस्य समयः १० शताब्दिः निर्दिष्टा एवं आनुमानिककालः ९७५ ईसवीयवर्षे प्रतिपादितः।[2] तस्मिन् समये हर्जरस्य पाषाणखण्डस्य लिपिः नाविष्कृताभवत्। अस्याः आविष्कारे जातेऽपि तस्यानुमानेन केवलं ५० वर्षाणामेवान्तरं परिलभ्यते। अस्यामवस्थायां भेदोऽयमतिस्वल्पः एवास्ति।

शालस्तम्भस्य वंशस्य येषां त्रयाणां राज्ञां ताम्रशासनानि उपलभ्यन्ते, ते सन्ति हर्जर-वनमाल-बलवर्माणः, एते सर्वेऽपि हारूपेश्वरनामकस्थानतः शासनादेशं प्रसारितवन्तः। इदं लौहित्यनदतः पूर्ववर्तिनगरं आसीत्। सम्भवतः तेजपुरनगरे तथा तस्य परितः कस्मिन्नपि स्थाने तस्य राजधानी

---

१. एवं प्रतीयते यत् हरज्वरनामतः हर्जरनाम्नः उत्पत्तिः जायते, हरज्वरस्य उत्पत्तेः कथा हरिवंशपुराणस्य विष्णुपर्वणि १२२ अध्याये एवं ब्रह्मवैवर्तपुराणस्य श्रीकृष्णजन्मखण्डे १२० अध्याये उपलभ्यते। शोणितपुरस्य राज्ञा बाणेन सह श्रीकृष्णस्य युद्धस्य समये अस्योत्पत्तिरभूत्। नाम्नोऽपि सन्देहो जायते यत् हर्जरवर्मणः राजधानी शोणितपुरे एवासीत्।

२. बलवर्मणः ताम्रशासनात् सम्बन्धितविचारवितर्कान् डा० हार्ले महोदयः इन्द्रपालस्य शासनसम्बन्धितनिबन्धे कृतवान्—जर्नल आफ दी एशियाटिक सोसाइटी आफ बंगाल, खण्ड ६६, भाग २, १८९७.

हारूपेश्वर इत्यवात्रस्थितासीत्। वनमालस्य पितुः हर्जरवर्मणः पाषाणगात्रलिपिः तेजपुरनगरस्य सन्निकटे अलभ्यत । इदं प्रथममेव प्रतिपादितम्, मुख्यतयास्मिन् नगरे यत्र तत्र प्राचीनकाले एकं अतीवशोभनं मन्दिरं एवं अट्टालिकायुक्तं नगरं आसीत् ।[२] भास्करवर्मणः राजधानी सम्भवतः नरकभगदत्तयोः समयात् यत् स्थानं व्याप्यासीत्, तदैवास्यापि समये । यद्यपि ताम्रशासनानि कर्णसुवर्णतः प्रकाशितानि, तथापि तत्र राजधान्याः उल्लेखो नास्ति । शालस्तम्भः सम्भवतः स्वम्लेच्छापवादकारणात् प्राग्ज्योतिषमागत्य तत्र निवासाय न साहसं कर्तुंमपारयत् । अत एव ते यस्य प्रदेशस्याधिपतयः आसन्, तस्य राजधानी हारूपेश्वरस्थानमासीत् ।[३] अस्माकं विचारतः 'हारुप्पं पदं संस्कृतस्य सारूप्य-शब्दस्य प्राकृतमथवापभ्रंशरूपं भवितुं शक्यते । तैः भक्तस्य स्वरूपं मुक्तिर-मन्यत्, अत एव अस्येदं नामकरणमभवत्, इदमपि अनुमानतः वक्तुं शक्यते ।[४]

---

१. वनमालताम्रशासने उल्लिखितहारुपेश्वरं नाम केचन विद्वांसः 'हरपेशन' इति पठन्ति, इदं न समीचीनम् ।

२. स्थानीयप्रवादोऽयमेवास्ति यत् इदं राज्ञः वाणस्य राजधानी शोणितपुरं अस्ति । वर्तमाननाम्नापि एवमेव प्रतीयते । असमीयभाषायां तेजसोऽ-अर्थोऽस्ति रक्तम्, इदं नास्ति असम्भवम्, यतः वाणस्य नरकस्य च कथा, या कालिकापुराणस्य ३९ अध्याये समुपलभ्यते सा अस्यैव प्रवादस्य समर्थिकास्ति । अत एव परिवर्तिसमयेऽपि इदं राजधान्यर्थं स्थानमचायि अद्यापि तेजपुरं वारंगमण्डलस्य प्रधानं नगरं अस्ति। वनमालस्य शासने राजधान्याः वर्णनस्य समये 'श्रीकामेश्वरमहागौरीभट्टारिकाभ्यां अधिष्ठितशिरसः कामकूटगिरेस्ताम्रकूटं गृहं' लोहित्यनदस्य तटे स्थापित-मिति उल्लिखितमस्ति । अयं कामकूटगिरिः सम्भवतः वर्तमानसमीप-वर्तिप्राचीनदेवालयैः व्याप्तपर्वतानां प्राचीननाम स्यात् ।

३. हारूपेश्वरमिति कस्यापि देवस्य नाम आसीत् । सम्भवतः केनापि एत-द्वंशजातेन राज्ञा हारूपनामकेन स्वनाम्ना शिवलिंगस्य स्थापना कृता स्यात् । हारूप्यनामापि म्लेच्छत्वस्यैव सूचकमस्ति ।

४. सम्प्रति तेजपुरस्य समीपे दहपरवतियानामकग्रामे प्राप्ते भग्ने देवालये गुप्तकालीनस्थापत्यस्यानुसरणं विद्यते । अस्मादेतत् हारुपेश्वरस्य निकट-स्थितं किमपि स्थानं भवेत् ।

कामरूपस्याथवा प्राग्ज्योतिषः राज्यस्य राजधानी हस्तान्तरिताभवत्। यथा पूर्वमेव निर्दिष्टम्, एतेऽपि राजान आत्मानं नरकभगदत्तवंशीयमेवोद्घोषयन्ति। अधुना यथा सूर्यवंशचक्रं बहुस्थानेषु एवं शाखासूपलभ्यते तथैव शालस्तम्भः अपि नरकभगदत्तवंशीयशाखागत एवासीत्। सम्भवतः एव कामरूपराज्यस्योपरि स्वाधिकारं कर्तुं समर्थोऽभवत्। अस्य वंशस्यैकस्य नरपतेः वार्ता नेपालदेशे प्राप्ते एकस्मिन् लेखे लभ्यते। पशुपतिनाथस्य मन्दिरस्य पश्चिमद्वारस्य पुरतः स्थितस्य नन्दिनः (वृषभस्य) पृष्ठभागे एकस्मिन् कृष्णवर्णप्रस्तरखण्डे लेखमिदमुत्कीर्णमस्ति। लिपिरियं जयदेवस्यास्ति अतः मद्दृष्ट्या प्रायेण ७५९ ईसवीये वर्षे लिपिरियमलिख्यत।

नागदन्ति समूहदन्तमुसलक्षुण्णारिभूमच्छिरो।
गौडोड्रादिकलिङ्गकोशलपतिश्रीहर्षदेवात्मजा।
देवी राज्यमती कुलोचितगुणैर्युक्ता प्रभूता कुलै।
र्येनोढ़ा भगदत्तराजकुलजा लक्ष्मीरिव क्षमाभूजा।

एवं प्रतिभाति यत् हर्षवर्माथवा श्रीहरिशः सम्भवतः सालस्तम्भवंशीयः आसीत्। किन्तूक्तश्लोकस्य द्वितीये चरणे लिखितं वर्तते यत् सः गौड-उड्र-कलिंग-कोशलानां राजासीत्, किन्तु तत्रेदं नैव प्रतिपादितं विद्यते यत् सः कामरूपस्याधिपतिरासीत्। किन्तु तस्य कन्यायाः विषये प्रतिपादितं विद्यते यत् सा भगदत्तराजवंशीयासीत्। अनेन तु स्पष्टं प्रतीयते यदस्मिन् शासने कामरूपस्योल्लेखः निष्प्रयोजनमेवास्ति, अत एव गौडोड्राभ्यां सह कामरूपस्योल्लेखो जानतापि नाक्रियत। तथापि राज्ञानेन तस्मिन् समये गौड-उत्कल-कलिंग-कोशलराज्येषु स्वशासनविस्तारमकरोत्, अत्रास्ति स्वाभाविकी सन्देहभूमिः। प्रतीयतेऽनेन यदेषोक्तिरतिशयोक्तिरेव। प्रायेणेदं भवितुं शक्यते यत् हर्षवर्मा अथवा श्रीहरिशः दिग्विजयाय गौडप्रभृतिराज्येषु अगच्छत्, तथा च यत्र क्षणिकमेवाधिपत्यमकरोत्।[1] भागलपुरे आविष्कृते नारायणदेवस्य द्वितीये ताम्रशासने शालस्तम्भवंशीयस्य अपरस्य राज्ञः उल्लेखो

---

१. अष्टमे ईसवीयवर्षे गौडप्रभृतिराज्येषु भीषणाराजकतासीत्। धर्मपालस्य खलिमपुरताम्रलेखे लिखितं वर्तते, यत् तदा गोपालः राजा निर्वाचितोऽभवत् ततः प्राक् सम्पूर्णराज्ये मात्स्यन्यायः आसीत्।
'मात्स्यन्यायमपोहितं प्रकृतिभिर्लक्ष्म्याः करं ग्राहितः।
श्रीगोपाल इति क्षितोशशिरसां चूडामणिस्तत्सुतः'॥
अस्मिन् समये कामरूपस्य राजानः आक्रमणं चक्रुः।

वर्तते। किन्तु तस्य नाम नैव मिलति। गौडराजदेवपालस्य राज्यकाले तस्य कनिष्ठभ्रातृसेनापतिजयपालदिग्विजयविषये प्रतिपादितं विद्यते यत्—

आसां चक्रे चिराय प्रणयिपरिवृतो विभ्रदुच्चेन मूर्ध्ना।
राजा प्राग्ज्योतिषाणामुपशमितसमित्संकथां यस्य चाज्ञां ॥[1]

देवपालः नवमस्य ईसवीयस्य शतकस्यान्तिमे भागे गौडानां पतिरभवत्, सम्भवतः तस्मिन् समये प्राग्ज्योतिषः-पुरस्य राजा जयपालः आसीत्। देवपालस्य राजत्वकाले त्रयस्त्रिंशत् तमे वर्षे (३३ वर्षे) एकं शासनं प्रदत्तम्, किन्तु तस्मिन् जयपालस्य विजयवार्तायारुल्लेखो नास्ति। ज्ञायतेऽनेन यदेताः सर्वाः घटनाः तस्य राजत्वकालस्यान्तिमे चरणे बभूवुः, तस्मिन् समये प्राग्ज्योतिषः नरपतिः बलवर्मा आसीत्, इदमेवानुमातुं शक्यते।[2]

शालस्तम्भवंशस्य परम्परायाः लोपे जाते प्रजालोकैः नरकवंशीयरत्नपालपितुः ब्रह्मपालस्य निर्वाचनं कृत्वा राजाक्रियत यथा २०० वर्षतः पूर्वं गौडराज्ये लोकाः धर्मपालपितरं गोपालं राजसिंहासनार्थमचिन्वन्। गोपालदेवः यथा गौडराज्ये पालवंशस्य प्रवर्तक आसीत् तथैव ब्रह्मपालोऽपि कामरूपे

---

१. गौडलेखमाला, पृ० ५८.

२. बौद्धलामातारानाथस्यानुसारमिदं स्वीकरणमावश्यकमस्ति यद् धर्मपालः कामरूपमधिकृतवान्। यदीदं सत्यमेव स्यात् तदा धर्मपालस्य राजत्वस्य ३२तमे वर्षे प्रदत्ते ताम्रानुशासनेऽथवा तस्यात्मजदेवपालस्य ताम्रानुशासने गौडैः सह युद्धस्यावश्यमेवोल्लेखः स्यात्। धर्मपालः हर्जरवर्मणः तस्यात्मजस्य वनमालस्य समये राज्यसिंहासनं लभेत। वनमालस्य ताम्रशासने स्पष्टमुल्लेखोऽस्ति यत् सः त्रिस्रोतसः पश्चिमभागस्यान्तर्गतं दानमददात्। अनेन ज्ञायते यत् नरकात् वनमालस्य समयं यावत् करतोया नदी कामरूपस्य पश्चिमसीमा आसीत्, तस्यां किमपि परिवर्तनं नाभवत्, ततो बहुसमयान्तरं यावत् करतोया नदी कामरूपपश्चिमसीमान्तर्गता एवासीत्। अतः तत्समये यावत् कामरूपस्य कस्मिन्नपि भागे कस्यापि अधिकारो नाभवत्। इदं स्पष्टं विद्यते। किन्तु रमाप्रसादचन्दमहोदयेन गौडलेखमालाग्रन्थस्य २३ पृष्ठे बौद्धतारानाथस्य लेखस्योल्लेखं कृत्वा वृथैवेदं प्रमाणयितुमचेष्टत यत् धर्मपालेन कामरूपं स्वायतीकृतमिति।

पालवंशस्य प्रथमो राजासीत् । अनेनैव कारणेन बहुसमयपश्चादपि प्रसारितेषु धर्मपालस्य त्रिषु ताम्रशासनेषु ब्रह्मपालस्योल्लेखो दृश्यते । धर्मपालः स्वपितृ-हर्षपालं 'पालकुलप्रदीपः' कथयति स्म, एवं स्वं 'पालन्यायाम्बुजरविः' च ।[1] अत्रास्य वंशस्य राज्ञां नामावली प्रस्तूयते—

आनुमानिकसमयः	**नाम**	**ताम्रशासनानि**
१० शतकस्यान्तिमभागः	ब्रह्मपालः (तस्य पत्नी कुलदेवी)	रत्नपालप्रथमशासनम्, इन्द्रपालशासनम्, धर्मपालस्य शासनत्रयम्
११ शतके	रत्नपालः	रत्नपालेन्द्रपालधर्मपालप्रथम-ताम्रशासनम्
———	पुरन्दरपालः[2]	इन्द्रपालधर्मपालप्रथमशासनम्
———	इन्द्रपालः	,, ,, ,,
———	गोपालः (तस्य पत्नी नयना)	धर्मपालशासनत्रयम्
———	हर्षपालः (तस्य पत्नी रत्ना)	धर्मपालशासनद्वयम्
१२———शतके	धर्मपालः[3]	धर्मपालशासनत्रयम्

रत्नपालस्य ताम्रशासने राजधान्याः नाम दुर्जयेति लिख्यते स्म—'प्राग्ज्योतिषेषु दुर्जयाख्यपुरमध्युवास ।'[4] प्रतिभात्यनेन यद् यदा शालस्तम्भवंशस्य विरामोऽभवत् तदा तेषां राजधानी हारूपेश्वरनगरमपि विगतवैभव नामशेषं चाभवत् । तथा च ब्रह्मपालवर्मणा नूतनराजधान्याः स्थापनमकरोत् । कस्मिन् प्रान्ते कुत्र दुर्जयायाः स्थितिरासीदिति वक्तुं नैव शक्यते, किन्त्वेतद् वक्तुं शक्यते

---

१. नामेदं सादृश्ये प्रतीयते यत् तस्मिन् समये कामरूपस्याधिपतयः समीपमुपस्थितप्रबलशक्तिशालि-गौडभूपतीनामानुसरणमकुर्वन् एवं च पालशब्दं स्वनाम्नोऽन्तिमभागे गृहीतवन्तः ।

२. पुरन्दरपालः राज्यप्राप्तिपूर्वमेवास्तंगतोऽभूत्, तस्य पत्न्याः नाम दुर्लभासीत् ।

३. सिलीमपुरे प्राप्तायामेकस्यां प्रस्तरलिप्यां कामरूपस्यैकस्य राज्ञः जयपालस्योल्लेखो विद्यते । सम्भवतोऽय धर्मपालस्य आद्यस्तनपुरुषोऽथवा पुत्रः पौत्रो वा स्यात् ।

४. रत्नपालस्य प्रथमताम्रप्रशासने, ४० पंक्तौ ।

यदस्याः स्थितिः लौहित्यनदस्य दक्षिणे प्रान्ते आसीत्, यतः रत्नपालस्य प्रथमशासने तथा चेन्द्रपालस्य द्वयोः शासनयोरस्य विषये विवरणमस्ति, अस्याः भूभागः उत्तरपूर्वभागेऽवस्थित आसीदिति स्पष्टतया पृथक् पृथक् उल्लेखोऽस्ति।[1]

अनेन ज्ञायते यत् प्राचीनप्राग्ज्योतिषपुरे दुर्जयायाः स्थितिरासीत्। 'शालस्तम्भः नरकाणां............विधिचलनवशादेव जग्राह राज्यम्[2]'। अनेनेदमेव समर्थ्यते यत् शालस्तम्भेन नरकवंशीयं कमपि राजानं जित्वा तस्य राजधान्याः आंशिकभागोऽध्यक्रियत, ततश्च शनैः शनैः सम्पूर्णा राजधानी स्वायत्तीकृता।

त्रिशतवर्षाणामनन्तरं शालस्तम्भवंशस्यान्ते जाते प्रजाजनैः नरकवंशीयः ब्रह्मपालवर्मा पुनः राजसिंहासने स्थापितोऽभूत्। तत्समयं यावत् प्राचीनराजधानी प्राग्ज्योतिषपुरं नामशेषतामभजत्। अत एव प्रजाजनैः निर्वाचितेन ब्रह्मपालेन प्रजा-मनोरञ्जनार्थं हारूपेश्वरं स्वराजधानीं न कृत्वा, नरकभगदत्तादीनां राजधान्याः समीपम् एव कुत्रापि स्वराजधान्याः निर्माणमक्रियत। पुरा प्राग्ज्योतिरेव राजधानी आसीत् किन्तु तस्य ध्वंसे जाते, तत् केवलं राज्यपदवाचकमेवाभूत्। सम्भवतः एषावस्था शालस्तम्भीयानां राज्ञां समयेऽभवत्।[3]

---

१. रत्नपालस्य द्वितीयशासने नोपलभ्यते यद् भूमिः कस्मिन् तटेऽवस्थितासीत्। सम्भवतः स भूखण्डः दक्षिणभागे आसीत् अतएव कस्यापि तटस्य नोल्लेखोऽक्रियत तत्र। भूमिरियं कलंगाभूखण्डस्यान्तर्गता आसीत्। कलंगानद्याः नाम्नैवास्य भूमिखण्डस्य नामासीत्। ब्रह्मपुत्रनदस्योपनदी अस्ति नदीयम्, तथा च दक्षिणभागादागत्य कलंगा ब्रह्मपुत्रेण संगच्छति। हारूपेश्वरस्थानं लौहित्यस्योत्तरपूर्वेऽर्थात् तेजपुरेऽथवा तस्य निकटे स्थितमस्ति। अत एव बलवर्मणः शासनस्य भूमेः **दक्षिणतटेऽवस्थितिरुद**लिख्यत।

२. रत्नपालशासनस्य नवमश्लोकः।

३. यत् शालस्तम्भवंशीयानां पालवंशीयानां च राज्ञां शासनेषु प्राग्ज्योतिषो-वर्णनं प्राप्यते तच्चैव नरकभगदत्तादीनां राज्ञां शासनेष्वपि समुपलभ्यत एव। परन्तु आसां राजमुद्राणां यः प्राग्ज्योतिषः उल्लेखः स तेषां राज्यस्यावबोधक एव।

अनेन ज्ञायते यत् नवनिर्मितराजनगरस्य प्राग्ज्योतिःपुरकरणमनुचितमवधार्य सार्थकं 'दुर्जय' पदं विशेषणं संगृह्य तस्याः 'दुर्जया'नामकरणं अभूत् । नाम किमपि स्यात्, दुर्जया वहुसुदृढप्राकारैः परिवेष्ठिता आसीत् । अतः एव सुरक्षितापि आसीत् । अतोऽस्य दुर्जया नाम सर्वथा सार्थकमासीत् । अस्याः वर्णने लिखितमस्ति यत्—

'यच्च शकक्रीडाशकुनिदृढपन्जरेण गुर्जराधिराजप्रज्वरेण दुर्द्दान्तगौडेन्द्रकरिकूटपाकलेन केरलेशाचलशिलाजतुना वादिकतायिकातङ्कक्कारिणा दाक्षिणात्यक्षौणिपतिराज्यक्ष्मणा क्षपितरातिपक्षतया क्षितिपवक्षःकपाटपटेनेव प्राकारेणावृतप्रान्तम्'[1] ।

परन्तु अनेनेदं न प्रमाणितं भवति यद् दूरदेशीयराजाः आक्रमणमकुर्वन् । फलतः तस्य सम्भावनापि नासीत् । यतः इयं राजधानी रत्नपालस्य शासनप्रदातृक्रमे, अर्थात् तस्य राजत्वस्य २५ तमे वर्षेऽपि एतादृशी प्रतिष्ठिता नाभवत् यद् अस्मिन्नेव समये दूरदेशात् आगत्य राजानः व्यष्टिसमष्टिभावेन अस्याः अवरोधं क्रियासुः ।

लेखकस्य मनोभावना सम्भवतः एषैवासीत् यत् यदि ते सर्वे पराक्रमशालिनः राजानः आक्रमणं क्रियेरन् तदापि तेषां मनोरथः नापूर्यत । अतः दुर्जया एतादृशी दुर्भेद्यासीत्, अर्थात् दुर्जया नाम्नः यथाशक्तिप्रतिपादनहेतुत्वेनैव सर्वयुक्तिरासीत् ।[2] रत्नपालस्यात्मजः पुरन्दरपालः, यः इन्द्रपालस्य

---

१. रत्नपालप्रथमताम्रशासनम्, पंक्ति, ३४-३६.

२. अस्याः विषये डॉ० हार्लेमहोदयस्य मतमतीव महत्त्वपूर्णं विद्यते—

Of Ratnapāla, it is related that he came into hostile contact with the kings of Gurjara, Gauda, Kerala and the Dekkan, and with the Bahikas and Taikas. Assuming that Ratnapāla's age has been rightly fixed at about 1010 to 1050 A.D., the king of Gurjara of that period would be the Western Chalukya king Jayasiṁha III or Someśvara I. By the Kerala king the Chola Rājarāja is perhaps intended. The Gauda king may have been Mahīpāla or Nayapāla of the Pāla dynasty of Bengal and Bihar. To whom the term "King of Dākṣiṇātya or the Dekkan" may refer. I do

जनकः आसीत्, सः राज्यपदं नैवाप्तवान्, अत एव इन्द्रपालस्याभिलेखे लिखितं अस्ति—"श्रीरत्नपालवर्मदेवपादानुध्यातपरमेश्वरपरमभट्टारकमहाराजाधिराजश्रीमदिन्द्रपालवर्म्मदेवः कुशली ।"[१]

उपर्युक्तशासनस्य १७ तमश्लोकात् ज्ञायते यत् इन्द्रपालस्य रत्नपालात् राज्याप्तिरभूत् यतः तस्य पिता पुरन्दरपालः तत्समये एव कालकवलितः जातोऽभवत् ।[२]

अस्मिन्नेवानुशासने पुरन्दरपालः शूरसुकविपदद्वारालं कृतः । एवं प्रवादोऽस्ति यत् शुक्रनीतेः यत् नीतिकुसुमनाम्नानुवादः असमीयभाषायामभवत् तस्य लेखकः पुरन्दरपाल एवासीत् । किन्तु ११ शतके असमीयभाषा अस्मिन् रूपे आसीत् न वा अस्ति अत्र सन्देहः; तथा च कोऽपि राजपुत्रः प्राकृतभाषायां ग्रन्थप्रणयने तत्परो भवेत् अथवा न, इदमपि अस्ति विचारणीयम् ।[३]

यत् किमपि स्यात्, तस्य पुत्रेन्द्रपालस्य शासनात् ज्ञायते यत् पुरन्दरपालस्य दुर्लभया सह विवाहोऽभवत् । सा जमदजयभुगविक्रमार्जितप्राज्यराज्यनृपवंशसम्भवा आसीत् ।[४] किन्तु राज्यमिदं कस्मिन् स्थाने आसीत्

---

not know, the Bahikas and Taikas are generally taken to be Trans—Indus people—those of Bhalkh and the Tajikas. But ....the panegyrist probably only wished to parade his familiarity with Sanskrit literature and further attempts at its identification would be waste of labour. (Journal of the Asiatic Society of Bengal, Part I, No. 1, 1898, p. 102.).

१. इन्द्रपालप्रथमशासने, द्वितीये फलके, पंक्ति, ३४-३५.

२. प्रथमशासने श्लोकस्य कश्चिदंशः नष्टप्राय एव, द्वितीये शासने अस्य निम्नपाठः प्राप्यते—

स्वर्गं गते पितरि यस्य यशः शरीरे पौत्रस्य पूतमनसा हरिविक्रमेण ।
राज्ञा वयः परिणतेन गुणानुरूपमित्यर्पिता स्वयमियन्निजराललक्ष्मीः ॥

३. इदमपि भवितुं शक्यते यत् पुरन्दरपालः संस्कृतभाषायां अथवा तस्मिन् समये प्रचलितायां देशभाषायां रचनां चकार । तत्पश्चात् केनापि विदुषा तस्य असमीयभाषायामनुवादोऽक्रियत ।

४. इन्द्रपालशासनम्, श्लोकः १३, प्रथमार्धं ।

तस्य किमपि प्रमाणं नैवोपलभ्यते। परशुरामः इमां पृथ्वीं एकविंशतिवारं निःक्षत्रियां अकरोत् तथा च बहूनि राज्यानि निजभुजबलार्जितानि कृतानि आसन्। तन्नामाङ्कितपरशुरामकुण्डसम्बन्धितभूखण्डस्य यादृशी कथा प्रचलिता वर्तते तेन ज्ञायते यत् ब्रह्मपुत्रनदोपत्यकोत्तरपूर्वप्रान्तवर्तमानभिसमी-रवामतीप्रभृतिपार्वत्यजातिभिरधिकृतं यत् भूखण्डमुपलभ्यते, तत्र परशुरामेणै-कब्राह्मणानामुपनिवेशसंघस्य स्थापनाक्रियत। समयस्य प्रवाहेण यद्यपि तस्य विनाशप्रायः जातस्तथापि तत्र निसनीगणानामाचारव्यवहारे आर्याणामा-चरणानां चिह्नानि अद्यापि उपलभ्यन्ते। सम्भाव्यते यत् रत्नपालसमये तत्र एकस्य राज्यस्य स्थितिः स्यात् एवं तस्य राज्यस्याधिपतेः पुत्र्या सह पुरन्दरस्य विवाहबन्धनं स्यात्।[1] तत्रातिसंकीर्णे स्थाने ब्रह्मपालतत्पूर्वपुरुषैः नरक-वंशीयैः सालस्तम्भवंशीयैश्च राजभिः स्वराजत्वकाले ३०० वर्षाणि यावत् अतीव कष्टात् निवासं अक्रियत। सौभाग्यवशात् ब्रह्मपालः राज्यं लब्ध्वा तत्स्थानं तत्याज तथा च तदनन्तरं तदंचले स्थितैः अनेकैः राजभिः सह वैवाहिकसम्बन्धं स्थापितवान्। यद्यपि तत्र राजानः नगण्याः एवासन्, तथापि अनुशासनेषु अनेकस्थाने तेषामुल्लेखो वर्तते।

पालवंशीयानां राज्ञां वंशावल्यां रत्नपालस्य राजत्वकालः ११ ईसवीय-शतकस्य प्रथमे भागेऽभवत्। तस्य द्वितीयशासनं तस्य राजत्वस्य २६ तमे वर्षे प्रदत्तमभवत्। अनेनैवमनुमीयते यत् सः ३० वर्षाणि यावत् राज्यमकरोत्। यतः पितामहादनन्तरं पौत्रं स्वराज्यलाभमकरोत्। येन राज्यकालस्य दीर्घा-वधिः स्वाभाविकी एव प्रतीयते। यथा आंगलदेशस्य राज्ञः जार्जतृतीयस्य विषयेऽभवत्। तथापि इन्द्रपालः तावत् दीर्घकालं यावत् राज्यभोगं कर्त्तुं नैवाशक्नोत्। यतः सः ११ शतकस्य मध्यकालं यावत् प्राग्ज्योतिषः राज्यस्य

---

१. कालिकापुराणे यदनेन सम्बन्धितमुपाख्यानमस्ति तस्मिन् नरकः विदर्भ-देशराजकन्यया सह पाणिग्रहणमकरोत्। विदर्भोऽयं सम्भवतः दक्षिण-भारते स्थितः विदर्भदेशः न स्यात्। कामरूपस्योत्तरपूर्वदिग्भागेऽस्य स्थितिरासीत्। अस्यानुमानस्य सन्ति अनेकानि कारणानि। तस्यैकस्था-नीयनद्याः नाम कुण्डिलासीत्। तस्या एकस्मिन् तटे 'कुण्डिन' अथवा 'कुण्डिल' नामकमेकं नगरमासीत्। रुक्मिण्याः पितुः गृहं तत्रैवासीत्, एवं प्रतिपादितं विद्यते एवंभूतानां प्रमादवार्तानां—गेटमहोदयस्य 'हिस्ट्री आफ आसाम' पृ० १५-१६ द्रष्टव्यम्।

सिंहासने प्रतिष्ठितः आसीत् । अत्र नास्ति कस्यापि सन्देहस्य भूमिः । तथा च तस्य पुत्रः पौत्रश्च गोपालः हर्षपालश्च तस्यैव शतकस्यावशिष्टे भागे राज्यमकुरुताम् । अत एव हर्षपालस्य पुत्रः धर्मपालः १२ शतकस्य प्रथमभागे राज्यमकरोत् । इदमेव तस्यां वंशावल्यां प्रदर्शितं विद्यते । धर्मपालोऽपि दीर्घकालं यावत् राज्यमकरोत्, अस्य सन्ति अनेकानि प्रमाणानि । धर्मपालेन स्वयमेव पुष्पभद्रालिपेः प्रथमाष्टौ श्लोकाः अलिख्यत । इदं तस्याः एव शासनलिप्याः वैशिष्टचमस्ति । अस्याः अष्टमश्लोकस्य विषये प्रतिपादितं विद्यते यत् सः कविचक्रवालचूडामणिः आसीत् । सुवंकरपाठकाभिलेखे धर्मपालस्य दानसम्बन्धिवहुवार्तानामुल्लेखोऽस्ति । किन्तु तत्र कवित्वशक्तेः विषये मौन्यमेवास्ति । कविचक्रवालचूडामणेः स्थाने सः वालचूडामणिविरुदेनाभूष्यत । अनेन तस्य यौवनावस्थायां बहुख्यातिः लक्ष्यते । सम्भवतः धर्मपालः परिणतवयसि कवित्वशक्तिमर्जितवान्[1] । अनेनानुमीयते यद् अस्य राज्यं दीर्घकालं यावत् सुखेन शान्त्या च व्यतीतमभवत् ।

धर्मपालस्याद्यावधि यावत् ताम्रशासनत्रयं समुपलब्धम्, तस्य राज्यस्य तृतीये वर्षे प्रदत्ते द्वितीये ताम्रशासने राजधान्याः विषये कोऽपि उल्लेखो नोपलभ्यते । तेन प्रदत्ते द्वितीये ताम्रशासने 'कामरूपनगरे नृपोऽभवद्धर्मपाल इति सान्ययाह्वयः' अनेन प्रतीयते यत् तस्य राजत्वकालात् पूर्वं रत्नपालेन्द्रपालौ राजधानीं दुर्जयां परित्यज्य कामरूपनगरं राजधानीमकुरुताम् । इदानीं इदं कामरूपनगरं कुत्रावस्थितं स्यात्, अस्य निर्णयार्थं प्राग्ज्योतिषः राज्यस्य एवंच तस्य समयस्य अवस्थायाः आलोचनाकरणमतीवावश्यकं विद्यते । भगदत्तस्य समये प्राग्ज्योतिषः राज्यस्य सीमा चीनदेशस्य कांश्चिदंशान् यावत् सम्भवतः पूर्वसागरं यावत् विस्तृता आसीत् । अस्योल्लेखः प्रथममेव कृतम् । इयं पूर्वसीमा वहुकालं यावत् अवाधिता आसीत् । किन्तु ब्रह्मपुत्रस्योपत्यकपश्चिमदिग्भागं त्यक्त्वा अन्येषु दिग्भागेषु येषुपर्वतभागेषु लोकाः न्यवसन्, तेषां राजानः प्राग्ज्योतिषः नरपतीनां सामन्ताः आसन् । अस्य प्रमाणं हर्जरवर्मणः शासनात् प्राप्यते—

१. नैसर्गिकी प्रतिभा श्रुतं च वहुनिर्मलम् । अमन्दश्चाभियोगोऽस्याः कारणं काव्यसंपदः । न विद्यते यद्यपि पूर्ववासनागुणानुवन्धि प्रतिभानमद्भूतम् । श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम् ।

—दण्डिप्रणीतकाव्यादर्श, १.१०३-१०४.

राज्यार्थं विजिगीषवो गिरिवरिप्रान्तेषु यत्रास्थिताः ।
सन्ध्यर्थंशरणं गता नृपसुताः स्थाने यमध्यासते ।।

अर्थात् प्रान्तीयैः राजभिः प्राग्ज्योतिषः सम्राजः सार्वभौमत्वं स्वीक्रियते स्म, अवस्थेयं रत्नपालेन्द्रपालधर्मपालानां राज्ञां कालं यावत् प्रचलिता आसीत् । किन्तु राज्यस्य पश्चिमीप्रान्तस्यावस्था सर्वथा स्वतन्त्रासीत् । प्राग्ज्योतिषः पार्श्ववर्तिनः दिग्विजयिनः राजानः गौडवंगीयाः पश्चिमदिशः प्राग्ज्योतिषराज्ये आक्रमणमकुर्वन् । इदं तु सत्यं यत् धर्मपालस्य राजत्वसमयेऽपि मुख्यतः प्रथमभागे राज्यस्य पश्चिमायां दिशि करतोयानदी प्रवहति स्म, तदा करतोयानदीं तरितुं कष्टकरमासीत्, अत एव प्रबलशत्रूणामाक्रमणं शीघ्रमेव प्रतिरोधयितुं सम्भवतः इन्द्रपालस्य वंशे कोऽपि राजा दुर्जयां त्यक्त्वा एव पश्चिमदिशः सीमायां सम्भवतः करतोयानदीं निकषा राजधानीं स्थापितवान् । अनुमानतः कथितुमिदं शक्यते यत् राजधानीयं ब्रह्मपुत्रस्य तटे न भूत्वा किञ्चिद् दूरमवस्थितासीत्, अस्य प्रमाणमिदमेवास्ति यत् सालस्तम्भवंशीयानां राज्ञां राजधानी यदा लोहित्यस्य तटे आसीत् तदा स्तुतेः श्लोकावल्यां लोहित्यस्योल्लेखोऽवश्यमेवासीत्, किन्तु धर्मपालस्य कस्मिन्नपि शासने लोहित्यस्योल्लेखो नास्ति तथा च सः यं यं भूभागं दानस्वरूपमददात् ते सर्वे ब्रह्मपुत्रस्य कस्मिन् तटेऽवस्थिताः आसन् । अस्मिन् विषये निश्चितरूपेण किमपि नैव प्रतिपादितं विद्यते ।[1]

ब्रह्मपुत्रनदस्यातिदूरं स्थितिहेतोः तस्य तटयोः श्रुतिः कस्यापि मनसि नोद्वुध्यते स्म । अत एव तस्योल्लेखः नैव सम्प्राप्यते । अर्थात् राजधानी कामरूपनगरं ब्रह्मपुरस्योपत्यकां विहाय सुदूरे पश्चिमे भागे स्थापिताभवत् ।

एष कामरूपः सम्भवतः कामात् कालात् 'कामता' आख्यामधारयत् ।[2] अस्याः ध्वंसावशेषा अद्यापि कुचविहारराजधान्यां सप्तक्रोशदक्षिणपश्चिमभागे प्राप्यन्ते ।

---

१. प्रथमशासने भूखण्डः दिचिन्नाविषयस्यार्न्गत आसीत्, बलवर्मणः शासनस्य समये भूखण्डः दिचिन्नाविषयस्यान्तर्गत आसीत् एवं तद्दक्षिणकूले स्थित आसीत् एवं प्रतिपादितं विद्यते ।

२. नामेदं आसामवुरन्जीनामकग्रन्थे 'कमता' अस्ति । कामरूपस्य प्रचलितभाषायां नियमतः कस्मिन्नपि शब्दे दीर्घाकारस्य द्वे मात्रे स्तः, तदा प्रथमा आकारस्य (आ) मात्रा ह्रस्वा (अ) भवति यथा कामरूपस्य

आसामवुरून्जीग्रन्थे धर्मपालनामकस्यैकस्य राज्ञः नामोपलभ्यते। अनेन राज्ञा अस्य देशस्य वहुभ्यः ब्राह्मणेभ्यः प्रचुरं दानमदात्। कामरूपमण्डलस्य स्यालकुचीस्थाने एको लब्धख्यातिः ब्राह्मणः आसीत्, तस्य नामासीत् वासुदेवः। तस्य सम्पूर्णभूमिः राज्ञाः धर्मपालेन प्रदत्तासीत्। इदं तु ज्ञायते एव यत् अनेन राज्ञा तेजपुरस्योपर्यप्यधिकारोऽक्रियत। केषांचित् विदुषामभिमतं यद् वंगदेशे यदा पालवंशास्यान्तोऽभूत् तदनन्तरं तस्यैव कोऽपि पुरुषः कामरूपस्य पश्चिमे भागे अर्थात् रंगपुरबबुरादिषु शासनं कुर्वन् आसीत्। धर्मपालः तस्यैव वंशस्य राजा आसीत्।[1] यद्यप्यनेकाः भ्रान्तयः सन्ति[2] तथापि अस्माकमनुमानं वह्वंशे

प्रचलितभाषायां 'राजा' शब्दस्योच्चारणं लेखनं च 'रजा' इति भवति। अतः 'कामता'-शब्दरूप-'कमता' विषयेऽपि एष नियमः कल्प्यते। कालिकापुराणस्य ६२.२ अनुसारतः केचिद् विद्वांसः एवं कथयन्ति यत् कामाक्षादेव्याः नामापरं 'कामदा' इति अस्ति तथा च 'कामदा' शब्दात् 'कामता' पदस्योद्भवो जातः। कालिकापुराणस्य ६४.७३ अनुसारतः देव्याः नामापरं 'कामरूपा' अस्ति, कामरूपस्यापभ्रंशे 'कामता' कुत्रापि न प्राप्यते एवं च भाषावैज्ञानिकनियमानुसारमपि कामरूपतः 'कामता' शब्दस्योत्पत्तिरपि कठिनैव। किन्तूभयत्र एकस्यैव धातोः प्रयोगः। तथा च एकस्याः भगवत्याः नामत एव उभयोः शब्दयोः समुद्भवः। अत एव भाषासिद्धान्तिदृष्ट्या यद्यपि नास्ति अपभ्रंशः, तथापि शब्दौ इमौ मूलतः एकत्वमेव भजतः।

बबुरामण्डलस्येतिहासे 'भवता' नामकस्यैकस्य ग्रामस्योल्लेखः अस्ति। वैद्यदेवस्य शासने उल्लिखितेन भावग्रामेण सह तस्य सामंजस्यं भवितुं शक्यते। एवंभूताः अनेके ताऽन्ताः ग्रामाः उपलभ्यन्ते यथा 'बेलता' (विल्ल्वग्रामः); तथैव कामता कामरूपस्य संक्षिप्तरूपमेव। कामपदेन सह 'ता' प्रत्यययोजना जाता न वा इदमपि चिन्त्यम्। विचारोऽयं नितान्तं नैव काल्पनिकमेव स्यात्। यथा देव्याः नाम 'कामदा' एवं 'कामरूपा' अस्ति तथैव 'कामाभि' अपि वर्तते।—कालिकापुराण, ६२.२.

१. रायबहादुरगुणाभिरामबरुयामहोदयेन लिखिते 'आसामबरुन्जी', चतुर्थसंस्करण, पृष्ठ, ४६-४७.

२. प्रथमा भ्रान्तिः एषैवास्ति यत् कामरूपमण्डलस्य स्यालकुचीग्रामस्य ब्राह्मणेभ्यः वृत्तेः दाता एवं च तेजपुरं यावद् राज्यकर्ता गौडस्य

सार्थकं प्रतिभाति। धर्मपालः स्वयं तस्य नगरस्य निर्माणं नाकारयत्। 'कामता' नगरं वर्तमानरंगपुरस्य समीपेऽवस्थितमासीत्। रंगपुरमण्डलस्योत्तरीया सीमा वर्तमानकुचविहारराज्यस्य मध्ये ध्वंसावशेषे अस्ति। कामरूपनाम कदा कस्मिन् समये 'कामता' रूपेण परिवर्तितं अभवदिति वक्तुं न शक्यते। किन्तु तद् धर्मपालस्य राजत्वस्य १०० वर्षाणां मध्ये एव यवनानां (मुसलिम) आक्रमणेनैवं घटना घटिता भवेत् एवमनुमातुं शक्यते।[1]

पालवंशीयः धर्मपालः कदापि भवितुं न शक्यते। कामरूपस्य राजानः वंशपरम्परया पालोपाधिधारिणः आसन्। द्वितीया भ्रान्तिः एवास्ति यत् धर्मपालस्य द्वितीयं शासनं पुष्पभद्रानद्याः तटे प्राप्तम्। अतः सः केवलं कामरूपमण्डलस्य ब्राह्मणानां कृते विशेषवृत्तेर्व्यवस्थामकरोत् नास्ति अत्र सन्देहः। किन्तु श्यालकुचीस्थाने प्राप्तं शासनं रत्नपालेन प्रदत्तमस्ति। इदम् आनुमानिक१००वर्षपूर्वं न्यायालये धर्मपालेन प्रदत्तं कथयित्वा कतिभ्यः ब्राह्मणेभ्योऽदीयत। तृतीया भ्रान्तिरेषास्ति यद् बवुरास्थानं रंगपुरस्य एकस्य राजपुरुषस्थानकस्य (थाना) नामासीत्। तदपि राजकीयमण्डलस्यान्तर्गतमासीत्। अत्र विशेषविषयोऽयं यद् धर्मपालस्य राज्ये तेजपुरं अर्थात् वर्तमानस्य आसाममध्यभागस्य 'बुरुन्जी' ग्रन्थेऽपि अस्ति। अनेन ज्ञायते यद् ब्रह्मपुत्रस्योपत्यकापि तस्मिन् सम्मिलितासीत्। तस्य पूर्वस्य कश्चिदंशः अर्थात् वर्तमानोपासामप्रदेशोऽपि तस्य राज्यस्यान्तर्गत आसीत्। परन्तु तद्भूभागः विशेषरूपेणोल्लेखनीयः आसीत् न वा इदं वक्तुं न शक्यते। विविधरूपाध्युषिताभिः नानापर्वतेष्वन्यान्यजातिभिः बहूनां सामन्तानां राज्यानि तत्स्थाने आसन्। तत्सम्बन्धिन एकस्य राज्यस्योल्लेखः पूर्वमेव मया कृतः।

१. तस्य समयस्य यवनानां (मुसलिम) आक्रमणविवरणप्रसंगे सर एडवर्डगेटमहोदयेन 'हिस्ट्री ऑफ आसाम' ग्रन्थे लिखितम् यत्—

'At the period with which we are now dealing, the whole tract upto the Karatoyā seemed still, as a rule, to have formed a single kingdom but the name had been changed from Kāmarūpa to Kāmatā. The Mahamadan historians sometimes speak as if the terms Kāmarūpa and Kāmatā were synonymous and applicable to one and the same country, but on other occassions they appear to regard the

कामतापुरमेव 'दुर्जया' स्थानस्य पश्चात् नरकभगदत्तवंशीयानां राज्ञां राजधानीं अभवत्। अस्यान्यदपि एवं प्रमाणमुपलभ्यते। १८०९ ईसवीयवर्षे डॉ० बुकानन हैमिल्टनमहोदयेन कामतापुरस्य ध्वंसावशेषं प्रत्यक्षं कृत्वा तस्य विस्तृतं विवरणं प्रास्तूयत।

It might naturally have been supposed that on the conquest of the city, the zealous followers of the Kuran would have destroyed the idol of Kāmateśvarī, but the worshippers of the goddess do not accuse them of such an action. Hindu tradition has it, that, on the fall of the city, the fortunate amulet of Bhagadatta retired to a pond near which the Singimari enters the city, and there remained concealed until a favourable time for reappearing occured. This happened in the reign of Rāma, Nārāyaṇa, the fourth of the present line of Kuch Bihar, Rajasthan.

अनेन ज्ञायते यत् भगदत्तवंशीयानां राज्ञां वंशपरम्परया पूजितं देव्याः यन्त्रं अस्य वंशस्य लोपेऽपि बहुकालं यावत् कामतापुरे कामतेश्वरीनाम्नः प्रतिष्ठितं आसीत्। यवनैः यदा तन्नगरं ध्वस्तं किञ्चित् समयार्थं सा देवी अन्तर्दधे। कालान्तरेण प्रकाशितमभूत् यद् इन्द्रपालस्य पूर्वपुरुषैः यैः कामरूपस्य नगरस्य निर्माणमकारयत, सम्भवतः तैः एव तद् यन्त्रमानीतं स्यात् सहैव।[1] गौडदेशस्येतिहासे विख्यातराजधर्मपालनामयशसी अद्यापि

---

rterm as distinct, and it would seem that at times the treats east and west of the Sankosh owed allegiance to different rulers, just as they did in the latter days of Koch rule, Chap. III, pp. 42-43, 2nd Edition.

सम्प्रतिकाले 'वरेन्द्र अनुसन्धान समिति' संस्थायाः भूतपूर्वसम्पादकविजयनाथसरकारमहोदयेन प्रतिपादितं यद् हुसेनशाहस्य द्वयोः अभिलेखयोः 'कामता' स्थानस्योल्लेखः अस्ति। एतावभिलेखौ मलदा मदरसाभिलेखः, कान्तादुअराभिलेखः स्तः। एतयोः कामताकामरूपयोः द्वयोरेवोल्लेखोऽस्ति, येन ज्ञायते यत् तौ उभौ अपि एकस्यैवार्थस्य बोधको वर्तते। यवनाः प्रायेण कामरूपस्य पकारस्य लोपमभिवाञ्छन्ति। धनरामस्य श्रीधर्ममंगले अपि कामरूपं 'कांगुर' इति लिखितमस्ति।

१. कुचविहारराज्यस्येतिहासस्य लेखको खानचौधरी एवं अमानत उल्ला

वंगदेशीयजनानां कर्णेषु गुञ्जतः। कामरूपे धर्मपालप्रदत्तदानविषयिका एवं

अहमद द्वावपि कामतेश्वरीविषये लिखतः प्राचीनकामतापुरस्य दुर्गस्याभ्यन्तरं विद्यते इदम्। गौसामीपारीनामकमेकं स्थानमस्ति यत्र कामतेश्वरीं एकस्मिन् सम्पुटके निधाय पूजनं क्रियते। तत्र मन्दिरस्याभ्यन्तर (यत्र देव्याः प्रतिमास्ति) गत्वा दर्शनस्य निषेधोऽस्ति। सम्पुटकस्योपरिभागे देव्याः मूर्तिरुत्कीर्णास्ति, कामाक्षादेव्याः महामुद्रापि सर्वदा अकृता एवास्ति, अतः तस्याः दर्शनस्य निषेधोऽस्ति। सम्भवतः कामतेश्वरीयन्त्रं कामाक्षादेव्याः प्रतीकमात्रमेव।

एभिरालोचनाभिः ज्ञायते तत् सालस्तम्भवंशीयवनमालस्य शासने उल्लिखिता 'कामेश्वरमहागौरी' एव पालवंशीयेन्द्रपालस्य द्वितीये शासने, उल्लिखिता 'महागौरी कामेश्वर', द्वयमेतत् कामाक्षादेव्याः भैरवप्रतिनिधिरूपेण एवमेव। कामरूपस्य राजानः एवमन्येऽपि जनाः एनं पूजयन्ति स्म। सम्भवतः तत्रैव कुत्रचिद् राजधान्या एव सम्भावनास्ति, यतः तस्मिन्नेवस्थाने देवप्रतिमानां स्थानमभवत्। अत एव एषा देवी प्राग्ज्योतिषः हारूपेश्वरं यस्मात् दुर्जयां स्थान्ते कामरूपं वा कामतानगरमानीय तस्याः अधिष्ठात्र्याः देव्याः रूपेण पूजनमभवत्। कामता सम्भवतः अन्तिमस्थानभूतत्वात् तत्र कामतेश्वर-कामतेश्वरीरूपेणाभ्यार्चयन्। यदा अस्य नगरस्य प्रध्वंसोऽभवत् तस्मिन् समये कामतेश्वरोऽन्तर्दधे तथा च तत्रवानन्तरं कामतेश्वरीरूपेण पुनः प्रकटितोऽभवत्। किन्तु कामतेश्वरस्य सम्बन्धे हण्टरमहोदयेन स्वनिबन्धे कोऽपि उल्लेखो न कृतः। डॉ० बुकानन हेमिल्टनमहोदयस्य विवरणे एकस्मिन् स्थले उल्लेखोऽस्ति यत्—

'I could only observe two places on the mound which bore any appearance of having been buildings, ... towards the east side is a small square heap which is said to have been the temple of the goddess Kāmateśvarī which is extremely probable. The other ruin situated towards the west side, has been paved with stones and is supposed to have been the Rājā's house, but this, I suspect, is not so well founded. Besides the fact that such a proximity to the residence of the presiding deity of the kingdom would not have been decent, the place is exceeding small, and totally unfit for

ख्यातिरासीत्। आसामदेशे यत् अन्येऽपि राजानः स्वशासने स्युः तस्य सम्बन्धिनं कथयित्वा ख्यातिमर्जितवन्तः। अस्मिन् विषये एकमुदाहरणमपि समुपलभ्यते। वनमालदेवस्य ताम्रशासनस्य प्रायः १०० वर्षपूर्वं आसाम-प्रान्तस्य गवर्नरजेनरलमहोदयस्य प्रतिनिधिः (एजेण्ट) जनरलजेकिन्समहोदयः एशियाटिकसोसाइटीसंस्थायां प्रेषणार्थं लिखिते निबन्धे अकथयत्—

'A similar grant of two plates was laterly produced by a brahmin in the Kamroop courts.........It was a grant of land as Burmuttur by Dharmapāla, in the year 36, without any mention what era to three brahmins, and detailed boundaries of the grant. That inscription was not very legible, the letters in some

---

the residence of a prince. It seems to be more suitable, in situation and size, for a building in which, on days of great solemnity, the images of the deity would be placed.

—Hunter, Statistical Account of Kuch Bihar, p. 365.

हेमिल्टनमहोदयेनोचितमेव प्रतिपादितं यत् अन्तिमानां राज्ञां वासभूमिः कामतास्थानं नास्ति। किन्तु ते राजानोऽपि साधारणतः कामतेश्वराः एव प्रत्यापाद्यन्त। अत एव सम्भवतः अर्चकैः हेमिल्टनमहोदयः न्यवेद्यत यत् इदं राज्ञः मन्दिरमस्ति अथवा स एव भ्रान्तः। प्रकृतस्थले महादेव्याः समीपं महादेवस्य स्थानस्य नियमोऽस्ति। अत एव कामतापुरेऽपि एवमे-वासीत् स्थितिः। अस्मिन् सम्बन्धे इदमुल्लेखनीयमस्ति यत् गोसामीमारी-स्थाने कामतेश्वरीमन्दिरस्य पार्श्वे अन्यत् चास्ति मन्दिरमेकं, तस्मिन् कामतेश्वरः स्थापितोऽभूत्।

अस्मिन् विषयेऽस्ति अन्यदपि एकं कथानकं यद् देव्याः नामान्तरं कामतेश्वरीति। 'कामा', 'कामदा', इव 'कामता' अपि नामान्तरं कामाक्षायाः देव्यारिति। यथा च—

कामदा कामिनी कामा कान्ता कामाङ्गदायिनी।
कामाङ्गनाशिनी यस्मात् कामाख्या तेन चोच्यते॥

—कालिकापुराण, ६२.२

कामाक्षादेव्याः मन्दिरे यथा कोचराजाणां तत्र दर्शनार्थं गमनं निषिद्धं वर्तते तथैव कामतेश्वर्याः स्थानेऽपि।

placcs being much rubbed'.[1]

जेनरलजेकिन्समहोदयेन यस्य ताम्रशासनस्य उल्लेखः कृतः सः अद्यापि अप्राप्त एव । अस्यां शासनावल्यां वर्णितयोः द्वयोः शासनयोः मध्ये धर्मपालस्य न एकमपि शासनं प्रमाणीभवति । अस्य अनुमानस्य कारणमिदं तत् प्रत्येकस्मिन् शासने श्रीणि फलकानि सन्ति, अक्षराणि नातीव सुस्पष्टानि । द्वितीये शासने नास्ति कस्यापि समयस्योल्लेखः ।[2]

यच्छासनं विनष्टम्, तस्य प्रदाता धर्मपालः एवं हर्षपालस्य पुत्रः धर्मपालः आसीत्, इदमपि न निश्चप्रचम् । यदि शासनमिदं कदापि आविष्कृतं भविष्यति तदा तस्य शासनस्य प्रदातुः पूर्वपुरुषाणां परिचये प्राप्ते एव अस्य प्रश्नस्य समाधानं भविष्यति ।[3]

---

१. Journal of the Asiatic Society of Bengal, Vol. 9, Part-II, p. 766.

२. जर्नल ऑफ दी एशिटिक सोसाइटी ऑफ बंगाल, खण्ड ९, भाग २, १८४०, पृ० ७६६.

३. जेकिन्समहोदयेन यत् शासनं धर्मपालस्योद्घोषितं तत् प्रायेण ५० वर्षान्तरं रत्नपालस्य द्वितीयं शासनं निर्धारयति । तस्य शासनस्य द्वेऽपि फलके कामरूपस्य ब्राह्मणानामधिकारे आस्ताम् । तस्याक्षराणि अतीव अस्पष्टानि बभूवुः । रत्नपालस्य प्रथमशासनस्य मुद्रायां तस्य नाम प्राप्यते । आसामप्रान्ते १०० वर्षपूर्वं धर्मपालेति पठनं नासीदसम्भव एव । रत्नपालस्य शासनप्रदानकरणस्य समयः अस्ति लिखितः—

'राज्ये सप्तविंशतिके तथा अणवी' ।

इत्येतदस्ति अस्पष्टम्, किन्तु तत् टिप्नपठनं नास्ति अस्वाभाविकम् । एते शब्दाः शासनदातॄणां राज्याब्दाः आसन् । जेकिन्समहोदयः इदमपि नाजानीत् । सः निबन्धेऽलिखत् यत् केन प्रकारेण तस्य शासनस्याध्ययनमकरोत् ।

'At the time it was first brought up, there was no person in the province who could read the inscription, but having given to a Pandit the alphabet of ancient forms of Sanskrit writing published by Mr. James Princep, to illustrate his discoveries, he was soon able to make out the inscription.' J.A.S.B., Vol. IX, Part II, p. 766.

शासनप्रदातारं धर्मपालं विहाय अन्यद्विसंख्यकधर्मपालयोरपि सूचना प्राप्यते। १८०९ ईसवीये वर्षे रंगपुरमण्डलस्य डिमिलरस्थानस्य समीपे एकस्य नगरस्य ध्वंसावशेषं दृष्ट्वा डॉ० बुकानन हैमिल्टनमहोदयेन लिखितं यत्—

'Dharmapāla's city—about two miles from a bend in the Tista—a little below Dimla (in Rangpur District) are the remains of a fortified city, said to have been built by Rājā Dharmapāla, the first king of the Pāla dynasty in Kāmrūpa. It is in the form of a parallelogram, rather less than a mile in length ....and about half a mile in breadth.........Dharmapāla had a sister-in-law, Mainävatī, the remains of whose fort still exist on the west bank of the Deonai river, about two miles west from Dharmapāla's fort............At some distance from the south of this existed a circular mound of earth called Haris Chandra Pal ....I have no doubt that this is a tank probably that of Hariścandra, whose daughter was married to Gopīcandra, the son of Mainävatī, and who succeeded his uncle Dharmapāla in his government'.[1]

प्राग्ज्योतिषः पुरस्याधीश्वरः पालवंशीयः धर्मपाल एवासीत्। अत्र नास्ति सन्देहः, अस्य परिचयविषये विवर्णितं यत् सः पालवंशीयः प्रथमः राजासीत्। मतमन्यदपि लभ्यते यत् अस्योत्तराधिकारी कोऽप्यन्यवंशीयः जातीयश्च गोपीचन्द्रः आसीत्।[2]

---

१. हण्टरमहोदयस्य स्टेटिस्टीकल एकाउण्ट ऑफ कुचबिहार नामकग्रन्थे, पृ० २६०-६२.

२. अस्य स्थानस्य मैनावती अथवा मैनामती तथा तस्याः पुत्रस्य गोपीचन्द्रस्य कथानकविषयेऽस्माकमिदमेव वक्तव्यं यत् त्रिपुरामण्डलेऽपि मैनावत्याः कथा प्रचलितास्ति। कुमिल्लानगरात् प्रायेण ३ क्रोश दूरं बहुमाडलनामकमस्ति नोत्तुङ्गः परन्तु विस्तृतः पर्वतः। मैनामत्याः उपाख्याने तत्र पर्वते गोपीचन्द्रेत्यादीनां वासभूमिः वर्णितास्ति। किन्तु प्रचलितमैनावत्याः कथायां धर्मपालस्य नाम नैव प्राप्यते। तथा च गोपीचन्द्रः धर्मराजविरुदेन विद्यते। 'मैनावतीर गान' नामकग्रन्थस्य सम्पादकः

जेनरलजेकिन्सः शासनलेखप्रेषणसमये एशियाटिक सोसाइटीसंस्थां यत् पत्रं लिखितवान् तस्मिन् पालोपाधिराजाणामेका तालिकास्ति, तस्यामेकः धर्म्मपालोऽपि अस्ति ।[1] धर्मपालस्त नाम सर-एडवर्डगेटमहोदयस्य 'आसामस्य इतिहासः' ग्रन्थेऽपि उपलभ्यते, सः लिखितवान्—

A Kṣatriya, named Dharmapāla, it is said, came from the west and founded a kingdom.[2]

अत्र नास्ति कोऽपि सन्देहः यत् धर्मपालोऽयमुपर्युक्तपालवंशीयः कोऽपि राजा नासीत् । तस्य विवरणे सत्यस्यास्ति न्यूनतातीव । मया पूर्वमेव जयपालस्य उल्लेखः कृतः, सः जयपालः शासनत्रयस्य प्रदातुः धर्मपालस्य पुत्रः पौत्रो वा भवेत् एवं अनुमातुं शक्यते । सिलीमपुरात् प्राप्ते ताम्रशासने प्रहासनामकस्य एकस्य ब्राह्मणस्य प्रशंससावादोऽस्ति तथा च तस्य निर्लोभतानिदर्शनं प्रतिपादितमस्ति यत् सः कामरूपस्य राज्ञः जयपालस्य तुलादानस्योपलक्ष्ये प्रदत्ताः नवशतस्वर्णमुद्राः तथा च दशसहस्रधान्योत्पादिकां भूमिं अनुरोधकरणे अपि नाग्रहीत् ।[3] कामरूपे पालवंशस्य प्रथमपुरुषब्रह्मपालादारम्य धर्मपालं

डॉ० नलिनीकान्तभट्टशालीमहोदयः तस्य ग्रन्थस्य भूमिकायां उपर्युक्तधर्मपालस्य विषये अलिखत् यत् सः गौडाधिपतिपट्टिपालस्यात्मीयः एवं तत्प्रतिनिधिरूपेण दण्डभुक्तौ शासनमकरोत्, इदं सम्भवाव्यतेऽपि । परन्तु डॉ० हेमिल्टनमहोदयः यस्य धर्मपालस्य नगरस्य वर्णनमकरोत्, तत् करतोयानद्याः पूर्वमेवास्थितमासीत् एवं प्रतिभाति । करतोया बहुसमयपश्चादपि कामरूपस्य राज्यस्य पश्चिमी सीमा आसीत् । गौडराजधर्मपालः कामरूपस्य सीमां आगत्य नगरं स्थापितवान्, इदं न सम्भाव्यते ।

१. जर्नल ऑफ एशियाटिक सोसाइटी ऑफ बंगाल, १८४०, भाग ९, खण्ड २, पृ० ७६६, अस्यां तालिकायां ब्रह्मपालादीनां केषामपि नामानि नैव दत्तानि । अत्र धर्मपालस्यानन्तरं जयपालस्य एवं हरिपालस्योल्लेखोऽस्ति । अतः अस्य शासनस्य प्रदाता कदापि धर्मपालः नैव भवितुं शक्यते ।

२. हिस्ट्री ऑफ आसाम, १.१७.

३. सिलीमपुरशासनम्, श्लोकः २२, एपिग्राफिका इण्डिका, भाग १३, पृ० २९२.

यावत् राज्ञां या तालिका तत्र कश्चिदपि एवमवकाशः नास्ति यत् तस्मिन् जयपालस्य परिगणनं भवेत् । अत एव अयं जयपालो धर्मपालस्य पुत्रः पौत्रो वा एव स्वीकृतः । किन्तु स्थलमिदमपि निर्विवादं नास्ति । अस्यानुशासन-स्यालोचकः राधागोविन्दवसाकमहोदय सिलीमपुरलिपेः अक्षरसमूहस्याध्यय-नानन्तरं ११ ईसवीयशते तदर्थं निर्धारितवान् । किन्तु पालवंशीयानां राज्ञां वंशतालिकायां धर्मपालस्य समयः ११ शतकस्य प्रथमार्धः स्वीक्रियते । परंतु लिपिशास्त्रानुसारं कस्यापि समयनिर्धारणमसंगतं प्रतीयते । अत्र शताब्दीनां प्रथममन्ते वा इति नैव आश्चर्यकारकम् । डॉ० हार्लेमहोदयस्य मतानुसार प्राचीनलिपिविद्भिः बलवर्मणः समयः दशमशतकस्यान्तिमो भागः निर्देशितः । किन्तु यथापूर्वमेव प्रतिपादितं यत् हर्जरवर्मणः पाषाणलिपेः आविष्कारात्

यः कामरूपनृपतेर्जयपालदेवनाम्नास्तुलापुरुषदातुरचिन्त्यधाम्नः ।
हेम्नां शतानि नव निर्भरमथ्यमानो नैवाददे दशशतोदयशासनं च ॥

अस्याः लिपेः व्याख्याता डॉ० राधागोविन्दवसाकः 'दशतोदयशासनस्य' व्याख्यायामकथयत् यत्

A season yielding an income of thousand coins.

किन्तु कामरूपशासनावल्यां सहस्रोत्पत्तिद्वारा सहस्रद्रोणधान्योत्पादक-भूभागः प्रतिपादितः । किन्तु वर्तमान परिमाणे कति प्रमाणं धान्यं भविष्यति, अस्य निर्णयः क्लिष्टतरः । एवमनुमीयते यत् मानदण्डमिदं द्रोणः एव भविष्यति । यतः अद्यत्वेऽपि कामरूपे धान्यादीनां परिमाणे द्रोणशब्दस्य प्रयोगः समुपलभ्यते । किन्तु तस्मिन् समये द्रोणस्य किं मानमः आसीत्, अत्रास्ति सन्देहः । संस्कृतभाषायां द्रोणस्य परिमाणं ३२ शेरटकं (सेर) इति शब्दकल्पद्रुमे । निर्णयसागरयन्त्रालये प्रकाशिते अमरकोशस्य टीकायां द्रोणस्य त्रिप्रकारकं मानं प्रदर्शितं टीकाकारेण—१. द्रोणमित्येकं सेर इति ख्यातम्, २. शब्दकल्पद्रुमे तु प्रस्थमित्येकं सेर इति ख्यातम्··· चतुर्थप्रस्थम् ।·····················तथाणकम्················अष्टाणको भवेद् द्रोणः, ३. चतुराणको भवेद् द्रोण इत्यनेन मान-लक्षणम् । अनेन द्रोणस्य १६ सेरमानं प्रमाणीभवति । शब्दकल्पद्रुमे द्रोणशब्दस्य स्थाने उपर्युक्तं ३२ सेर लिखितमपि आणकशब्दस्य स्थानेऽस्ति, द्रोण चतुर्थभागः·········· व्यवहारे षोडशं सेरः । अनेन प्रमाणीभवति यत् दोणः ३४ सेरस्य ८० सेरस्य वा भवेत् ।

बलवर्मणः समयः किंचित् पुरःसरति। इन्द्रपालस्य द्वितीयशासनस्य अन्तिमे फलके उल्लिखितविषयाणां चित्राणां च आधारे इदमद्भुतं ताम्रशासनमिति तद्वेतृभिः प्रमाणितम्। तस्य प्रथमस्य फलकस्याक्षराणां शेषफलकयोरक्षरैस्तुलनात्मकयालोचनयेदं प्रमाणितं यत् प्रथमफलकस्य लिपेः शेषद्वयोरपेक्षयास्ति किंचित् स्वातन्त्र्यम्। अस्मिन् उत्कीर्णाक्षरमात्रा शून्यगर्भाधोमुखत्रिकोणाकारा दृश्यते। अन्ययोः द्वयोः फलकयोः अक्षराणि किंचिद् लम्बाकाररेखासूक्ष्माकारस्पष्टाणि दृश्यते, अतः एतानि सारल्येनैव पठितुं शक्यन्ते। एवंप्रकारायाः लिपेः भंगिमा परवर्तिकालीनेषु धर्मपाललेखेषु न प्राप्यते। किन्तु वैद्यदेवस्य ताम्रशासनस्य लिप्यामक्षरमात्रास्तथैव त्रिकोणाकाराः सन्ति। वैद्यदेवः इन्द्रपालात् प्रायः ५० वर्षपश्चादभवत् एवं सम्भवतः धर्मपालस्य काले लब्धजनिः आसीत्। असंभावना तु नास्त्येव यत् पुत्रः शिष्यः गुरोः हस्ताक्षरानुकरणं कुर्यात्। सिलीमपुरलेखशिल्पी मागधः आसीत्, अत एव तस्य हस्ताक्षरं किंचित् प्राचीनं परम्परागतं। चोभवत्। स्थानभेदतः लिपेर्भेदस्तु भवत्येव।

जयपालस्य नाम एकस्यामन्यलिपावपि प्राप्यते। ईण्डिया आफिससंस्थायां छान्दोगपरिशिष्टप्रकाराशीर्षकमेकं पाण्डुलिपिपुस्तकं संरक्षितमस्ति, तस्यां निम्नांकितः श्लोकोऽस्ति—

'तस्माद्भूषितसाग्धिभूमिवलयः शिष्योपशिष्यव्रजै-
विद्वन्मौलि रभूदुमापतिरिति प्राभाकरग्रामणीः।
क्ष्मापालाज्जयपालतः स हि महाश्राद्धं प्रभूतं महा-
दानं चार्थिगणार्हणार्द्रहृदयः प्रत्यग्रहीत् पुण्यवान्॥'[1]

अत्रोमापतेरुल्लेखो वर्तते, सम्भवतोऽयमेवोमापतिधरोऽस्ति। स विजयसेनदेवपारा-प्रशस्तिनिर्माणमकरोत्।[2] तथा च तत्पौत्रलक्ष्मणसेनः सचिवोऽवर्तत। त्रयोऽपि राजानः ये समकालीनाः आसन् ते दीर्घजीविनः आसन्, अत्र नास्ति कोऽपि सन्देहः। विजयसेनपुत्रवल्लालसेनराजत्वकालः ११५६-११६९ ईसवीयवर्षाणि आसन्। अनेन विजयसेनस्य कालः ११शतकस्य मध्यभागस्तथा च लक्ष्मणसेनस्य राजत्वकालः तस्मिन् एव शतकस्यान्तिमभागे निर्देष्टुं शक्यते। जयपालो यदा उमापतये महादानमदात् तदा उमापतिः "भूषित-

---

१. इपि० इण्डिका, भाग १३, पृ० २८९.

२. येषां कवेः पदपदार्थविचारशुद्धबुद्धेरुमापतिधरस्य कृतिः प्रशस्तिः— एन० जी० मजुमदार, इन्स्क्रिप्शन ऑफ बंगाल, खण्ड ३, पृ० ४९.

साध्यभूमिवलयः शिशोऽपि शिष्यविद्वन् मौलिः" कश्चित् प्रौढवयस्क आसीत्। अतः महादानं १२ शतकस्य उत् १३ शतकस्य तृतीये पादे गृहीतं भवेत्। वार्तेयमसंगता नैव प्रतीयते। अत एव जयपालस्य राजत्वकालेऽपि तथैव स्यादेवं वक्तुं शक्यते। अत एव धर्मपालस्य पुत्रः पौत्रो वा इति प्रत्यपाद्यत[1]। द्वयोः लिप्योः मध्ये दृश्यते यत् कामरूपस्य राजा जयपालः आसीत् कर्मनिष्ठो धर्मशीलश्च। तस्य पिता अथवा पितामहः धर्मपालः दानशीलश्चासीत्। तस्य तुलापुरुषदानेन ज्ञायते यत् सः समृद्धिशाली भूपतिरासीत्। सीलीमपुरशासने २२ श्लोके जयपालस्य विशेषणरूपेण 'अचिन्त्यधाम्नः' इति उल्लिखितमस्ति, अनेन तस्यातीव तेजस्विता सूच्यते।[2]

---

१. छान्दोगप्रकाशपरिशिष्टोद्धृतजयपालसम्बन्ध्युपरितनश्लोके उमापतेः नाम्ना सह धरोपाधेरभावात् किमयं सुविख्यातोमापतिधरः आसीत् नवात्रास्ति सन्देहस्थानम्। अत्रोत्तररूपेण वक्तुं शक्यते यत् धरशब्दोऽयं केवलं लौकिकोपाधिमात्रमेव न तु नाम्नोंऽशः। रायसाहबश्रीनगेन्द्रनाथ-वसुमहोदयस्य प्राच्यविद्यामहार्णवस्य संकलितः। 'वंगेर जातीय इतिहास' द्वितीयभागः, ब्राह्मणकाण्डम्, तृतीयांशः, पृ० २०० द्रष्टव्यः, अत्रोल्लिख्यते यत् अस्य देशस्य दाक्षिणात्यवैदिकगणेषु घृतकौशिकगौतमगोत्रौ श्रेष्ठौ कुलीनौ च स्तः, तथा च अनयोर्धरोपाधिरस्ति। अस्मिन् प्रसंगे उक्तः विद्वान् विस्तृतरूपेण उमापतिधरस्य सम्बन्धे विशेषालोचनामकरोत्। तथा इदं सिद्धान्तितम् यदुमापतिधरः दाक्षिणात्यवैदिकश्रेण्याः श्रेष्ठः ब्राह्मणः आसीत्।

२. अत्रास्योल्लेखोऽतीवावश्यकः प्रतीयते यत् केऽपि विद्वांसः जयपालं गौडाधिपतिदेवपालस्य कनिष्ठं भ्रातरं स्वीकुर्वन्ति, तथा च कामरूपराज्यविस्तार-वार्ता नारायणपालस्य ताम्रशासने उल्लिखिता इत्यपि स्वीकुर्वन्ति। अस्मिन् विषये डॉ० राधागोविन्दवसाकमहोदयेन यल्लिखितम् 'इपि० इण्डि० खण्ड १३, पृ० २९०' तदस्ति अतीव समीचीनम्। जयपालस्य कामरूपाधिपतिरुपा सम्भावना पृथगेवास्ति, अस्य नामान्तरस्य क्षमा-पालस्यापि प्रामाण्यं नोपलभ्यते। नारायणपालशासनस्य एतत् सम्बन्धि-न्याम् अनुवादव्याख्यायां अक्षयकुमारमैत्रेयमहोदयेन लिखितं यदनेन प्राग्ज्योतिषः राजभिः सह सन्धिबन्धनस्य परिचयोऽधिगम्यते। अतः जयपालः कामरूपस्य राज्याधिकारविषये मौन एव। सिलीमपुरशासनो-

राजधान्याः दुर्जयायाः वर्णने किमपि स्यात् परन्तु रत्नपालस्य राजत्वकाले कामरूपस्योपरि कस्यापि विजिगीषोर्वर्णनं नोपलभ्यते। किन्तु ततः परवर्तिकालीनराजेन्द्रपालस्याथवा तत्पुत्रहर्षपालस्य समये सम्भवतः चालुक्यवंशीयः राजकुमारः कर्णतेन्दुविक्रमाङ्कः स्वपितुः राजत्वकाले १०४०-१०७१ ईसवीयवर्षेषु दिग्विजयस्योपलक्ष्ये कामरूपस्य राजानमजयत्। अस्मिन् सम्बन्धे बिल्हनेन विरचिते विक्रमांकदेवचरिते गायन्ति स्म गृहीतगौडविजयस्तम्बेरस्याहवे—

गायन्ति स्म गृहीतगौडविजयस्तम्बेरमस्याहवे
तस्योन्मूलितकामरूपनृपतिप्राज्यप्रतापश्रियः।
भानुस्यन्दनचक्रघोषमुषितप्रत्यूषनिद्रारसाः
पूर्वाद्रेः कटकेषु सिद्धवनिताः प्रालेयशुद्धं यशः[1]॥

अनेनाक्रमणेन कामरूपस्य कापि क्षतिरभवदिति न प्रतीयते। विक्रमपुरस्य राज्ञः भोजवर्मणो बेलवांताम्रशासनलिप्यां तस्य पितामहस्य जातवर्मणः सम्बन्धे १२ तमः श्लोकः उल्लिखितोऽस्ति यत्—

गृह्णन् वैण्यपृथुश्रियं परिणयन् कर्णस्य वीरश्रियम्,
योऽङ्गेषु प्रथयच्छ्रियं परिभवंस्तां कामरूपश्रियम्।
निन्दन्दि व्यभुजश्रियं विकलयन् गोवर्द्धनस्य श्रियम्,
कुर्वन् श्रोत्रियसाच्छ्रियं विततवान् स्वां सार्वभौमश्रियम्॥[2]

अत्रास्ति केषाञ्चिद् विदुषां सम्मतं यत् जातवर्मा कामरूपमजयत् उक्तश्लोकादुक्तजयः न प्रमाणितो भवति। अस्मिन् श्लोके 'अग', 'कामरूप' शब्दयोरस्ति श्लेषः। तथा च तस्य तात्पर्यं निर्गच्छति यत् तस्य सौन्दर्यं कामरूपं जितवान् अर्थात् स अतीव स्वरूपसम्पन्नः सुन्दरश्चासीत्[3]। अत एव जातवर्मणा काम-

---

लिखितो जयपालः कामरूपस्य एव राजासीत्। अतः तस्य यच्छासनदानं प्रहासेन ब्राह्मणेन नागृह्यत तद् दशशतोदयविशेषितमासीत्। भूमिपरिमाणे 'एतद्धान्तोत्पादिकाभूमिः' एवं वाक्यं बलवर्मणः आरभ्य पालवंशीयानां राज्ञां कालं यावत् सर्वेषु शासनेषु प्राप्यते। कामरूपस्य गौडशासकानां शासनेषु वैशिष्ट्यमेतद् 'एतादृशसहस्रधान्योत्पत्तिकभूमिः' नोपलभ्यते दानविषयकमद्ययावत्।

१. विक्रमांकदेवचरिते, ३.२४.

२. एन०जी० मजुमदार, इन्स्क्रिप्सन ऑफ बंगाल, भाग ३, पृ० २०.

३. श्लेषमूलकसार्वभौमतायारुदाहरणान्तरम्, नेपालराजदेवस्य यस्याः

रूपविजय निराधारः एव प्रतिभाति। गौडराजरामपालेन कामरूपस्य विजय-सम्बन्धिनी कथा सन्ध्याकरनन्दिना लिखितस्य 'रामचरित' ग्रन्थस्यानेकेषु स्थलेषूपलभ्यते।[1] अस्मिन् काले कामरूपस्य दक्षिणपश्चिमभागः प्रायः गौडराजेणाधिकृतो भवेत्। वज्रदेवस्य शासनेन ज्ञायते यत् वरामपालपुत्र-कुमारसमये यः पूर्वदेशे शासकः नियुक्तोऽभवत्, सः विनज्ञदेवः पश्चात् राजद्रोही अभवत्, तथा च वैद्यदेवः तस्मिन् प्रदेशे नरेश्वररूपेण प्रतिष्ठितो-ऽभवत्।[2] अत्र कामरूपस्य प्राग्ज्योतिषः राज्ञः नाम नास्ति, केवलं प्राच्य-स्थितस्य भूभागस्य वर्णनमेवास्ति। अनेनैवं प्रतीयते यदयमंशः गौडराज्य-स्यान्तर्गतः अभूत्। किन्तु यस्याः प्रदत्तायाः भूमेः वर्णने प्राग्ज्योतिषभुक्तेस्तथा कामरूपमण्डलस्योल्लेखोऽस्ति[3] सः भूमिभागः प्राग्ज्योतिषः राज्ये एवासीत् एतदेव वर्णनमुपलभ्यते। शासने यस्मै भूमिरदीयत, तस्य ब्राह्मणस्य पुरुषानु-क्रमेण विरेन्द्रीस्थानस्य भावग्रामे निवासस्थानमासीत्।[4] भावग्रामतः भावतानाम्ना प्रसिद्धिरभवत्। इदं वर्तमानवगुणानगरस्य प्रायः ११ क्रोशे दक्षिणभागे प्राचीनकरतोयानद्याः पश्चिमे तटेऽवस्थितमासीत्।[5] प्रदत्ता भूमिः निश्चितरूपेण करतोयानद्याः पूर्वप्रान्ते भावग्रामस्य निकटे वर्तमानासीत्। अतः अस्माकं मते वज्रदेवः यमशं शास्ति स्म एवं यमशं रामपालः युद्धे जिगाय,

---

प्रस्तरलिपेः प्रथमश्लोकस्य उल्लेखः पूर्वमेव कृतस्ततः एवं श्लोकान्तर दृष्यते—

अङ्गश्रिया परिगतो जितकामरूपः काञ्चीगुणाढ्यवनिताभिरुपास्यमानः।
कुर्व्वन् सुराष्ट्रपरिपालनकार्य्यचिन्तां यः सार्व्वभौमचरितं प्रकटीकरोति ॥
—इण्डियन एण्टीकवेरी, भाग ९, पृ० १७९.

१. तस्य जितकामरूपादिविषयविनिवृत्तमानसम्पाद्यः।
महिमानमाप स नृपो यतमानस्य प्रजाभिरक्षणार्थम् ॥ ३.४७
........................विग्रहनिर्जितकामरुपभृत्, ४.५

२. एतादृशो हरिहरिद्भुवि सत्कृतस्य श्रीतिमग्यदेवनृपतेर्विकृतिं निशम्य।
गौडेश्वरेण भुवि तस्य नरेश्वरत्वे श्रीवैद्यदेव उरुकीर्त्तिरयं नियुक्तः॥
गौडलेखमाला, पृ० १३१

३. वैद्यदेवस्य शासनम् ४८-४९ पंक्तिः, गौडलेखमाला, पृ० १३४.

४. तत्रैव, श्लोकः २२-२८, तत्रैव, पृ० १३३-३४.

५. बगुणारा इतिहास, पृ० ११२.

सः भूभागः निश्चितरूपेण कामरूपस्य दक्षिणपश्चिमदिश्यासीत्। रामपालः १२ शतकस्य प्रथमार्धे राज्यमकरोत्, इति सापेक्षविचारः। किन्तु सर्ववादि-सिद्धान्तोऽयं यत् सः ११ शतकस्यान्तिमे भागे अभवत्।[1] अतोऽयं कामरूप-विजयस्तस्यायुषोऽन्तिमेऽभागेऽभवत्।

धर्मपालस्य प्रथमशासने यस्मै भूमिदानमभवत् तस्य निवासस्थानं श्रावस्तीजनपदस्यान्तर्गतमासीत् बगुडामण्डलस्यान्तर्गतसिलीमपुरताम्रशासन-मुपलब्धम्, तस्मिन् यस्य ब्राह्मणस्य प्रशंसा विद्यते तस्य ब्राह्मणस्य पूर्वपुरुषाणां निवासस्तस्याः श्रावस्त्याः एवान्तर्गतेऽन्यस्मिन्नैवैकस्मिन् ग्रामे आसीत्। ते सकटव्यवधानात् बालग्राममागच्छन्, तत्पश्चान्निकटवर्तिशीयम्बग्रामेऽन्य-वसन्। अद्यापि बालग्रामः 'बोलगांव' नाम्ना प्रसिद्धोऽस्ति एवं च शीयम्ब-ग्रामः 'सिलीमपुर' नाम्ना। द्वावपि ग्रामौ कामरूपराज्यसीमास्थितश्रावस्ती-जनपदान्तर्गतौ स्तः।[2] बगुडानगरात् तयोरन्तरमनुमानतः १० अथवा १२ क्रोशाः एव।[3] अतः कामरूपेऽवस्थितश्रावस्तीजनपदमपि बगुडानगरात्

---

१. अस्मिन् विषये राखालदासवनजीमहोदयस्य "Pālas of Bengal" ग्रन्थोऽवलोकनीयो वर्तते। राखालदासबनर्जी "Pālas of Bengal" Chapter IV, Rāmapāla Deva was succeeded by his second son Kumārapāla about the year 1894 A.D.

२. सकट्याः अर्थः सम्भवतः एकस्मिन् सकटे (एकस्मिन् दिवसे) यावद् गमनं स्यात् तावद्दूरम्। सम्प्रति 'बगुडार इतिहास' ग्रन्थे लिखितमस्ति यत् भरद्वाजगोत्रियवारेन्द्रब्राह्मणानां एको ग्रामआसीत् सकटी। अतः श्रावस्तीग्रामात् वालग्रामस्य दूरं स्वल्पमेवासीत्।

३. यत्कामरूपराज्यांशः गौडराजेण विजितः आसीत् तस्यायतनं नितान्तं आसीत् क्षुद्रम्। यतः एतदर्थं नृपतिः नरेश्वरो वा इत्युपाधिधारिणः कस्यापि स्वतन्त्रशासनकर्तुर्नियुक्तेरावश्यकता नासीत्। अस्य भागस्य पूर्वस्यां दिशि अस्य परिधिरधिका नासीत्। विस्तारो मुख्यतः उत्तरस्यां दिशि आसीत्, यतः दक्षिणदिगपि पूर्वदिगेव सीमितैवासीत्। पूर्वोक्तमावग्रामतः शीयम्बपुरस्य अथवा सिलीमपुरस्य दूरं २० अथवा २५ क्रोशं यावत् स्यात्। अतः करतोयानद्याः अस्मिन् तटे स्थितायाः भूमेः दैर्घ्यमपि अपरिमितमेवासीत्। तस्मिन् समये गौडराजः श्रावस्तीजनपदस्योपरि अधिकारमकरोत् एवं कल्पना न समीचीना वर्तते।

प्रायः तस्मिन्नेव व्यवधाने स्थितमित्यनुमीयते। अत एव कामरूपस्य दक्षिण-पश्चिमभागं रामपालः स्वराज्ये सम्मिलितमकरोत्। श्रावस्ती सम्भवतः तस्यान्तर्गता आसीत्। अत एव श्रावस्तीप्रांचलनिवासिने हिमांगाय प्रथम-शासनस्य भूमिदानमभूत्। अनेन ज्ञायते यत् तत्कालं यावत् रामपालः काम-रूपस्य कमपि भागं नैव आयत्तीचकार।[1]

इदमेवानुशासनं धर्मपालस्य राज्यस्य तृतीये वर्षे प्रदत्तमभवत्। मुख्यतः धर्मपालस्य राज्यकालः १२ शतकस्य प्रथमो भागोऽस्ति, तथापि तस्य सिंहासनारोहणस्य समयः ११ शतकस्यान्तिमो भागः इति निर्देष्टुं शक्यते। यदि तत् तस्यैव शतकस्य प्रारम्भः कालः स्वीक्रियेत तर्हि १०९४ अथवा १०९५ ईसवीये वर्षे कामरूपो विजितोऽभूत्। रामपालस्य मृत्योः पूर्वमेवेदं सर्वं सम्पन्नमभवत्।

कुमारपालस्य राजत्वकालः १२ ईसवीयशतकस्य प्रथमभागे एवं तस्यामात्यस्य वैद्यदेवस्य स्थितिः तत्कालं यावदेव। केऽपि वज्रदेवमपि कामरूपस्य राजानम् कथयन्ति। किन्तु तस्य काले धर्मपालः प्राग्ज्योतिषो-ऽधीश्वरः आसीत्। वैद्यदेवः गौडदेशस्यान्तर्गते एकस्मिन्नंशे शासनं अकरोत्। अतः वज्रदेवः स्वशासने 'महाराजाधिराजपरमेश्वरपरमभट्टारक' इत्यादि-विरुदधारकः आसीत्। अतः सः स्वाधीननृपतिरासीत् इति वक्तुं शक्यते। सः गौडराजकुमारपालस्य अत्यन्तप्रियभाजनमासीत्। अत एव सम्भवतः गौड-राजः एवंभूतोपाधिधारणार्थमनुमतिमददात् तस्मै। अथवा सम्भवतः कुमार-पालस्य मित्रत्वात् वज्रदेवः तच्छासने स्वतन्त्रोऽभवत् तथा च तस्मिन् समये एव शासनं प्रदाय स्वाधीनतां प्रमाणीकरोति स्म।

वज्रदेवः अथवा तस्यानुगाः राजानः बहुदिवसान् यावत् कामरूप-स्यांशे स्वस्वत्वं नैवारक्षन्। यतः तस्मिन् काले पालवंशीयानां राज्ञां पतना-वस्था एवं च सेनवंशीयानां राज्ञामुन्नतेरवस्था आसीत्। कामरूपस्य राजानः शेषांशस्योद्धाराय कृतप्रयत्ना आसन्। संभाव्यते यत् कश्चिदंशः कामरूपे आगतः स्यादथवा सेनराजभिः अधिकृतः स्यात्। यत् किमपि स्यात् परन्तु देवपारालेखानुसारम् अस्य राज्यस्य कारणात् संभवतः सेनराजविजयसेनेन सह कामरूपस्य राजा युयुधे।

---

१. सम्भवतः तस्मिन्नेव समये गौडाधिपतिना सह युद्धमासीत्। रणपटुः हिमांगो वीरत्वप्रदर्शनद्वारा सम्भवतः तादृशं पुरस्कारं लब्धवान्।

गौडेन्द्रमद्रवदपाक्

भूपं कलिंगमपि यस्तरसा जिगाय।[1]

विजयसेनः ईसवीयशतकस्य १२ मध्ये राज्यं कुर्वन् आसीत्। अस्मिन् समये सम्भवतः विजयसेनस्य कामरूपविजयस्य समये धर्मपालः यदि स्वयं राजा नाभूत् तर्हि तस्य पुत्रः पौत्रो वा कामरूपस्य राजा आसीत्।[2]

---

१. ननीगोपालमजुमदारः, इन्स्क्रिप्शन ऑफ बंगाल, भाग ३, पृ० ४८.

२. अद्य यावदुपलब्धप्रमाणैः न ज्ञायते यत् तस्मिन् समये कामरूपस्य कः नरपतिरासीत्। राखालदासबनर्जीमहोदयस्य मतानुसारं तदा बल्लभदेवस्य पितामहरायारिदेवत्रैलोक्यसिंहः सम्भवतः कामरूपे राज्यविस्तारं न कर्त्तुं शक्नुयात्, बल्लभदेवस्य पितामहोऽथवा तस्य कोऽपि पूर्वपुरुषः कामरूपे राज्यविस्तारमकरोत्, अत्र नोपलभ्यते किमपि प्रमाणम्। बल्लभदेवस्यैकं शासनमासामप्रदेशस्य तेजपुरे केनापि अभियन्त्रा (इन्जिनियर) लब्धम्। सः तद् एशियाटिकसोसाइटिसंस्थायामप्रेषयत्। अस्य विषये संग्रहः आसामप्रदेशेऽभवत्, परन्तु आसामस्य कस्मिन् स्थानेऽमिलत् अस्य विषये निबन्धकारः कीलहार्णमहोदयः मौनी एव। ताम्रशासनमेकं एतादृशं वस्तु यन्नीत्वा दूरं गन्तुमपि सम्भाव्यते। यथा वज्रदेवस्य ताम्रशासनं वाराणस्याः समीपे प्राप्तम्। बल्लभदेवस्य शासनस्य विषये सम्प्रति एकद्विनिबन्धाः प्राप्यन्ते, यैः प्रमाणप्राप्त्यर्थं चेष्टाभवत् किन्तु वल्लभदेवः कामरूपस्य राजकुमारः नासीत्। सम्भवतः सः पश्चिम-दक्षिण सीमायाः समीपे पूर्वीयवंगदेशस्य समीपस्थितस्य कस्यापि एकस्य लघुराज्यस्य शासकः आसीत्। शासने प्राग्ज्योतिषः कामरूपस्य राज्यस्योल्लेखोऽपि नास्ति। किन्तु वंगराजेण सह युद्धस्य कथानकस्योल्लेखोस्ति तच्छासनलिपिपर्यालोचनया स्पष्टं प्रतीयते यत् वंगनगरपतिशासनलिप्या पद्धत्या च सह अस्याः सादृश्यं विद्यते, कामरूपराजशासनलिप्या पद्धत्या च सह न दृश्यते। बल्लभदेवः ११८६ ईसवीये वर्षे शासनप्रदानमकरोत्, तस्य पितामहः भास्करोऽवश्यमेव १२ शतकस्य प्रथमभागे रायारिदेवस्तच्छतकस्य मध्यभागे जीवन्नासीत्। तस्मिन् समये धर्मपालतो जयपालं यावत् एते एव कामरूपस्य राजानः आसन्। अतः भास्करोऽथवा तस्य वंशस्य उत्तरपुरुषः कथं कामरूपं शासितुं शशाक। सर एडवर्डमहोदयः १८९९ वर्षे 'एपिग्राफिया-इण्डिका' पुस्तके प्रकाशिते ("Assam Plates

विजयसेनपौत्रलक्ष्मणसेनोऽपि कामरूपभूपान् विजिगाय। तत्र प्रमाणमिदम्—

'विक्रमवशीकृतकामरूपम्[१]।'

यद्ययं जयलाभः लक्ष्मणसेनराजत्वप्रथमभागेऽभवत् तर्हि तदा कामरूपभूपजयपालो भवेत्, एवमनुमीयते। अत्र विशेषोऽयं यत् जयपालस्यानन्तरमन्यस्य कस्यापि पालोपाधिधारिणः कामरूपभूपस्योल्लेखः कामरूपस्थलस्यान्यस्थलीयताम्रप्रशासनशिलालेखेषु नैवोपलभ्यते। परन्तु पालोपाधिधारिबहुराजैः बहुदिवसेषु राज्यमक्रियत एतत् सम्बन्धीनि अनेकानि प्रमाणान्युपलभ्यन्ते।

जेनरलजेकिन्समहोदयः एशियाटिकसोसाइटिसंस्थायामेकं पत्रमददात् येन प्रतिभाति यत् पालोपाधिधारिभिः अनेकैः राजभिः कामरूपे शासनमक्रियत। जेकिन्समहोदयः कस्यापि स्थानीयब्राह्मणस्य गृहे एकं प्राचीनतमैतिहासिकं पुस्तकमपश्यत् यस्मिन्ननेकपालोपाधिधारिनरपतीनां नामान्यासन्। तेषां समेषां राज्ञां विषये सोऽलिखत्—"There are the names given in page 117 of Prinsep's Tables, but in a different order; but no further notice is taken of any of the Pala race."[2]

किन्तु तेषां राज्यं पश्चिमदिशि करतोयायाः उत्तरांशं यावद्विस्तीर्णमासीत्।

अस्मिन्नेव समये १२०६ ईसवीये यदा विहारवंगदेशयोर्विजेता मुहम्मद-वक्तियार-अली-खिल्जी विशालसैन्यशक्त्या कामरूपं प्राविशत् तदा तस्य सम्पूर्णसैन्यशक्तिस्तत्र विनष्टप्राया एवाभवत्। तथा च सः येन केनप्रकारेणात्मानं जीवितं प्रत्यावर्तत। अस्याः घटनायाः सम्बन्धिनी एका स्मारकलिपिः 'कानाइबडसी' नामकस्थाने पाषाणशिलायामुत्कीर्णा समुपलभ्यते "शाक ११२७"।

---

of Ballabha Deva") बल्लभदेवसम्बन्धिनिबन्धं विरच्य एतत् सर्वं प्रकाशितवान्, किन्तु तेनाऽपि 'हिस्ट्री ऑफ आसाम' स्वग्रन्थे तस्योल्लेखः न कृतः। सम्भवतः सः अवगच्छति स्म यत् बल्लभदेवः आसामप्रदेशस्य नरपतिरेव नासीत्।

१. ननीगोपालमजुमदारः, इन्स्क्रिप्शन ऑफ बंगाल, भाग ३, पृ० १११.

२. जर्नल ऑफ दी एशियाटिक सोसाइटि, १८४०, भाग ९, खण्ड २, पृ० ७६७.

"शाके तुरगयुग्मेशे मधुमासत्रयोदशे ।
कामरूपं समागत्य तुरुष्काः क्षयमाययुः[1] ।।

अस्यां १२०६ ईसवीयवर्षस्य २७ मार्च तिथिरङ्किताऽस्ति, केवलमस्मिन् प्राथमिके आक्रमणे यवनाः किंचिद् विनाशकार्यं न कर्त्तुं पारयामासुः । अतोऽग्रे ते कामरूपं वारंवारमाक्रमन्ते स्म, किन्तु ते कस्मिन्नपि समये अस्य राज्यस्य कमपि भागं स्वाधिकारे दीर्घकालं यावत् नैव स्थापितवन्तः[2] ।

नासीदेवं यद् यवनानामाक्रमणैः कामरूपराज्यष्य क्रमशोऽधःपतनं अवश्यमेवाघटत । अतः पश्चात् अनेकैः राजभिः ब्रह्मपुत्रतटे राज्यमक्रियत, तेषां कथानकं योगिनीतन्त्रग्रन्थे किंचिदुपलभ्यते, विशेषतया कोचजातीयानां अहोमजातीयानां राज्ञामुत्पत्तिविषयकमिति ।[3] तस्मिन् पूर्वोक्ते द्वादशतमे पटले 'शकाव्द' इति निर्देशोऽस्ति एवं च कतिपयानां घटनानामुल्लेखो वर्तते । परन्तु नास्ति कोऽप्यर्थोऽस्य वृत्तस्य । अस्मिन् समये 'चुटिया काछाडी'—अहोम—कोच इत्यादयः ब्रह्मपुत्रस्य तटे निवासिन्यो जातयः परस्परं विवदन्ते

---

१. गोहाटीनगरपूर्वभागे उत्तरब्रह्मपुत्रस्य तटे प्रायः क्रोशार्धदूरं एका लिपिरुपलभ्यते स्म, यस्याः नाम 'कानाइवडसीबोया' अस्ति । अस्याः नामकरणविषये स्थानीयप्रवादोऽस्ति यत् भगवता श्रीकृष्णेनात्र मत्स्योऽगृह्यत । किन्त्वत्र वास्तविकतेयमस्ति यदस्मात्स्थानादेकक्रोशदक्षिणपश्चिमगोहाटीनगरम्, ततो ब्रह्मपुत्रस्य पश्चिमोत्तरतटे 'अश्वक्लान्तः' नामकः तीर्थः अस्ति । अर्थात् भगवतः श्रीकृष्णस्य अश्वोऽत्रागत्य श्रान्तोऽभवत् । अतः अस्य स्थानस्य नामेदमभवत् ।

२. परवर्तिकालीनानाम् अहोमभूपानाम् अधिकारस्य समयेऽपि यवनाः ब्रह्मपुत्रस्य तटे वारं वारं आक्रमणमकुर्वन् । परन्तु ते नैव स्थानस्याधिकारं प्रापुः । ते वारं वारं पराजिताः सन्तः प्रत्यावर्तन्त । तेषां पराजयनिदर्शकानि चिन्हानि कामरूपस्य अनेकेषु शास्त्रेषु लिखितानि समुपलभ्यन्ते—

यथा 'यवनं जित्वा अस्त्रमिदं प्राप्तम्' इति कस्यचित् आग्नेयास्त्रस्य उपरि लिखित प्राप्यते ।

रिपोर्ट आन दी प्रग्रेस आफ हिस्टारिकल रिसर्च इन आसाम १८९७ अपेण्डिक्स्० १.

३. योगिनीतन्त्र, २.१३-१४.

स्म । येन १६ ईसवीये शतके पूर्वदिग्भागे अहोमजातिः, पश्चिमभागे कोचजातिः इति इमे एव प्रबले शक्तिशालिन्यौ जाती प्राचीनकामरूपराज्यस्य विभाजनमकुरुताम् । एतासां विवरणं मुख्यरूपेण अहोमबुरन्जी—कोचराज-वंशावली-कामरूपमन्दिरोपलब्धलिपिचरितग्रन्थे प्राप्यते । एतान् एव सर्वान् अन्यानि च सामग्रिकवस्तूनि अवलम्ब्य गुणाभिरामबरुआ-सरएडवर्डगेट—इत्यादिभिरैतिहासिकैः विद्वद्भिः तत्कालीनः कामरूपस्येतिहासः संकलितः ।

———

द्वितीयपरिच्छेदः

कामरूपे वैष्णवधर्मः

अस्त्यतीव गौरवपरिपूर्णो वैष्णवधर्मस्येतिहासः । प्राचीनकालादयं सततं पुष्णन् वर्धिष्णुश्चासीत् । एवंभूतोऽल्प एव समयः यस्मिन् अस्य गौरवे कापि न्यूनता जाता स्यात् । ऋग्वेदीयविष्णोर्महत्त्वेन व्यक्तित्वेन च वयं सम्यक् परिचिता एव । यथा—

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे,
पृथिव्याः सप्त धामभिः[1] ।
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्[2] ।
तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः
दिवीव चक्षुराततम्[3] ।
तद्विप्रा सो विपन्यवो जागृवांं सः
समीन्धते विष्णोर्यत् परमं पदम्[4] ।
विष्णोर्नुकं वीर्याणि प्रवोचम्,
यः पार्थिवानि विनते रजांसि ।[5]

---

१. ऋग्वेद १.२२.१६.

२. तत्रैव १.२२.१७.

३. तत्रैव १.२२.२०.

४. तत्रैव १.२२.२१.

५. तत्रैव १.१५४.३, १.१५४.६, १.१५५.३-५, ५.३.३, ५.८७.४, ६.४९.१३, ७.९९.१, ७.१.३, ७.१.४-५, ८.२९.७ एतान्यपि द्रष्टव्याणि । आर० जी० भण्डारकर—वैष्णवीज्म्, शैवीज्म् एण्ड अदर माइनर रिलीजस सिस्टम्स, पृ० ३३.

महाभारतस्य विष्णोः अज-शाश्वत-धातृ-अमृत-पितृ-आदीनि नामानि सन्ति[1]। ऋग्वेदोत्तरकाले विष्णोः स्थानं सुदृढतामगमत्। तैत्तिरीयसंहितायां विष्णोः त्रिपादतः भूम्यन्तरिक्षाकाशानामुत्पत्तिर्भवति[2]। यद्यपि शतपथब्राह्मणे उल्लिखितनारायणेन सह विष्णोः तादात्म्यसम्बन्धपरिकल्पने काठिन्यमनुभूयते[3], तथापि विदुषां मतानुसारेण ब्राह्मणयुगस्य समाप्तिकाले नारायणः परमपुरुष आसीत्[4]। यदि कोऽपि अनुसन्धानसंचालकोऽनुसन्धाता वा तैत्तिरीयारण्यकग्रन्थस्य सम्यगध्ययन कुर्यात् तदा ज्ञातं भविष्यति यत् नारायणविष्ण्वोरुभयोः घनिष्टतमः सम्बन्धः स्थापित आसीत्[5]। अनेन ज्ञायते यद् वैष्णवसम्प्रदायः महाभारतकालात् एव प्रारभ्यते स्म[6]। महाभारतस्यान्येष्वप्यंशेष्वस्य प्रमाणानि दरीदृश्यन्ते[7]। श्रीमद्भगवद्गीतायाम् "वृष्णीनां वासुदेवोऽस्मि"[8] इत्यस्ति। वृष्णेरुल्लेखः पाणिनेरष्टाध्याय्यां[9] एवं कौटिल्यस्यार्थशास्त्रे च अस्ति। प्राचीनसमयस्य प्राप्तानां शिलालेखानां मुद्राणां च प्रमाणानुसारेण ख्रिष्टजन्मतः २०० वर्षाणि पूर्वंयूनानदेशस्य सम्राजः वेसनगरस्य गरुडस्तम्भे नामोल्लेखोऽस्ति—

"देवदेवस्य वासुदेवस्य गरुडध्वजोऽयं कारित इह हेलियोदोरेण भागवतेन दिवस्य पुत्रेण तक्षशिलाकेन यवनदूतेन आगतेन महाराजस्य अन्तलिकितस्य

---

१. महाभारतम्, १२.३३४.२७. पिता माता च सर्वस्य जगतः शाश्वतो गुरुः।

२. इ० डब्लु० हकिन्स—दी रिलीजन्स आफ इण्डिया, पृ० ४६०.

३. एच० सी० रायचौधरी—अर्ली हिस्ट्री आफ दी वैष्णव सेक्ट, पृ० १६.

४. डी० आर० पाटिल—कल्चरल हिस्ट्री आफ वायुपुराण, पृ० १८८.

५. एच० सी० रायचौधरी—अर्ली हिस्ट्री आफ वैष्णव सेक्ट, पृ० १६.

६. इण्डियन एण्टीक्वेरी, १९०८, पृ० २५९,
जर्नल आफ रायल एशियाटिक सोसाइटि, १९१५, पृ० ८३४,
मैकेनिकल इण्डियन थीज्म्, पृ० १०.

७. महाभारतम्, १२.३३७.१, १२.३३५.१९, १२.३४८.४.

८. पाणिन्यष्टाध्यायी, ४.१.११४.

९. कौटिल्यार्थशास्त्रम्, पृ० १३.

......[1] ।" वासुदेवस्योपाख्यानेन सह बौद्धिककथाघतजा[2]तकजैनोत्तराध्ययनसूत्रयोः २२ तमे भागे आख्यानस्य तथा श्रीमद्भगवद्गीतायाः कथानकस्य सादृश्यमस्ति । राजस्थानस्य चित्तौरगढ़स्य घोसण्डीलेखे पाराशरीपुत्रगजायनद्वारा नारायणवाट-भवच्छंकर-वासुदेवानां पूजायारुल्लेखोऽस्ति[3] । नानाघाटस्य गुहाभिलेखे धर्म-इन्द्र-लोकपाल-यम-वरुण-कुवेरैः सहः भगवद्वासुदेवस्य भगवच्छंकरस्य चावाहनमभवत् । लक्ष्मणपुरस्य (लखनऊ) संग्रहालये सुरक्षिता प्रस्तरमयी बलरामस्यैका प्रतिमा,[4] महाक्षत्रपशोद्रासस्य मथुराभिलेखे, वासुकीपुत्र श्रीपुलभायोनासिकगुहाशिलाभिलेखे, गौतमीपुत्रश्रीयज्ञशतकर्णिचीनप्रस्तरशिलालेखे एवमेतेष्वपि सर्वेष्वभिलेखेपु भगवतः श्रीकृष्णस्य स्पष्टमुल्लेखोऽस्ति । अल्मोडामण्डलान्तर्गते[5] प्राप्तासु कतिषु मुद्रासु तथा च कान्यकुब्ज (कनौज) स्थाने प्राप्तासु मुद्रास्वपि विष्णोर्नामोल्लेखो लभ्यते तथा च अन्यैरपि बहुभिः साक्ष्यैः प्रमाणितं भवति तत् प्राचीनकालाद् वासुदेवस्यार्चना

---

1. Lüders, Inscription No. 669, Epigraphia Indica, Vol. X, Appendix; Vogel, Archaeological Survey of India, Annual Report, 1908-9, pp. 126-129; Archaeological Survey Report, 1912-13, p. 82 ff., K. G. Goswami, Vaiṣṇavism, Indian Historical Quarterly, Vol. XXX, p. 358, that Besnagar, i. e. Vidisa occupied a place of importance for Vaiṣṇavism is proved by another inscription of that period, Archaeological Survey of India, Annual Report 1913-14, pp. 190 ff.

2. Cowell, The Jātakas, Vol. 4, p. 50.

3. Lüders, Inscriptions No. 6, Epigraphia Indica, Vol. X, Appendix, Indian Antiquary, 132-208 ff. R. P. Chanda, Archaeology and Vaiṣṇava Tradion, Memoirs of the Archaeological Survey of India, pp. 151 ff.

4. V.S. Agrawal, A Short Guide Book to the Archaeological Section of the Provincial Museum, Lucknow, 1940, pl. & p. 14.

5. Allen, Catalogue of Coins of Ancient India, pl. LXXX, p. 120.

लोकेषु प्रचलितासीत्[१]। पंचरात्रशाखान्तर्गतव्यूहमतवादः[२]: प्रसिद्ध । वादोऽयं वायुपुराणतः प्रमाणितो भवति न वात्रास्ति सन्देहः । तत्रापि तस्मिन् पुराणे विष्णोरवतारप्रसंगे वासुदेवकृष्णपूजोल्लेखः वारं वारमुपलभ्यते ।

समुद्रगुप्तप्रयागस्थितप्रशस्तिकायां विष्णुगोपनामोल्लिखितमस्ति, अनेन प्रमाणितं स्यात यच्चतुर्थशताब्दीसवीयपूर्वं दक्षिणभारते वासुदेवस्य पूजायाः प्रचलनभासीत् । प्राचीनतमिलसाहित्ये मदुरा-कावेरीस्थानेषु कृष्णस्य तस्य भ्रातुर्मन्दिराणां निर्माणस्यास्ति चर्चा[३]। कावेरीपट्टनम्स्थानस्य महाकविः करिकन्नकरिकलः 'विल्ली अम्यल' नाम्नः राज्ञः "थुन्जिया-पुरूबलुयी" नाम्नः राज्ञश्च श्रीकृष्णेन तद्भ्राता बलरामेण च सानं सादृश्यम-करोत् ।[४]

एवं विष्णोः पूजा आसामप्रान्ते प्राचीनतमात् कालात् प्रचलितासीत् । महाभारतशान्तिपर्वणि विष्णोः 'प्राग्ज्योतिषज्येष्ठ' संज्ञास्ति, अस्योल्लेखः ग्रन्थस्य प्रथमाध्यायेऽक्रियत । कामरूपसम्बन्धिबहुषु अभिलेखेषु, कामरूपस्य प्राचीननरपतयः स्ववंशेन सह नरकराजमाध्यमेन विष्णुना सह सम्बन्धं स्था-पयन्ति । वाणभट्टः हर्षचरिते भास्करवर्माणं वैष्णववंशोत्पन्नं कथयति[५]। ५५४ ईसवीये वर्षे प्रसारिते बडागङ्गाप्रस्तरलेखे कामरूपे विष्णुपूजनस्य सर्वप्रथम-मुल्लेखः समुपलभ्यते, अत्र राजा भूतिवर्मा 'परमदैवतः परमभागवतः' प्रति-पादितः । ५५४ ईसवीयपूर्वस्य कस्मिन्नपि अभिलेखेऽस्य प्रमाणं नैवावगम्यते । परन्तु तत्पश्चात् प्रायः १०० शतवर्षाणि यावत् कामरूपे वैष्णवधर्मः राजभिः नैव पुष्यते स्म । तत्कालादारभ्य धर्मपालस्य प्रथमशासनं यावदुपलब्धेष्वभिले-खेषु प्रत्येकस्याभिलेखस्य प्रथमश्लोकः शिवस्तुतिपरः शिवमूलक एवोपलभ्यते । नारायणस्य वराहावतारे वंशोऽयं समुद्भूत इति तु स्पष्टमेव । किन्तु वंशस्या-स्य राजा शिवभक्तः आसीदत्र नास्ति कोऽपि सन्देहः । भास्करवर्मोत्पन्न-

---

१. आर० जी० भण्डारकर, वैष्णविज्म्, शैविज्म् एण्ड अदर माइनर सिस्टम्स, पृ० ४.

२. एफ० ओ० स्रोडर, इंट्रोडक्सन टू दी पंचरात्र सिस्टम ।

३. कनकसमाइ, दी तमिल्स एटीनहण्ड्रेड इयर एज, पृ० १३-२६ ।

४. तत्रैव, पृ० ६८-६९ ।

५. बाणभट्टहर्षचरितं सप्तमोच्छ्वासः ।

नृपाः वैष्णवाः परन्तु स आसीत् शैव एव[1]। धर्मपालस्य पूर्वमिन्द्रपालस्य द्वितीये शासनेऽपि राज्ञः द्वित्रिशन्नामावल्ल्यन्तःस्थितानाम् 'हरगिरिजावरण-पंकजरजोरञ्जितात्मनः[2]' अस्ति। किन्तु धर्मपालस्य द्वितीये ताम्रशासने पुष्पभद्रालिप्यां प्रथमः श्लोकः दर्शनीयोऽस्ति।

"श्रीमान् सः क्रोडरूपो जयति वसुमतीमण्डलालीढदंष्ट्रः
योत्रोत्कीर्णाद्रिचक्रः खुरयुगशिखरक्षुण्णपातालपंकः।
वेगव्याक्षिप्तविश्वप्रलयजपवनैर्यस्य निश्वासवातैः
भूयो भूयः प्रताम्यत्तिमिमकरकुलाः पीतमुक्ताः समुद्राः[3]॥

भास्करवर्मणः 'दूबी' अभिलेखेऽपि एवमेव वराहावतारस्योल्लेखः प्राप्यते।

'येनेयं वसुधा वराहवपुषा स्थित्यै प्रजानां पुरा
गुप्तोद्धृत्य..............................[4]।

अस्मिन् सम्पूर्णाभिलेखे कुत्रापि शिवस्य चर्चा नास्ति। विदुषां सम्मतिर्यत् पुष्प-भद्राभिलेखस्य लेखकः स्वयमेव राजा धर्मपालः आसीत्, तथा चाभिलेखोऽयं तस्य प्रौढवयःक्रमे प्रसारितोऽभवत्। अनेनैवं प्रतीयते यत् धर्मपालः परिणत-वयसि आत्मनः प्राचीनं धर्मं तत्याज। यतः तस्य शासने येभ्यः ब्राह्मणेभ्यः भूमेर्दानमददात्, तत्र तेषां वैदुष्यस्य, पाण्डित्यस्य, प्रगाढशास्त्रालोचनजातबहु-विधज्ञानस्य वारं वारमुल्लेखो वर्तते। किन्तु पुष्पभद्राभिलेखस्य अष्टादश-श्लोकोऽस्मिन् प्रसंगे द्रष्टव्योऽस्ति।

"ताभ्यां सुतः सकलविप्रकुलप्रदीपः श्रीमान् बभूव मधुसूदननामधेयः।
यो बाल्यतः प्रभृति माधवपदपद्मपूजाप्रपञ्चरचनां सुचिरं चकार॥

अनेन ज्ञायते यद् दानलाभप्राप्तकर्ता ब्राह्मणः पूर्वरूपेण वैष्णव आसीत्, तस्य नाम मधुसूदनः आसीत् एवंच स माधवस्यार्चकः आसीत्। अत्र अन्यत्

---

१. "अयमस्य च शैशवादारभ्य संकल्पः स्थेयान् स्थाणुपादारबिन्दद्वयादृते नाहमन्यं नमस्कुर्यामिति"—हर्षचरितसप्मोच्छ्वासः।

२. अतः परं यदा कोचवंशीयाः अहोमवंशीयाः राजानः कामरूपं प्रशशासुः, ते सर्वे हरगौर्योरुपासका आसन्, तेषां समेषामुपलब्धानां मुद्राणां मन्दिराणां समुपलब्धानां च लिपीनां माध्यमेन प्रमाणितं भवति।

३. पुष्पभद्रालेखे, प्रथमश्लोकः, कामरूपशासनावली, पृ० १७१.

४. इपिग्राफिया इण्डिका, खण्ड ३०, पृ० २९८.

एवं वक्तव्यमप्यस्ति । धर्मपालस्य द्वितीयताम्रप्रशासनस्य पूर्वं अर्थात् बलवर्मणः प्रारभ्य धर्मपालं यावदुपलब्धेषु सर्वेषु अपि शासनेषु, येभ्यो येभ्यो ब्राह्मणेभ्यो यद् यत् परिमाणं भूमेर्दानमभवत् तेषु सर्वाधिकधान्योत्पादिकां भूमिं मधुसूदन एव लेभे । पुष्पभद्राभिलेखे २१ श्लोके अस्ति लिखितम्—

दिग्डोलसंयुतगुहेश्वरनामधेयां तस्मै ददौ दशसहस्रभवां भुवं सः ।
श्रीधर्मपालनृपतिः प्रगुणावदातचित्ताय शासनतया मधुसूदनाय ॥

अननैव ज्ञायते यत् धर्मपालः प्रौढे वयसि विष्णुभक्तिपरायणोऽभवत् ।

यथा पूर्वमेवोल्लेखः कृतः यत् कामरूपशासने मध्यकालीनां राजानः शैवाः आसन्, अत्र नास्ति कोऽपि सन्देहः । किन्तु केषांचिद्राज्ञामत्र विषये वैलक्षण्यं प्राप्यते । यथा च वनमालदेवाभिलेखेन शिवभक्तिः समर्थ्यते । किन्तु वनमालनाम विष्णोरस्ति । यदि नाम्ना तत्कालीनप्रचारितधर्मस्य कश्चिदपि परिचयः उपलभ्यते तदा तस्मिन् काले बहूनां ब्राह्मणानां नामानि भगवतः नाम्नैवासन् । अनेन नैवं वक्तुं शक्यते यत् तत्काले वैष्णवधर्मः लुप्त आसीत् । भास्करवर्मणो निधनपुरलेखे विभिन्नब्राह्मणानां निम्नोक्तानि नामानि प्राप्यन्ते । यथा—'संकर्षण-माधव-गोवर्धन-गोपाल-जनार्दन-केशव-सुदर्शनादीनि' एतानि सर्वाणि विष्णोरेव नामानि सन्ति । अनेन ज्ञायते यत् एतेषां विष्णुरूपाणां देवानां पूजनं तत्रासीत् तथा नैते सर्वे दैनिकजीवनसम्बन्ध्युपासनायां वैष्णवधर्मं मुख्यरूपेण आचरन्ति स्म । निधनपुर-गुआकुची-बलवर्मा-वनमाललेखानां सम्यगध्ययनेन विष्णोरेकसहस्रनामसु कामरूपराज्ये तस्मिन् काले आसन् निम्नांकितानि नामानि जनप्रियाणि—'अच्युत-नारायण-पुरुषोत्तम-हरि-उपेन्द्र-वासुदेव-कृष्णादीनि' । अनेनेदं ज्ञायते यद्यपि राज्ञां मनोभावः विष्णोरनुकूलो नासीत् तथापि ब्राह्मणेषु सामान्यजनेषु च विष्णोर्नाम्नः पूजनस्य निष्ठायारभावो नासीत् ।

विष्णोरवताराणां कामरूपे प्रचारिताभिलेखेषु बहूनि प्रमाणानि समुपलभ्यन्ते । वनमालबलवर्मरत्नपालेन्द्रपालधर्मपालादीनां काले प्रसारितेषु ताम्रशासनेषु विष्णोर्वराहावतारस्योल्लेखः प्राप्यते । एतदर्थं केषांचिच्छिलालेखानामंशाः प्रस्तूयन्ते—

प्रलयपयोधौ मग्नामुद्धरतो वसुमतीमुपेन्द्रस्य ।
नरक इति सूनुरासीदसुरसुहृत्क्रोडरूपधृतः[1] ॥

---

१. बलवर्मणः नवगांवताम्रशासनम्, श्लोकः ३.

यश्चावलेति जरतीति भियायुतेति मूढेति बन्धुरहितेति विपद्गतेति।
हित्वादितिं समवजित्य सुरानहार्षीत् तत् कुण्डले सुरयशोमहसी इवाग्र्ये[1] ॥

वल्गत्खुरक्षुभितभीमभुजङ्गसद्मा कल्पावसानदिनभिन्नसमुद्रमुद्राम्।
पातालपङ्कपटलोदरसन्निलीनां क्रोडाकृतिर्व्वसुमतीं हरिरुज्जहार[2] ॥

जयति पशुपतिः प्रजाधिनाथो महितवपुर्म्महिमा महावराहः।
इयमपि भगदत्तवंशमाता धरणीरनन्तनराधिपप्रतिष्ठा[3] ॥

श्रीमान् स क्रोडरूपो जयति वसुमतीमण्डलालीढदंष्ट्रः।
पोत्रोत्कीर्ण्णाद्रिचक्रः खुरयुगशिखरक्षुण्णपातालपङ्कः ॥

वेगव्याक्षिप्तविश्वघलयजपवनैर्यस्य निश्वासवातैः।
भूयो भूयः प्रताम्यत्तिमिमकरकुलाः पीतमुक्ताः समुद्राः[4] ॥

वराहावतारस्योल्लेखोऽभिलेखेषु नास्ति किमपि नवीनं वस्तु। 'तोरमाण' अस्य ईरानशिलालेखे वराहावतारस्य स्पष्टमुल्लेखोऽस्ति। तथैव 'कमऊली' लेखस्य प्रारम्भे वराहरूपिणो वराहस्यास्ति वन्दना। कामरूपस्य पाण्डुनगरात् पूर्वं चित्रवाहपर्वतश्रेणी वर्त्तते, तत्र विष्णोर्वराहावतारस्य पूजायारुल्लेखः कालिकापुराणे वहुवारमभवत्।

कामरूपे प्रचारितप्रसारिताभिलेखेषु विष्णोरवतारे जमदग्निपुत्रराम-(परशुराम)स्योल्लेखः उपलभ्यते।

'यद्वारि रामपरशोर्नृपकण्ठकाण्डलावस्य धौतघनलोहितपङ्कमासीत्।
लौहित्य इत्यधिपतिः सरितां स एष ब्रह्माङ्गभूर्न्नवतु वः कलिकल्मषाणि[5] ॥

कालिदासस्त रघुवंशे 'रामाभिधानो हरिः' अस्ति[6]। अनेन परशुरामस्य वोधो भवति। इन्द्रपालस्य प्रथमताम्रशासने स्पष्टतया परशुरामस्यास्ति चर्चा,

---

१. रत्नपालस्य बडागांवताम्रशासनम्, श्लोकः ४.
२. इन्द्रपालस्य गोहाटीताम्रशासनम्, श्लोकः ४.
३. इन्द्रपालस्य गोआकुचीशासनम्, श्लोकः २.
४. धर्मपालस्य पुष्पभद्राशासनम्, श्लोक १.
५. इन्द्रपालस्य गोहाटीशासनम्: श्लोक ३.
६. रघुवंशकाव्यम्, १३.१.

तत्रोत्कीर्णमस्ति यत् यस्य जलं जमदग्निपुत्ररामेण राज्ञां कण्ठच्छेदनात् लौहित्यमभजत्, स एव नदीनां पतिः ब्रह्मपुत्रः वः कलिकालजातपापविषसमूहं नाशयतु[1] । पुनः इन्द्रपालस्य शासने जमदग्निपरशुरामस्य अन्योऽपि उल्लेखः उपलभ्यते—

जामदग्न्यभुजविक्रमार्ज्जित-
प्राज्यराज्यनृपवंशसम्भवां
दुर्ल्लभेति स तु लोकदुर्ल्लभां
प्राप्य सम्यगभवत् कलत्रवान्[2] ॥

इन्द्रपालस्य गुआकुचीशासनेऽपि इदमेवास्ति[3] । अवतारतत्त्वधार्मिकजनैः 'कृष्णस्तु भगवान् स्वयम्' मतमिदं पोष्यते । अस्यैव कृष्णमाहात्म्यस्य कथा अतिप्राचीन-असमिया-साहित्ये समुपलभ्यते । आसामप्रदेशे लिखितं संस्कृत-प्रान्तीयभाषायां काव्यनाटकपुराणधर्मशास्त्रज्योतिषदर्शनेतिहासिकवंशावली-बुरुन्जी-इत्यादिषु अनुसन्धानेनावगम्यते यत् प्राचीनकालादेव श्रीकृष्णस्य भावना आसामप्रान्तीयजनतामनःसु सुप्रतिष्ठितासीत् । अभिलेखेषु यथा इन्द्रपालस्य गौहाटीशासने समुल्लिखितमस्ति[4] । इन्द्रपालस्य गुआकुचीताम्र-शासनाद् ज्ञायते यद् यथा देवक्यां वसुदेवेन गोपगणहितैषिण्या यशोदया च आत्मनः पुत्ररूपेण गृहीतः श्रीहरिः जन्म लेभे तथैव अनुराधायां पृथ्वीपाल-हितैषिणीभ्यां यशोदयाभ्यां (यशसा दयया च) समृद्धमान् श्रीमान् देवदेव-कनामा पुत्रः ब्राह्मणेन वसुदेवेन जन्म लेभे—

देवक्यामिव तस्यां तेनाजनि देवदेव इति सूनुः ।
हरिरिवगोपहितैषी यशोदया स्वीकृतः श्रीमान्[5] ॥

कमऊलीलेखस्य चतुर्थश्लोकाद् ज्ञायते यत् कृष्णः गोपीनां मनसां रञ्जकः आसीत्—

'गोपीजनननन्दितमानसा[6]' ।

---

१. कामरूपशासनावल्यां, ११७.

२. इन्द्रपालस्य गौहाटीशासनम्, श्लोकः १३.

३. इन्द्रपालस्य गुआकुचीशासनम्, कामरूपशासनावल्याम्, पृ० १३३.

४. इन्द्रपालस्य गौहाटीशासनम्, श्लोकः ६, गुआकुचीशासनम्, श्लोकः ९.

५. इन्द्रपालस्य गुआकुचीशासनम्, श्लोकः २४.

६. कमउलीशासनम्, श्लोकः ४.

विष्णोर्हयग्रीवरूपं प्राचीनकामरूपेऽस्ति बहुख्यातम्, हयग्रीवस्योपाख्यानं महाभारतस्य शान्तिपर्वणि प्राप्यते, तदनुसारेण यदा भगवान् क्षीरसागरशायी आसीत्, तदा तस्य नाभिकमलात् भगवतः ब्रह्मणः जन्माभवत्, तदैव विष्णोः कर्णयोर्मलेन मधुकैटभयोः द्वयोरसुरयोः जन्म अभवत् । एतौ दुष्टौ असुरौ ब्रह्मणः वेदान् आहृत्य पातालं ययतुः, अतः ब्रह्मातिदुःखितोऽभूत् । सः शायिनं विष्णुं विबोधयामास तथा वेदानामुद्धारार्थं तं ययाच । विष्णुः हयग्रीवरूपं धृत्वा ताभ्याम् वेदान् आनीय पुनः ब्रह्मणेऽददात् । अतः स विष्णुः तस्मिन्नेव रूपे क्षीरसागरोत्तरपूर्वकोणे शयनार्थमगच्छत् । दुरात्मानौ द्वौ मधुकैटभौ तत्रापि तेन सह योद्धुं जग्मतुः । अस्मिन् युद्धे विष्णुः मधुं कैटभम् चाहन्[1] । अन्यत्र हयग्रीवस्य कथानकं भिन्नरूपेणोपलभ्यते । तदनुसारेण हयग्रीवनामकासुरः वेदान् अचूचुरत् । विष्णुः तद्रूपं धृत्वा तस्मात् पुनर्वेदानुज्जहार[2] । श्रीमद्भागवते महापुराणे ६.६.३० श्लोके उल्लेखोऽस्ति यद् यदा हयग्रीवनामकोऽसुरः वेदान् जहार तदा विष्णुः मत्स्यरूपं धृत्वा तंच हत्वा वेदान्नुज्जहार । भागवते पुराणे विष्णोरवतारेषु हयशीर्षस्य विशिष्टमस्ति स्थानम्[3] । मत्स्यपुराणस्यानुसारं यदा प्रलयोऽभवत् तदा भगवान् हयरूपं धृत्वा वेदपुराणन्यायमीमांसाधर्मशास्त्रादीनामुद्धारमकरोत्[4] । स्कन्दपुराणस्य धर्मारण्यकखण्डे विष्णोर्हयग्रीवरूपधारणस्यास्ति प्रमाणम् । कालिकापुराणस्यानुसारं विष्णुः हयग्रीवस्य रूपं धृत्वा मणिकूटपर्वते ज्वरासुरं जघान् तथा च मणिकूटपर्वते मानवदेवासुराणां कल्याणार्थं न्यवसत् । ज्वरासुरवधजातपातकात् विष्णौ अपि ज्वरस्याक्रमणमभवत् । सः तस्मिन्नेव स्थाने ज्वरात् नैरुज्यार्थं स्थानमकरोत् । तत्समयात् तस्सिन् स्थाने अपुनर्भवनामकस्य एकस्य सरोवरस्योद्भवोऽभवत् । जनश्रुतिरस्ति यद् यः तस्मिन् सरोवरे स्नानं करोति स पुनर्जन्मनः मुच्यते । कालिकापुराणे हयग्रीववधस्य अन्यापि कथास्ति । कामरूपे विश्वनाथस्य समीपे जगत्पतिश्रीपतिः हयग्रीवेण युयोध तथा च तमवधीत् । ततस्तस्मात् स्थानात् गत्वा मणिकूटपर्वते न्यवसत्[5] । हयग्रीवासुरः

---

१. महाभारतशान्तिपर्वणि, ३४३.४-७८.

२. देवीभागवते, १.५.

३. भागवते, २.७.११.

४. मत्स्यपुराणे, ५३.५-६.

५. कालिकापुराणे, ८१.७५, ८३.२४.

कः आसीत्, अस्मिन् विषये सामग्रीणामभावात् च स्पष्टं किमपि वक्तुं न शक्यते। कालिकापुराणादिदमेव ज्ञायते यत् नरकराजस्य राजधान्याः पूर्व-द्वारे हयग्रीवासुरः द्वारपालकः आसीत्। यदा श्रीकृष्णः तस्य राजधानीमाचक्राम तदा नरकेण सह हयग्रीवमपि सः अवधीत्।[1]

ज्ञायते यत् भागवते या हयग्रीवकथास्ति तया सह कामरूपस्य तत्कालीना स्थितिः समतां भजते। कामरूपराज्ये अद्यापि हयग्रीवमन्दिरमस्ति प्रसिद्धम्। मणिकूटस्य विष्णोः प्रतिमायारुत्पत्तिसम्बन्धे योगिनीतन्त्रेऽस्ति एकापरा भिन्ना वार्ता। हयग्रीवप्रतिमायाः सम्बन्धः कलिंग(उड़िसा)राज्यपुरीस्थितजगन्नाथमूर्त्यास्ति। कलिंगदेशस्य राजा इन्द्रद्युम्नः रात्रौ एवं स्वप्नमपश्यद् यद् नामरहितो विशालं एको वृक्षखण्डः समुद्रे प्रवहति तथा चायं इन्द्रद्युम्नस्य राज्यस्य समुद्रस्य तटे संलग्नो भविष्यति। प्राप्ते तस्मिन् कुठारेण सप्तखण्डाः करणीयाः सन्ति, तेन तथैवाचरितम्। तेभ्यः द्वौ खण्डौ कामरूपे आनीतौ। तत्र एकस्मात् खण्डाद् हयग्रीवस्य मूर्त्तिस्तथान्यस्मात् खण्डाद् माधवस्य मत्स्यावतारस्य मूर्त्तिरर्च्यते[2]। अतः इदमेव प्रतिभासते यद् हयग्रीवं

---

६. कालिकापुराणे, ४१.८६.

१. योगिनीतन्त्रे, २.९.२२५-२४४—

कुशानास्तीर्य सुप्त्वा च इन्द्रद्युम्नो महाबलः।
हरिध्यानपरो भूत्वा सुष्वाप नियतेन्द्रियः॥

सुप्तस्य तस्य नृपतेर्वासुदेवो जगद्गुरुः।
आत्मानं दर्शयाभास सुप्ते तस्मिंश्च चक्रभृत्॥

ददर्श स तु भूपालो देवदेवं जगद्गुरुम्।
शङ्खचक्रधरं देवं गदापद्माग्रपाणिनम्॥

युगान्तादित्यवर्णाभं नीलवैदूर्यसन्निभम्।
सुपर्णपृष्ठमासीनं षोडशार्धभुजं शुभम्॥

क्रतुनानेन दानेन धिया भक्त्या च ते नृप।
तुष्टोऽस्मि ते महीपाल भवान् किमनुशोचति॥

यदत्र प्रतिमां राजन् जगत्पूज्यां सनातनीम्।
स्थापयिष्यसि हे धीर तस्योपायं ब्रवीमि ते॥

वैष्णवधर्मेण दीक्षितकरणस्यायं प्रयासः स्यात्। यद्यपि अस्त्यवतारेषु हयग्रीवस्य

सागरस्य जलस्यान्ते नानाद्रुमविभूषिते ।
वीचीभिर्हन्यमानस्तु नवासौ कम्पते द्रुमः ।।

गत्वा परशुहस्तश्च ऊर्मिमन्तं ततो व्रजेत् ।
एकाकी विरहो राजन्सत्यं पश्यति पादपम् ।।

इति कञ्चित् समालोच्य छेदयन्नविशङ्कितः ।
पश्चिमायतनं वृक्षं प्रातरद्भुतदर्शनम् ।
छित्वा तैलरसं दत्त्वा तदा भूपाल चानय ।।

कुरु तत्प्रतिमां दिव्यां जहि चिन्तां विमोहिनीम् ।
एवमुक्त्वा महाबाहुरन्तर्धानं गतो हरिः ।।

स चापि स्वप्नमालोच्य परं विस्मयमागतः ।
तां दिशं समुदीक्ष्यैव स्थितस्तद्गतमानसः ।।

व्याहरन्वैष्णवं मन्त्रमुक्तञ्चैव तदात्मकम् ।
प्रभातायां रजन्यां तु स ततोऽनन्यमानसः ।।

स स्नात्वा सागरे रम्ये यथाविधि महायशाः ।
तं ददर्श महावृक्षं परं तेजस्विनं द्रुमम् ।।

मोहान्तकं दुरारोहं पुण्यं विफलमेव च ।
महोच्छ्रायं महाकायं प्रसुप्तं च जलान्तिके ।।

नीलरत्नाग्र्यवर्णाभं नामजातिविवर्जितम् ।
नरराजस्तथा विष्णोर्द्रुमं दृष्ट्वा मुदान्वितः ।।

चिच्छेदासौ परशुना निशातेन तदैव हि ।
सप्तधा द्रुमराजं तं पातयामास भूतले ।।

ओड्रदेशे मूलभागं कल्पयामास वै विभुः ।
तदूर्द्धखण्डं काश्मीरे कबन्धाकारमेव च ।।

आदित्यं तं विजानीयाद्रामेण स्थापितं पुरा ।
शोणादित्यं तदूर्द्धाङ्गं शक्रेण स्थापितं प्रिये ।।

शिलारूपं महेशानि स्थापितं गुरुणा ततः ।
भागद्वयं कामरूपे भागैकं मलये गिरौ ।।

गणना तथापि न बहुख्यातिलब्धोऽयं देवः भारतीयलोकेषु यस्य मन्दिरं कृत्वा पूजनस्य विधिः प्रचलिता भवेत्। किन्तु बौद्धधर्मे विशेषतः बौद्धतन्त्रे तस्य स्थानमस्ति प्रधानम्। हयग्रीवस्य तान्त्रिक्योत्पत्त्या प्रमाणितं स्यात् यद् योगिनी-तन्त्रे हयग्रीवस्य पूजनं न केवलं पत्रपुष्पफलादिभिरेव निर्दिष्टा अपितु मत्स्य-मांसाद्युपहारैरपि निर्दिष्टास्ति[1]। कामरूपसमीपस्थितभूतान् (भूटान्) राज्य-मस्ति, शीतकाले ततः ये तत्रस्थनिवासिनः कामरूपमागच्छन्ति ते सर्वे हयग्रीवं पूजयन्ति। कालिकापुराणे यद् वासुदेवस्य पूजायारुल्लेखः उपलभ्यते तथा ज्ञायते यत् पंचरात्रसंहितायामपि तथैवास्त्युल्लेखः। पंचरात्रसंहितायां गोपालकृष्ण-तत्त्वस्य नास्ति प्राधान्यम्। भगवद्गीतायां यद् देवतात्मकधर्मस्य अर्थाद् ऐकान्तिकधर्मस्य विवरणं प्राप्यते तेन पंचरात्रसंहितायां विवर्णिताद् धर्मादस्ति वैचित्र्यम्। पंचरात्रसंहितायां वासुदेवस्य पूजाया अस्ति उल्लेखः, किन्तु तदति-रिक्तं तस्य देवस्य विकासात्मिकायाः भंगिभायाः (प्रभामण्डलस्य)पूजनस्यास्ति वैशिष्टचम्। उभयत्रापि अस्ति भक्तेः समत्वम्। "ॐ नमो भगवते वासुदेवाय" अस्य द्वादशात्मकवर्णविशिष्टमन्त्रस्यास्ति भूयो भूयो वर्णनम्। एवं पंचरात्र-संहितायां रामकृष्णब्रह्मशम्भुगौर्यादीनां देवानां पूजनस्यास्ति निर्देशः। कालिका-पुराणे पौनःपुन्येन दृश्यते स्म यच्छम्भुगौर्योः पूजनं नैव पृथक् पृथक् कार्यम्। अनेनैव प्रकारेण वासुदेवस्य अष्टौ नामानि यौगिकानि समुपलभ्यन्ते वलभद्र-काम-अनिरुद्ध-नारायण-ब्रह्म-विष्णु-नरसिंह-वराहाख्यानि, एतेषामष्टानामभि-धानानामस्ति, नायको वासुदेवः। तत्र प्रधाना देवी विमलाख्या नास्ति। अत्रैव अष्टानां योगिनीनामस्ति विवरणम्, ताश्च—उत्कर्षिणी, गैया, ज्ञाना, क्रिया, यागा, ब्राह्मी, ऐशानी, अनुग्राही इत्येतासां पूजनं पत्रपुष्पफलैः कार्यम्

मणिकूटे ततोऽर्ध्वं च स्थापितं वरुणेन हि।
प्राच्यां नन्दीशमैशान्ये मत्स्याख्यो नाम माधवः॥

१. तिलोद्भवेन तैलेन सुगन्धेन मम प्रिये।
पलेन च पलार्द्धेन तदर्द्धेनापि यत्नतः।
स्नेहैर्वा रजनीभिश्च तण्डुलोद्वर्तनादिभिः॥ १४३

संस्थाप्य देवदेवेशं विल्वपत्रेण शाङ्करि।
संपृष्टगात्रं पत्रैर्वा अपामार्गस्य मूलकैः।
गुच्छकैर्नलपुष्पस्य कूर्चं कुर्यान् महेश्वरि॥ १४४॥

योगिनीतन्त्रे २.९.१४३-४४

एवं देवानां देवीनां च आयुधानां पद्मशंखगदादीनां पूजनमुल्लिखितानां तत्तन्मन्त्राणामुच्चारणेन ।[1]

कामरूपस्योत्तरपूर्वसीमान्तप्रदेशे वैष्णवानामासन्नेका संस्था । यत्र आसामप्रदेशविख्यातपण्डितगोपाल-आता न्यवसत् । तस्य माता कलिताराज्यस्यासीत् । तस्य वंशे याः सन्ततयोऽभूवन् तासां सर्वासां नामानि वैष्णवानि एव यथा—वासुदेवः, हरिदेवः, संकर्षणः, कामदेवः इत्यादीनि ।

१३१४ शकसंवतः ताम्रलेखेनावगम्यते यद् विष्णोः सत्यनारायणरूपस्य कामरूपे पूजाविधानमासीत्[2] । भास्करवर्मणो निधनपुरस्यैवमिन्द्रपालस्य गौहाटीशासनेन ज्ञातं यत् तस्मिन् काले प्रचलित वैष्णवधर्मे नारायणस्यासीत् प्राधान्यम् । एतयोर्द्वयोः लेखयोरस्ति प्रतिपादितं यत् लक्ष्मीर्नारायणस्य वक्षसि निवसति । लक्ष्मीभाग्यैश्वर्यादीनां समृद्धिकर्त्र्यपि अत्रैव कथितास्ति । हर्जरवर्मणः लेखे श्रीकमलनिवासिनी च कथ्यते स्म ।

'तत्र च देवी कमलनिवासिनीव प्रकटयति रूपगुणान् महादेवी मंगलश्रीः ।[3]

धर्मपालस्य शुभंकरपाठकलेखे कमलाभारत्योः कलहस्योल्लेखोऽस्ति ।[4] कलहोऽयं पुराणेष्वप्यस्ति ख्यातमेव । सप्तमे इसवीये शतके कामरूपे वैष्णवधर्मः बहुप्रसिद्धिमगमत् । इदं मन्दिरेभ्यः प्राप्ताभिर्विष्णुमूर्तिभिः अवगम्यते । 'एपिग्राफिया इण्डिका, खण्ड १८ ग्रन्थे के० एन० दीक्षितमहोदयेन नवमशतकस्य एकस्याः विष्णुप्रतिमायाः लेखस्योल्लेखः कृतः । यद्यपि लेखोऽयमासीत् बहुभग्नः तथापि अस्मिन् निम्नांकितांशः पठनीय आसीत् ।

'भगवतो नारायणस्य शैलीप्रतिमा भक्तानाम्' ।

अस्मादेव लेखादिदमपि ज्ञायते यत् १० एवं ११ ईशवीये शतके वर्तमानशिवसागरनगरस्य समीपमेकं विशालं विष्णुमन्दिरमासीत् । वराहपुराणे विवर्णितं यद् हिमालये एकं कोकामुखस्वामिनः मन्दिरमस्ति, तत्र विष्णोः सुशोभना प्रतिमैकास्ति । वराहावताररूपी विष्णुः एवं भगवती वसुन्धरारूपिणी छाया, उभयोः संगमाद् यो नरकनामासुरः सम्बभूव, विष्णुः यं परवर्तिकाले

१. कालिकापुराणम्, ८३.९०.
२. जर्नल आफ आसाम रिसर्च सोसाइटी, खण्ड ३, पृ० ४१.
३. कामरूपशासनावल्यां, पृ० ५०-५१.
४. शुभंकरपाटकशासनम्, श्लोक ९.

प्राग्ज्योतिषः सम्राजमकरोत् स एव नरकः हिमालयस्य कूले कोकामुखतीर्थे जन्म लेभे ।[1] कोकामुखतीर्थे कुत्र अवस्थितमासीदेतदस्पष्टमेव । किन्तु ब्रह्मपुराणानुसारं कोकामुखतीर्थनिकटे कौशिकी एवं त्रिस्रोता नद्यावबहताम् । एते कौशिकीत्रिस्रोते कामरूपे आस्ताम्, अतः कोकामुखतीर्थमपि कामरूपे एवासीत् ।

शैवधर्मः

आख्यानोपाख्यानाभ्यां, इतिहासेन च प्रमाणितो भवति, यत् कामरूपे शैवधर्मोपासना शिवपूजा वा बहुप्राचीनकालादेव प्रचलिताऽऽसीत् । प्राचीनासामेऽहोमजातेः, आर्यसभ्यतायाः विकासानन्तरं शैवधर्मो लोकप्रियधर्म आसीत् । देवीदेवतानां मन्दिरेषु शिवमन्दिराणां संख्याऽधिकास्ति । कालिकापुराणस्य नवसप्तत्यध्यायानुसारेण विष्णुमन्दिराणां देवीमन्दिराणांच स्थानानि नगन्यानि सन्ति । एष्वध्यायेषु शिवमन्दिराणां, तथा शिवमाहात्म्यस्य पवित्रस्थानानां वर्णनं कृतमस्ति । वर्तमानपण्डितानां कथनानुसारेणासामे बंगलायारुत्तरभागे जलपाईगुड्याः राजा जल्पेश्वरः सर्वप्रथमः शिवपूजायाः प्रचलनमकरोत् । यतः प्राचीनसमये जलपाईगुडीतिनगरं कामरूपान्तर्गतमासीत् । स एव राजा जलपाईगुड्यां जल्पेश्वरमहादेवस्य मूर्तेर्निर्माणमकरोत् । स्कन्दपुराणयावन्तिस्खण्डे सम्वादः एकः समुपलभ्यते यद् जल्पेश्वरनामराजा शिवभक्त आसीत् ।

प्राचीनकाले जल्पनामधेयः एकः प्रसिद्धो नृप आसीत् तस्य पंचपुत्राः सुवाहुशतमर्दिजयविजयविक्रान्तनामान आसन् । इमे पंचपुत्राः युद्धविद्यामर्मज्ञास्तथाशास्त्रपण्डिता आसन् । राजा वृद्धावस्थायां राज्यं विभज्य वानप्रस्थमगृह्णात् । सर्वेषु कनिष्ठपुत्रविक्रान्तं मन्त्री अवबोधयामास यत् अथर्ववेदरीत्या यज्ञं विधायावशिष्ठचतुर्णां भ्रातृणां निधनं कृतं चेत् सम्पूर्णराज्यं प्राप्स्यति । यज्ञकार्यप्रारम्भ आसीत् परन्त्वस्य सूचनां चत्वारो भ्रातरः प्राप्तवन्तः । अस्मात् हेतोः अस्य यज्ञस्य फलनाशाय द्वितीययज्ञमारेभे । द्वयोर्यज्ञयोः समापनानन्तरं तयोराघातेन प्रत्याघातेन च सम्पूर्णनृपाणां, पुरोहितानां मन्त्रिणामनुचराणां च निधनं जातम् । राजा विपिने इमानि सकलानि धार्मिकघटनान्याकर्ण्य दुःखमप्रकटयत् । सोऽचिन्तयत् यद्येषां पुत्राणां जन्म नाऽभविष्यत् तर्हि

---

१. ब्रह्मपुराणम् २१६.११४-१५.

२. एच० सी० रायचौधरी—बी० सी० ला० कमेमोरेशन वालूम, भाग १, पृ० ८६-६०.

ज्ञायते, यत् तस्मिन् काले ब्राह्मणेषु श्रीधरो विद्वानासीत् । सः तीर्थानां भ्रमणं वेदाध्ययनमध्यापनं चाकरोत् तथा नक्तव्रतस्य, अयाचितस्याचारणमकरोत् । उपवासं कृत्वा भगवतं शिवमपूजयत् । अर्थात् तस्मिन् काले श्रेष्ठब्राह्मणाः शिवमार्चिषुः ।[1] कामरूपे प्रसिद्धानां राज्ञां यावन्तोऽभिलेखाः प्राप्ताः तेषु सर्वेषु शिवस्तुतिर्वर्णिता । अत्राहम् अभिलेखेभ्यः कानिचित् प्रयोजनीयानि एवमावश्यकानि महत्त्वपूर्णस्थलानि, उद्धरणरूपेणोपस्थापयामि । भास्करवर्मणो निधनपुरताम्रशासने—

प्रणम्य देवं शशिशेखरं प्रियं पिणाकिनं भस्मकर्णविभूषितम् ।
विभूतये भूतिमतां द्विजन्मनां करोमि भूयो स्फुटवाचमुज्ज्वलाम् ।।[2]

भास्करवर्मणो दुवीताम्रशासनेऽपि उपर्युक्तश्लोको लभ्यते ।[3] वनमालवर्मणः तेजपुरशासने—

"श्रीमत्कैलासभूभृत्पृथुकनकशिलासञ्चयास्फालानोत्थैरासारैर्हेमपङ्काविलतुहिनकरैः सिक्तवैमानि सार्थः ।"[4] पुनरस्मिन्नेव ताम्रशासने—

स पुनातु पिनाकी वो यच्छीर्षे स्वर्धुनीजलम् ।
कीर्णं रेचकवातेन तारकाप्रकरायितम् ।[5]

वनमालवर्मणः परवतियाताम्रशासने तेजपुरताम्रशासनस्य प्रथमः श्लोकः एवोल्लिखितोऽस्ति केवलं 'तुहिनकरै'रिति स्थाने तुहिनजनैरित्युल्लिखितोऽस्ति ।[6]

वलवर्मणो नवगांवताम्रशासने—

---

१. तीर्थेषु भ्रमणात् श्रुताध्ययनतो दानात्तथाध्यापनात्, ज्ञानां करणाद् व्रतैकचरणात् सर्वोत्तरः श्रोत्रियः । प्रातर्न्नक्तमयाचितोपवसनैर्येन स्वयं गुग्गुलोराकर्षन् वरदः कृतोऽत्र हि कलौ श्रीसोमनाथः प्रभुः ।। इपि० इण्डि० खण्ड २, पृ० ३५३ श्लोक २६ ।

२. कामरूपशासनावल्यां पृ० ८ ।

३. डुबी प्लेट्स आफ भास्करवर्मा—इपि० इण्डि०, खण्ड ३०, पृ० २८७–९८.

४. कामरूपशासनावल्यां, पृ० ५८ ।

५. तत्रैव, पृ० ५९.

६. इपि० इण्डि० खण्ड २९, पृ० १३५ ।

सम्भवतस्तस्मिन् काले साधारणमनुष्येषु शिवाराधनस्य प्राधान्यं नासीत् । राजा राज्यं परित्यज्य वनमगच्छत् । राज्ञः वनगमनं वैदिकधर्मे आस्थायाः प्रमाणमस्ति । तस्य सर्वे पुत्राः अथर्ववेदमन्त्रैरेव तमेव वेदवोधितमभिचारयज्ञमकुर्वन् । इदमपि तेषां जनानां वैदिकधर्मस्य विश्वासं समर्थयति । सम्भवतो राजेत्यादिषु सर्वेषु उच्चव्यक्तिषु शिवपूजाया अधिकः प्रभावो नासीत् । सम्भवतः निम्नकोटिमनुष्येष्वेव शिवपूजा निहिताऽऽसीत् । कालिकापुराणेनापि प्रमाणितो भवति यत् कस्मिंश्चित् काले यदा भगवान् परशुरामः क्षत्रियाणां निधनमकरोत् तस्मिनं समये केचन क्षत्रियाः म्लेच्छानां वस्त्राणि, आभूषणानि च परिधाय जल्पीशशिवसमीपं स्वत्राणार्थमगच्छन् । यद्यपि ते आर्यभाषाभाषिण आसन् तथापि भीत्या म्लेच्छभाषाभवदन्, जल्पीशशिवं चाराधयन्ति स्म । तथा जल्पीशशिवं गोपनीयप्रणाल्याऽरक्षन् । जल्पीशशिवस्य मूर्तेः रक्षा केन हेतुना कुर्वन्ति स्म, अस्य काचित् व्याख्या न कृता । तस्मिन् समये किं शिवोपासना वर्जिताऽऽसीत्, न हि । तर्हि किं तस्य मूर्त्तेः सन्निकटे गमनमसम्भवमासीत् । यतो हि त एव क्षत्रियाः ये म्लेच्छानां भाषां व्यवहृत्य भूषणानि परिधाय न्यवसन् । ते जनसमाजे आगत्य दोषान् विस्तारयिष्यति । अस्य समर्थकः कालिकापुराणे प्राप्यते । कामरूपस्यादिवासिनः किराताः तान्त्रिकरूपेण मद्यमांसाभ्यां शिवमपूजयन् । इमे किराताः कापालिकाः शैवाः कालिकापुराणेऽन्यग्रन्थेषु च म्लेच्छाः कथिताः । शूलपाणेदुर्गोत्सवविवेकग्रन्थे लिखितमस्ति यत्[1]—

सुरा मांसाक्रियाहारैर्जपयज्ञं विना तु या ।
विना मन्त्रं तामसी सा किरातानाम् च सम्मता ॥ १ ॥

भविष्यपुराणे कापालिकानां मद्यस्य, मांसग्रहणस्य च बहूल्लेखो लभ्यते ।[2]

पापसमाचारो न त्वं मरणकारणम् । यदभीष्टं वरं ब्रूहि तत्ते दास्यामि नान्यथा । अयं जल्पेश्वरो देवो जल्पेनाराधितो विभुः ।..................
पश्यतां सर्वदेवानां स्वतनौ संनिवेशितः । तस्मिन् लिङ्गे लयं प्राप्ते नृपे जल्पे वरानने । देवो जल्पेश्वरः ख्यातो देवैरुक्तो महीतले ।

१. शूलपाणिदुर्गोत्सवविवेके, पृ० ३.

२. सुरासवभृतैर्मांसैस्तर्पयेत् परमेश्वरीम् ।
कापालिकेभ्यस्तद्देयं दासीदासजनैस्तथा ॥

भविष्यपुराणे, ४.१३८.९८

स्कन्दपुराणदेवीपुराणधर्मपुराणेष्वपि म्लेच्छानामेवंविधोल्लेखो लभ्यते। पद्मपुराणे किरातानां म्लेच्छानां च विस्तृतवर्णनमुपलभ्यते।[1] इमे जनाः गोमांसं, वाऽन्येषां पशूनां मांसं, लसुनादीनि वस्तूनि खादन्ति स्म। रज्वाकुक्कुरस्य बन्धनं विधायाभ्राम्यन्। रहसि च स्थापितायाः सकलायाः धनराशेर्ययमकुर्वन्। शिशूनां, स्त्रीणां, गवांच हत्यामकुर्वन्। स्वदैहिककामनानिवारणाय परदारान् हठात् अपाहरन्। दुष्टानां संसर्गमकुर्वन्। तेषां स्त्रिय अपि गर्हितकार्याणि कुर्वन्तिस्म। भृत्याश्चापि धर्मच्युता बभूवुः। ध्याने ज्ञाने च सुचिन्तायाः, पवित्रतायाश्च स्थानं नासीत्। हिन्दूनां नीतिरीत्योः तथा देवपितृपुरुषदानधर्मतर्पणश्राद्धेषु विपुलमविश्वासमकुर्वन्। तेऽपि निम्नप्रकृतिकास्तथा क्षुद्रस्वभावशालिनो जाताः। यतो हि ते स्वमातरं भगिनीं च कामयन्ते स्म। तथा बहुक्रोधशीला आसन्। ते स्वकीयान् बालकान् प्रति स्नेहं नाकुर्वन्। तेषां जनानां प्रभावेण समाजस्य सकला व्यवस्था भग्ना जाता। तेषां भाषां बहवो जना अशिक्षन्त, यतो हि ते बहुजीविकोपार्जनदातार आसन्। तेषां प्रभावेण साधारणोऽपि जनः पुराणे वाऽऽगमसंहितायां विश्वासं पर्यत्यजत्। माता पिता भगिनी भ्राता श्रद्धहीना आसन्। ते वर्णाश्रमतथ्याद् दूरं गता आसन्। तेषु सहनशीलताया अभाव आसीत्। स्त्रियोऽपि च पत्युरुपरि श्रद्धारहिता आसन्। श्वश्रूश्वशुराभ्यां घृणां कृतवत्य.[2]।

युगेऽस्मिन् म्लेच्छशब्द ईदृशो विकसितस्तथा प्रभावितो बभूव यत् शालस्तम्भवंशस्य नृपोऽपि स्वं म्लेच्छे कथिते सति बहुसम्मानमनुभवतिस्म[3]। म्लेच्छशब्दो गौरवरहितो भवेत् तर्हि हर्जरवर्मा स्वस्मिन् लेखे तस्योल्लेखं न कुर्यात्। अनेन स्पष्टं भवति यत् तस्मिन् समये म्लेच्छशब्दः सकलं देशं, समाजं चेत्थं प्रभावितमकरोत् यत् सर्वे जना म्लेच्छभवनायोत्साहिता आसन्। कालिकापुराणानुसारेण नरकागमनात् प्राक् कामरूपस्याधिष्ठातृदेवो भगवान् शिव आसीत्। यः कामरूपराज्यं स्वशासनायारक्षत्। यद्यपि वैष्णवराजो नरकः कामरूपात् शैवधर्मं दूरीकर्त्तुं बहुप्रयासं कृतवान् तथापि शैवधर्मः

१. पद्मपुराण—ए स्टडी, डॉ० अशोकशास्त्री, पृ० ४२-४३.

२. पद्मपुराणे सृष्टिखण्डे—७४. १-५५ श्लोकपर्यन्तम्।

३. अतो म्लेच्छाभिधानास्तु भविष्यास्तव पार्थिव—हर्जरवर्मा, हाइयून्थलताम्रशासने—कामरूपशासनावल्यां, पृ० ४८.

कामरूपस्य साधारणमनुष्येषु ईदृशो व्यापक आसीत् यत् ते जना गुप्तरीत्या शिवोपासनामकुर्वन्। नरकानन्तरमेव पुनः शैवधर्मः स्वं स्थानमगृह्णात्। अस्मात् हेतोर्नरकप्रयासोऽसफलो जातः। तस्मिन् समये शिवविरोधिनं नरकं हन्तुं प्रयासोऽपि प्रारम्भ आसीत्। कालिकापुराणे निम्नलिखिते उपाख्याने अस्य प्रमाणमुपलभ्यते।

कामरूपस्य सन्निकटे शोणितपुरे बाणनामा कश्चित् नृप आसीत्। यः शिवभक्त्या ईदृशीं शक्तिं प्राप्तवान् यत् निर्भयो भूत्वा इतस्ततो बभ्राम। तेन सह नरकस्य मैत्री बभूव। नरकश्च बाणस्याचारेण, आचरणेन चातिप्रभावितो बभूव। तस्मिन्नेव काले मुनिवशिष्ठस्तत्रागतः। नरकः पारुष्यशब्दानुच्चार्य बहिर्निष्कासयत्। वशिष्ठः कुपितो भूत्वा नरकं शापितवान् यत् किंचित् कालानन्तरं भगवान् विष्णुः मानवशरीरं धृत्वा त्वां हनिष्यति। तस्मिन् काले कामाक्षादेवी गुप्ता भविष्यति[1]। नरकनिधनानन्तरमेवाहमत्रागमिष्यामि, इति शापं दत्वा वशिष्ठः स्वाश्रमं गत्वा भगवतः शिवस्याराधनं कर्तुमारेभे। वशिष्ठगमनानन्तरमेवातिशीघ्रमेव नरकः कामाक्षादेव्याः मन्दिरं जगाम तत्र चापश्यत् यत् कामाक्षादेवी स्वसकलैश्वर्येण सहादृष्टा बभूव। व्याकुलीभूय नरकः स्वमित्रं बाणमाह्वयामास तथा सम्पूर्णविवरणमकथयत्। बाणप्रदर्शितसाधनैर्नरकः विष्णोः, इन्द्रस्योपरि च क्रोधं कृतवान्। बाणोऽवदत् यदिन्द्रोऽतिक्रूरो देवोऽस्ति यः कस्यचिदैश्वर्यं सोढुं समर्थो न भवति। स बाणः स्वक्रूरतया कुशलतया च सह नरकविनाशं कामयांचकार। विष्णुः सदा इन्द्रेण पूजितो भवति। अतः विष्णुरिन्द्रस्य सहायतां करिष्यति। कश्चित् जनः विष्णुं संसेव्य इन्द्रं जेतुं समर्थो न भवितुं शक्नोति। यद्यपि विष्णुर्नरकस्यापि देवताऽस्ति तथापि तस्योपरि विष्णोः कृपा, सहानुभूतिश्च नासीत्। नरकस्य माता विष्णोः पूजां कृतवती। यत् नरको यावत् कालं ब्राह्मणानामुपरि अत्याचारं न कुर्यात् तावत् नरकः कल्याणं प्राप्नुयात्। अस्मिन् वशिष्ठस्य न कश्चिद्दोष आसीत्। बाणः मित्रं नरकमवोचत् यत् त्वं ब्रह्मशिवयोरुपासनां कुरु। नरको बाणोपदेशं स्वीकृत्य ब्रह्मशिवयोरुपासनां प्रारभत। तस्य राज्ये शिवस्य गुप्तरूपेण पूजा भवतिस्म। नरकः तपस्यया ब्रह्मणः वरमलभतः। दृढतया स्वराज्यमरक्षत्। बाणकथनानुसारेण स इन्द्रस्य ब्राह्मणानां चोपरि विपुलमत्याचारमकरोत्। प्राक् स देवतानां, वा ब्राह्मणानामुपरि निष्ठा-

---

१. कालिकापुराणे, ३८.९६.

वानासीत्। किन्त्वधुना तस्य मनसि आसुरीभावनायाः अत्याचारस्य च प्रवृत्तिर्जाता। किंचित् कालानन्तरं भगवान् विष्णुः कृष्णरूपं धृत्वा युद्धे नरकं जघान। युद्धकाले सः कृष्णसमीपे कालिकेव कालिकाया मुखमपश्यत्। यतो हि रक्तवर्णनेत्रा, विशालकाया, हस्ते कृपाणंच धारयन्ती कामाक्षादेव्यासीत्। नरको जगत्प्रसविनीं कामाक्षादेवीमवलोक्य, आश्चर्यान्वितस्तथा भयपूर्णो भूत्वा इत्थमचिन्तयत् यत् युद्धकरणमुचित्तमस्ति न वा। विचार्येदं युद्धमकरोत्, कृष्णश्च सुदर्शनचक्रेण तमवधीत्।[1] अतः परं कामरूपस्य सामाजिकस्थितिस्तथा शैवधर्माभावः कीदृश आसीत् अस्योल्लेखः कालिकापुराणे न लभ्यते। योगिनीतन्त्रानुसारेण नरकनिधनानन्तरं तस्मिन् देशे बह्व्यो विपत्तय आगताः। यवनकुवाचसोमारप्लवाः तस्मिन् देशे शासनकुर्वन्।

किन्तु तथ्यमिदमस्ति यत् नरकानन्तरं कामरूपे वामाचारशैवस्य अर्थात् कापालिकशैवधर्मस्य शनैः शनैः प्राबल्यमभवत्। कालिकापुराणस्यैकस्याख्यानस्यानुसारेण कामरूपस्य महापीठः सर्वासु नदीषु च पवित्रतम आसीत्। तत्र यः अम्रियतः स शिवलोकमगच्छत्। अनेन कारणेन मृत्युराजयमस्य जनाः कार्यरहिता बभूवुः। शनैः शनैः पापिष्ठजनैः परिपूर्णो जातः कामरूपदेशः। अनया घटनया भगवान् ब्रह्मा विष्णुश्च चिन्तितौ भूत्वा शिवसमीपमगच्छताम्। यमलोके च मनुष्याणां न्यूनतायाः कारणमवोचत्। ब्रह्माविष्णुश्च महादेवं न्यवेदयत् यत् यमस्य कार्यमपि स्थगितं न स्यात्, भवानपि च समुचितप्रणाल्या कामरूपस्य प्राधान्यं विस्तारयेत्। महादेवो भगवतोः ब्रह्मविष्ण्वोः कथनं स्वीकृत्य स्वगणान् देवीमुग्रतारां चाज्ञापयत् यत् भूयः पावनपीठस्थानात पापिष्ठजनान् दूरं कुरुत। आदेशानुसारेण गणाः, देव्युग्रतारा च स्वस्वकार्यं कर्त्तुमारेभिरे। तस्मिन् समये ब्राह्मणा अपि तस्मात् पवित्रस्थानात् निष्कासिता जाताः। यदा उग्रतारा वशिष्ठं निष्कासयितुमगच्छत् तदा वशिष्ठः शापं ददौ यदहं मुनिरस्मि। त्वं स्वमातृगणैः सह मां निष्कासयितुमागच्छसि। अस्मात् कारणात् अधुना यूयमत्र वामाचारविधिना पूजिता भविष्यथ। तथा भवत्याः गणा ये म्लेछानामिव पर्यटयन्ति ते सर्वे कामरूपे म्लेछा भविष्यन्ति। भगवान् शङ्करो यो नरकङ्कालं धत्ते, भस्मना शरीरमाच्छादयति च स एव म्लेच्छैः पूजितो भविष्यति।[2]

---

१. कालिकापुराणे, ४०.१-१०६.

२. कालिकापुराणे, ८१.२१-२५.

तत्पश्चात् पुनर्वशिष्ठोऽवदत् यावत् कालं भगवान् विष्णुः स्वयमेव नागच्छेत् तावत् कालं म्लेच्छैः कामरूपक्षेत्रं पूरितं भवेत् । कामरूपमहत्त्व-प्रदायकेषु सर्वेषु मन्त्रेषु तन्त्रेषु च वह्व्यः त्रुटयो भवेयुः । कामरूपमहत्त्वप्रदान-कर्त्तारः पण्डिताः स्वल्पाः भविष्यन्ति । अन्ते त एव पण्डिताः सकलं फलं ग्रसिष्यन्ते । उच्चार्येदं वशिष्ठोऽन्तर्हितोऽभवत् । सुरालये कामरूपपीठे 'प्रम्थोस' म्लेच्छो बभूव । उग्रतारा वामा जाता । महादेवो म्लेच्छरतो बभूव । कामरूपमहत्त्वप्रतिपादकानां मन्त्रतन्त्राणां प्रचारोऽतिन्यूनो बभूव । वशिष्ठ-शापात् शीघ्रमेव कामरूपो वेदमन्त्रेण हीनः चतुर्वणन शून्यो जातः । यदा भगवान् अत्रागमिष्यत् तदा कामरूपपीठः शापमुक्तोऽभविष्यत्, फलप्रदश्च भविष्यति । तथापि देवास्तथामनुष्याः पूर्ववत् तस्य महत्त्वं न वेदिष्यन्ति[1] । ब्रह्मा वशिष्ठमुनेः शापविमोचनाय कानिचित् साधनान्यवोचत् । ब्रह्मा एता-दृश्याः व्यवस्थाया अवलम्बनमग्रहीत् यद् वशिष्ठशापमुक्ता अनन्तरमपि यत् शिवमन्दिराणि मनुष्यैरगम्यानि भविष्यन्ति । शान्तनोः, तस्य पत्न्यामोघायां च ब्रह्मपुत्रनद्यारुत्पत्तिर्वभूव । ईदृशं ब्रह्मपुत्रनद्याः प्रवाहं ब्रह्मा परशुराम-कुठारेणोत्पादयामास । कामरूपस्योपरि ब्रह्मपुत्रस्य सम्पूर्णा जलराशिः प्रवाहिता बभूव, यथा जलराश्या सम्पूर्णः कामरूपो प्लावितो बभूव । तेन जलेन काम-रूपस्य सकलानि पवित्रस्थानानि समुद्रे समाहितानि बभूवुः अनेन हेतुना काम-रूपस्य पृथक् पृथग् देवमन्दिराणां पवित्रस्थानानां च ज्ञानमसम्भवं जातम् । यदि कस्यचित् मनुष्यस्य तीर्थदर्शनस्य विशेषभावना भवेत् तर्हि स ब्रह्मपुत्र-नद्यां स्नात्वा तस्य तीर्थदर्शनस्य फलं प्राप्तवान् ।

ब्रह्मण इदमुपाख्यानं यत् कालिकापुराणे कथितमस्ति, तेन वामाचार-कापालिकशैवधर्मस्य प्रभावः परिलक्ष्यते । इदं प्राक् कथितम्, कामरूपस्यार्ये-तरप्राणिन आर्याश्च वामाचार्याणां, कापालिकशैवानामाचारं, अनुष्ठानं चा-कुर्वन् । उग्रताराया: अपराजिततान्त्रिकबौद्धधर्मस्यापि प्रतिष्ठाता देव्यः सन्ति । इमा अपि शैवधर्मे मिलिताः अर्थात् तान्त्रिकबौद्धधर्मस्य प्रभावो बहु-रूपेण शैवरूपे मिलितः । काचित् चेष्टा बभूव यत् आर्याः अस्य तान्त्रिक-धर्मस्य, कापालिकशैवधर्मस्य च प्रभावात् मुक्तो भवेयुः । वामाचारशैव-मन्दिरेषु, आर्याणां गमनं निषिद्धं बभूव । केनचित् कारणेनैव वशिष्ठस्य शाप-

१. कालिकापुराणे, ८२.२६-३१.

कथा शिवेन सह संलग्ना जाता। ब्रह्मणः प्रभावेण ब्रह्मपुत्रनद्याः प्रतिष्ठा ब्रह्मपुत्रनद्याः वर्द्धितेन जलेन कामरूपस्य खण्डप्रलयः सम्भवतः प्राकृतिकजलोच्छ्वासं संकेतयति। अस्मिन् प्रसङ्गे केप्टन जानअर्गर्नेन्यूवल्लेज 'दी ज्योग्राफि एण्ड पापुलेशन आफ आसाम' ग्रन्थे लिखितमस्ति यत् राजेश्वरस्य राजत्वकाले सम्भवतः पंचाशत् वर्षाणि प्राक् अकस्मात् विहगात् जलातिशयवृद्धिरागता, यथा सम्पूर्णदेशः प्रवाहतां गतः। एवं तस्यास्तीव्रधारया सर्वे ग्रामाः मण्डलाश्च प्लाविता बभुवुः।

अस्याः प्रभाव ईदृशो भयंकर आसीत् साधारणतया देशस्य भौगोलिकस्थितिः एवं नद्याः गति परिवर्त्तिता बभूव। इयं जलातिशतवृद्धिः पंचदशदिनं यावत् बभूवुः। यया कर्षकाणां गृहस्थानां चावश्यकसामग्रचः नष्टा जाताः। बहवो हस्तिनोऽपि प्रवाहिता बभूवः। सामाजिकदृष्ट्या शिक्षितस्य, सम्यजातेश्च, मुख्यकार्यं कृषिः, पशुपालनं वासीत्। अस्या जातेर्बह्व्यः सामग्रचः अनया जलातिशयवृद्ध्या समाप्ता बभूवुः[1]। जलातिशयवृद्धेरीदृशीकथा समये समये आगत्य बह्वंशं नियोजितवती, बहुप्रचलिता अस्ति। सम्भवत एतादृश्याः घृणायाः कथा ब्रह्मणा सह संयुक्ता कृता।

शैवधर्मेण सह वामाचारकापालिकस्य सम्मिश्रणमाधुनिकं नास्ति। महाभारतकालेऽपि चैतादृशी कथा प्रचलिताऽऽसीत्। महाभारते वयं पश्यामः यद् मगधराजो जरासिन्धुर्विपुलां शत्रुसेनां बन्दीकृत्याऽनेनोद्देश्येनानयतिस्म यदहं शिवसन्निकटे तान् हनिष्यामि। तेषां रुधिरेण च शिवं पूजयिष्यामि।[2] शिवः ऋषिपत्नीभिः, कन्याभिश्च सह व्यभिचारं करोति स्म। स्पष्टतया

---

१. एशियाटिक रिसर्चेज, खण्ड १६, १९२८, पृ० ३४४-३४५।

२. जे० म्यूर—ओरिजिनल संस्कृत टेक्स्ट, खण्ड ४, १८६३, पृ० २४५—

महाभारतसभापर्वणि—एवं सर्वान् वंशे चक्रे जयसन्धः शतावरान्।
तं दुर्बलतरो राजा कथं पार्थ उपेक्ष्यति॥
प्रोक्षितानां भ्रमिष्ठानां राज्ञां पशुपते गृहे।
पशुनामिका का प्रीतिजीविते भरतर्षभ॥

अस्मिन् नीलकण्ठः स्वटीकायामवदत् प्रमिष्टानाम् रुद्रदेवताकायाम् इति प्रत्येकं अभिमिष्टानाम्।

नग्नो भीषणो महाशेफश्च भूत्वा ताभिः कन्याभिः सह निवसति। तन्त्रे शिवस्यैकस्य रूपस्य महाभैरवस्योल्लेखो लभ्यते। अस्मिन् रूपे शिवो मद्यस्य, मांसस्य, स्त्रीणां च भोगमिच्छानुसारेण करोति। कालिकापुराणे विष्णोरेकस्य बालगोपालरूपस्योल्लेखोऽस्ति। बालगोपालोऽप्ययं महाभैरवेण सह समुपलभ्यते। अस्य बालगोपालस्य रुचिर्मद्यमांसयोरस्ति।

कालिकापुराणे योगिनीतन्त्रे च देवरूपापेक्षया भैरवरूपस्याधिकोल्लेखोऽस्ति। भैरवरूपे च प्रकाशः, माहात्म्यं प्राप्यते। अनेन कारणेन शिवमन्दिरेषु वामाचारशिवधर्मस्याधिकः प्रचारो बभूव।

आसामेतिहासस्य सर्वेषु युगेषु स्वतन्त्ररमणीनामर्थात् गणिकानां बहूल्लेखो लभ्यते। वनमालस्य तेजपुरशासने 'दलहांगना' इति पदं वर्तते। सम्भवतः दलहांगना, इति पदस्यार्थस्य सम्बन्धस्तादृशीभिः स्त्रीभिः सहास्ति याः शिवमन्दिरे उषित्वा मनोरञ्जनं कृतवत्यः। यासां चरित्रं देवदासीवासीत्। पुनस्तस्मिन्नेव शासने वर्णितमस्ति यत्—

धूर्हे नहुषस्य येन पतितं कालान्तरादालयं
सौधं भक्तिनता खिलामरवरव्रातार्चिचताऽङ्घ्रेः पुनः।
प्रालेयाचलशृङ्गतुङ्गमतुलग्रामेभवेश्याजनै-
र्युक्तं हाटकशूलिनः क्षितिभुजा भक्त्या नवं चक्रुषा॥[1]

अनेन स्पष्टमस्ति यत् वनमालदेवो हाटकेश्वरमहादेवस्य मन्दिरस्य निर्माणं कारयामास, यत् समयप्रभावात् ध्वस्तं जातम्। यत् हिमालयस्य शृङ्गैरिवोच्चं तथा येन बहुग्रामाः प्रजा हस्तिनो गणिकाश्च सम्बन्धिता आसन्। ईदृशं भक्तिमन्दिरं निर्माय राजा नहुषः इव यशस्वी बभूव। अहोमराजाणां राजप्रासादे रक्षितया, समुपलब्धवशतालिकया न ज्ञानमिदं जायते यत् आसामस्य तेजपुरस्य मन्दिरात् तस्मिन् काले बंगालमुस्लिमसम्राजः सेनापतिसत्तराजितः वेश्यानां तथा नृत्यगीतनिष्णातानां स्त्रीणां हठात् स्वाधीनीकृत्य मुस्लिमसम्राजपहाररूपेण अर्पितवान्।[2]

इत्थं कल्प्यते यत् अहोमराजसिंहो यः १७१४ तः १७४४ ई० पर्यन्तं

---

१. कामरूपशासनावल्यां, पृ० ६२.
२. आसाम बुरुञ्जी, पृ० ८२-८३.

आसामप्रान्ते राज्यमकरोत् तस्य प्रधानमहिषी फूलेश्वरी सम्भवतः विवाहात् प्राक् शिवमन्दिरे अनृत्यत् अगा ीत् च। एकदा शिवसिंहः पूजार्थं तत् मन्दिरं गतः तत्र तस्याः नर्त्तक्याः सौन्दर्यं क्लिन्नं दृष्ट्वा मुग्धो जातः। तथा स्वराज्ये नीत्वा विवाहमकरोत्।[1] आर० के० वरदालोई लिखिते रहादोर्यलिगिरीशिवमन्दिरे व्यभिचारस्य वह्व्यो घटनाः समुपलब्धाः सन्ति। जनजातिषु शिवपूजनविधिविषये कोचराजाणां वंशगतेतिहासे केचन ईदृगाचाराः सन्ति। तत्रेदं कथितं यत् कोचविहारस्य राजा नरनारायणदेवो यदाऽहोमवंशराजभिः युद्धं कर्तुमगच्छत् ततः प्राक् शास्त्रविधिना शिवमपूजयत्। तदा तस्य कछारीसंघसैन्यस्य जनाः स्वस्वप्रथानुसारेण शिवाराधनमावश्यकमित्यकथयन्। अन्ततो गत्वा नरनारायणस्तस्य कछारीसैन्यस्य कथनं स्वीकृतवान्। तथा शूकरमहिषहंसकुक्कुटादिभिः शिवपूजा सम्पन्ना जाता। तस्मिन् समये तण्डुलाः मद्यानि यथेच्छं प्रदीयन्ते। देवदासीनां माधुर्यपूर्णं नृत्यं बभूव तथा तासामुपभोगोऽपि आसीत्। किंचित् कालानन्तरं अयमेव जनजातेः पूजाक्रमो नरनारायणेन तथा तस्यानुजेन भ्रात्रा चिल्हारायी-नामधेयेन स्वीकृतः। तादृग् आचरणं विना विधिना मान्यं नासीत् अर्थात् तस्याः पूजाया मान्यता प्रदत्ता। तस्मिन्नेव काले नरनारायणः एकं शिलालेखं प्रसारितवान्। तत्रकथितमस्ति यत् ब्रह्मपुत्रनद्यारुत्तरभागे महादेवस्य ईदृश्याः पूजाया निर्देशो दत्तः।

अधुनाप्यासामस्य शिवमन्दिरेपु पशुहत्यायाः परम्परा प्रचलति। शिवरात्रिपर्वणि अजनिःश्वासमवरुध्य तस्मिन्नेव देवालये स हन्यते तथा तस्य पललं पक्त्वा वहवो जना भक्षयन्ति। अस्य व्यतिक्रमो केवलं कामाक्षामन्दिरे प्राप्यते। तत्र निःश्वासावरोधं विना बलिर्दीयते स्म यथाऽन्येषु प्रान्तेषु बलिदानस्य प्रथा प्रचलिताऽस्ति। अतो मद्यस्य, पललस्य, स्त्रीणामिच्छानुसारोपभोगः शिवपूजाया एको वरिष्ठोऽङ्गोऽभवत्। येनान्यायरूपेण व्यभिचारस्य, परस्त्रीगमनस्य च वृद्धिर्जाता। मनुष्याणां दृष्टिरस्मिन् आकृष्टा बभूव यत् प्रयासेन विना वामाचारमार्गेण कैवल्यं सुगममेव। अस्मात् हेतोः ते, इदमेवोपयुक्तशासनं मन्यन्ते स्म। किन्तु देशे भ्रष्टाचारव्यभिचारयोर्महत्या वृद्ध्या मृत्युदेवो यमराजस्तान् प्रति क्रुद्धो बभूव। तथा वहुमृत्युविधानानि निर्माय इमान् व्यभिचारिणोऽवधीत्। ब्रह्मचर्यगार्हस्थवानप्रस्थसन्न्यासैश्चतुर्भिराश्रमैः

१. दी मदर गाडेस कामाख्या, पृ० २२.

नियोजितानां तथा नियन्त्रितानां मनुष्याणां शिवमन्दिरेषु गमनं निषिद्धमभूत्।

किन्तु नास्मिन् मतद्वयं यदाधुनिकयुगेऽपि कामरूपेऽन्यदेवीदेवतानां मन्दिराणामपेक्षया शिवमन्दिराणां संख्याऽधिकाऽस्ति। परन्त्वाधुनिकयुगे आसामे प्रचलितशैवधर्मः केन्द्रितो बभूव, यतो हि तस्य कार्यक्षेत्रं शिवमन्दिरम् एव जातम्। शिवस्योत्सवोऽनुष्टानं च मन्दिरात् वहिर्नावलोक्यते। अस्मिन् युगे आसामप्रान्ते कस्यचित् शैवगुरोरुल्लेखो नोपलभ्यते। शैवधर्मदीक्षितसम्प्रदायस्य संख्या विरलैवाऽस्ति। अनेन प्रकारेण प्रख्यातशिवमन्दिराणां, देवदासीनां चाख्या वर्तमानयुगे नटे नास्ति। ते शनैः शनैः गृहस्थधर्मं पालयन्तः गृहस्थाः बभूवुः। तथा शिवमन्दिरेषु शिवस्य विशेषोत् सवेषु व्रतानुष्ठाननृत्यगीतादिषु सक्रियक्रियाकारिण्यः ताः स्त्रियः सम्प्रति न जाताः। परन्त्विदानीम् तज्जातीनां पुरुषा एव इदृक् कार्यं कुर्वन्ति। अस्यां जातौ काश्चित् काश्चित् देवदासयः पूर्ण गणिका जाताः, तया जात्या च तथा शासनस्य स्वीकारेण गणिकावृत्या स्वजीविकां परिपोषयन्ति।

ऐतिहासिककालादेव शैवधर्मस्योन्नतिः समग्रे कामरूपे दृश्यते। यथा—कालिकापुराणे योगिनीतन्त्रे चास्योन्नतेः प्रमाणानि सन्ति। तथैव तस्मिन् समये कामरूपे प्रचलितेषु प्रसारितेषु अभिलेखेषु ताम्रपट्टेषु वहूनि प्रमाणानि प्राप्यन्ते। वनमालस्य तेजपुरताम्रशासने कथितमस्ति यत् भगदत्तः श्रीसम्पन्नस्य प्राग्ज्योतिषपुरस्याधिपतिर्बभूव तथा बहुविनयेन तपस्यया च शिवाराधनमकरोत्। मूललेखेऽस्ति—

सम्प्राप्तो भगदत्तः श्रीमत् प्राग्ज्योतिषाधिनाथत्वम्।
विनयभरेण तदेत्थ प्राराधयदीश्वरं तपसा॥[1]

स्मर्तव्योऽयं यत् भगदत्तः कामरूपराज्यं कृष्णाशीर्वादेन प्राप्तवान्। तथा सः कठोरेण तपसा शिवोपासनायां व्यस्त आसीत्। वैद्यदेवस्य कमऊलीताम्रशासने

---

१. वनमालतेजपुरताम्रशासने श्लोक ५। जर्नल आफ दी एशियाटिक सोसाइटी आफ बंगाल, खण्ड ९, १८४०, पृ० ७६६। केचन विद्वासः श्लोकेऽस्मिन्नुल्लिखितेश्वरशब्दं श्रीकृष्णवाधकं मन्यन्ते। किन्तु कोषे स्पष्टोल्लेखोऽस्ति यदीश्वरशब्दो महादेवस्य द्वितीयो नामाऽस्ति। यथा—ईश्वरः सर्वं ईशानः शंकरश्चन्द्रशेखरः

पुत्राणां निधनं नाऽभविष्यत् । वहुशोकाकुलो भूत्वा ऋषिवशिष्ठसन्निकटं गत्वा स्वकीयां दुःखदायिनीं कथाभवोचत् । आकर्ण्येदं वशिष्ठोऽतिक्रुद्धो वभूव निवारणाय च महत्तपः कर्तुमवदत् । सकलान् क्षत्रियान् व्यापाद्य तत्र भगवान् परशुरामः तपस्यामकरोत् । तस्मिन् महाकालारण्ये गच्छ त्वं, तथा कुक्कुटेश्वरस्य पश्चिमदिशि यदनादिलिङ्गमस्ति तत् पूजय । राजा जल्पो वशिष्ठकथानुसारेण कुक्कुटेश्वरसन्निकटे गत्वा अनादिलिङ्गस्य विधिना पूजां कर्त्तुमारभत[1] । वहुकालानन्तरमस्यानादिलिङ्गस्याभ्यन्तराद् आकाशवाणी श्रुता, यत् राज्ञः पुत्राणां मृत्योः करणम् भाग्यमेवाऽस्ति नान्यत् कारणं । अनेन प्रकारेण पापाद्-मुक्तोभूत्वा विलक्षणकीर्तिसम्पन्नो राजा भविष्यति इत्थं वरं प्राप । तदा सर्वे देवाः मनुष्याः धर्मात्मानं राजानमपश्यन् सदैव राज्ञः शरीरं तस्मिन्ननादि लिङ्गे विलीनं वभूव[2] । अस्याः कथायाः विस्तृतलेखनस्य किंचित् कारणमस्ति ।

---

१. आसाम बुरंजी—पृ० ३९-४६.

२. अवन्तिखण्डस्य पञ्चमाध्यायात् कश्चिदंश उपस्थाप्यते—जल्पो नाम महादेवि राजाभूद् भुवि विश्रुतः·········सुबाहुप्रमुखाः पंचपुत्रा जाता महाबलाः । तस्य राज्ञो वरारोहे मूर्त्ताः पंचाग्नयो यथा । सुबाहुः शत्रुमर्दी च जयो विजय एव च । विक्रान्तः पंचमः पुत्रः सर्वे शस्त्रास्त्रपारगाः । पित्रा जल्पेन ते राज्ञा पृथग्राज्ये प्रतिष्ठिताः ·······················विक्रान्तस्य च यो मन्त्री विपत्त्यैकपरायणः । तेनोक्तं विजने देशे विक्रान्तस्य महीभृतः । यस्यैषा पृथिवी कृत्स्ना स समर्थः प्रकीर्तितः । उद्यमेन यथा लब्धं वासवेन महात्मना । ············तथेति च प्रतिज्ञाते विक्रान्तेन महीभृता । स मन्त्री कारयामास अभिचारविधिं तदा, अथर्वणेन मन्त्रेण पुरोधाः प्रचकार ह । ज्ञातं पुरोहितैस्तेषां तेऽपि चक्रुः समाहिताः । कृत्या समुत्पन्ना पश्चात् कृत्याना चतुष्टयम् । सप्ररोहितभृत्यांस्तानग्रसंस्तु समं तदा ।················ततः श्रुत्वा च निधनं पुत्राणां जल्पको नृपः । वने वशिष्ठं पप्रच्छ किमेतद् भगवन् प्रभो···············भगवन् ब्रूहि मे तीर्थमवियोगकरं सदा । सद्यः पापहरं विप्र लिङ्गं च कथय प्रभो···············। गच्छ जल्प ममादेशात् महाकालवनोत्तमम् । कृत्वा निःक्षत्रियां पृथ्वीं यत्र रामस्तपस्यति । तत्र लिङ्गमनाद्यं च कुक्कुटेश्वरपश्चिमे । तदाराधय राजेन्द्र जामदग्न्याश्रमे स्थितः···············। तत्र वाणी समुत्पन्ना लिङ्गमध्याद्वरानने । न त्वं

भवतु भवतिमिरभिदुरन्तेजो रौद्रप्रशान्तये जगतः ।
कैलासकटकमृगमदवासितमपहरतु दुरितं वः[१] ॥

पुनरस्मिन्नैव ताम्रशासने लिखितोऽस्ति । यत्—

तस्यात्मजः श्रीवनमालदेवो राजाचिरं भक्तिपरो भवेऽभूत्[२] ।

पुनरस्मिन्नेव ताम्रशासने—

क्षत्रं शशधरधवलं चामरयुगलान्वितं प्रदायास्मै ।
अनशनविधिना वीरास्तेजसि माहेश्वरे लीनः[३] ॥

रत्नपालस्य वड़ागांवताम्रशासने—

द्रष्टेव प्रतिबिम्बकैर्न्नखगतैः स्वैर्नृत्यसम्पद्विधैः
सौवश्वीवर्गति शुभां प्रकटयन् दृश्यो निशन् ताण्डवीम् ।
एवं यत् परमात्मवत् पृथुगुणो ह्येकोऽप्यनेको भवन्
प्राकाम्यन् दधदेव भाति भुवने स स्तात् श्रिये शङ्करः[४] ।

शक्तिः शुभास शाङ्करी[५] कैलासगिरिशिखरमिव परमेश्वराधिष्ठानं[६] । कैलासकरिट्टकूल[७] । इन्द्रपालस्य गौहाटीताम्रशासने—

खट्वाङ्गं परशुर्व्वृषः शशिकलेत्यादि त्वदीयं मया
सर्व्वस्वं जितमद्य नामकितव प्रत्यर्पितं ते पुनः ।
प्रेष्या केवलमस्तु मे जलवहा गङ्गेति गौरीगिरा
शम्भोर्द्यूतकलाजितस्य जयति व्रीडाविनम्रं शिरः[८] ।
सम्बाधा वसुधा सुधाधवलितैः शम्भुप्रतिष्ठास्पदै-
र्यस्य श्रोत्रियमन्दिराणि विभवैर्न्नानाप्रकारैरपि ।[९]

---

१. कामरूपशासनावल्यां, पृ० ७३.
२. तत्रैव, पृ० ७५.
३. तत्रैव, पृ० ७६.
४. तत्रैव, पृ० ९१.
५. तत्रैव, पृ० ९२.
६. तत्रैव, पृ० ९६.
७. तत्रैव, पृ० ९७.
८. तत्रैव, पृ० ११७.
९. तत्रैव, पृ० १२०.

इन्द्रपालस्य गुआकूचीताम्रशाने गौहाटीताम्रशासनस्य प्रथमः श्लोको लिखितोऽस्ति ।[१] वर्मपालस्य सुमंकरपाटकताम्रशासने—

वन्दे तमर्द्धयुवतीश्वरमादिदेवमिन्दीवरोरगफणमणिकण्ठबन्धं ।
कङ्कपीनकुचकुङ्कुमभस्मभिन्नं शृङ्गाररौद्ररसयोरिव सर्गमेकं[२] ॥

धर्मपालस्य खोनमुखताम्रशासने—सुभंकरपाटकताम्रशासनस्यैव प्रथमः श्लोक उल्लिखितोऽस्ति हर्जरवर्मणस्तेजपुरताम्रशासने—'परममाहेश्वरः ।'[३] उल्लिलितोऽस्ति । एषामभिलेखानां पठनेन ज्ञायते यत् सर्वे राजानः स्वान् परममाहेश्वरः[४], महावाराहः[५], श्रीवाराहः[६] इति कथयन्ति । जर्नल ऑफ दी आसाम रिसर्च सोसाइटी—इपिग्राफिया इण्डिका कामरूपशासनावल्याः प्रामणिकैश्चिभज्ञयिते यत् तेषां सर्वेषां प्रारम्भे एकस्याः आङ्ग्लभाषायाऽ (एम) वर्णैरिव एको वर्णो मिलति ।[७] य आन्जी कथ्यते । महामहोपाध्यायपद्मनाथभट्टाचार्येण इयमांजी सुषुम्नानाड्याभ्यन्तरस्य सर्परियं कुलकुण्डलनीशक्तिरिति कथिता[८] । मूलाधारे रक्षितशम्मुलिङ्गेभ्यो वेष्टितश्चक्राकारशिवः शक्तिर्वाऽस्ति । सैव कुलकुण्डलिनी बोध्यते ।

तस्मिन् समये शैवधर्मो बहुप्रतिष्ठितस्तथा विभिन्नासु शाखासु कामरूपे प्रचलित आसीत् । अस्य प्रमाणं कामरूपस्य विभिन्नेषु ताम्रशासनेषु समुपलभ्यते । भगवतः शिवस्य बहुनामानि मिलन्ति । यथा—परमेश्वरः[९]

---

१. कामरूपशासनावल्यां पृ० १३३.

२. तत्रैव, पृ० १५०-१५१.

३. इपि० इण्डि०, खण्ड ३०, पृ० २०५-२०६.

४. कामरूपशासनावल्यां, पृ० १८७.

५. तत्रैव, पृ० ५०, १८७, ६४.

६. तत्रैव, पृ० ११७.

७. तत्रैव, पृ० १५४, १७४.

८. पी० एन० भट्टाचार्य—महादेव दी इष्ट देवता ऑफ दी कामरूप, जर्नल ऑफ आसाम रिसर्च सोसाइटी, खण्ड २, पृ० १०६.

९. निधनपुरताम्रशासने—कामरूपशासनावल्यां पृ० ११.

माहेश्वरः[1], ईश्वरः[2], महावाराहः[3], आदिदेवश्च[4]। शिवस्यैभिर्व्यापकैर्विशिष्टैश्च नामभिः सर्वदेवानामपेक्षयाऽस्य प्रतिष्ठा स्वतन्त्रता च प्रतीयते। तस्य चरित्र-प्रतिपादकानि किंचित् नामानि लिखितानि सन्ति। यथा—कञ्चित् नाम मङ्गलकारकं प्रतीयते। उदाहरणाय शम्भु[5]शङ्कर[6]प्रजाधिनाथरुद्र[7]नामभिः तस्य चरित्रस्य भयावहरूपं सूच्यते। इदं बलवर्मणो लेखेन ज्ञायते[8]। हाटके-श्वरः[9], हरः[10], कामेश्वरः[11], कितवः[12], अलयुवतीश्वरः[13], पशुपतिः[14], गौरीपतिः[15], सोमनाथ आदि। इयं नामावली शिवकथासंयुक्ताऽस्ति। कालिकापुराणे योगिनीतन्त्रे च साधारणत्रेवत्या, तथा ईश्वरापेक्षया पूर्णभैरवः कथितः।

शिवस्य वैशिष्ट्यप्रतिपादकास्तथा माहात्म्यपरिचायिकाः सर्वाः संज्ञाः सम्पूर्णकामरूपे व्यापकरूपेण प्रतिष्ठिता आसन्। कामरूपे, एकस्मात् प्रान्तादन्यस्मिन् प्रान्ते साधारणतया जनसमाजस्य प्रत्येकक्षेत्रे शिवप्रभावो व्याप्त आसीत्। तस्य समयस्य प्रचलिताभिलेखा न कैवलं शिवनाम्नामेव

---

१. वलवर्पणो नवगनंवताम्रशासने—कामरूपशासनावल्यां पृ० ७६।
२. वनपाल—तेजपुरशासनं—कामरूपशासनावल्यां पृ० ५९।
३. इन्द्रपाल—गौहाटीशासनं—तत्रैव, पृ० ११७.
४. धर्मपाल—सुभंकरपाठक—कामरूपशासनावल्यां पृ० १५०.
५. इन्द्रपाल—गौहाटीशासन—तत्रैव, पृ० १२०।
६. रत्नपाल—वडागांवशासन—तत्रैव, पृ० ९१.
७. इन्द्रपाल—गौहाटीशासनं—तत्रैव, पृ० ११७.
८. वलवर्मा—नवगांवशासनं—तत्रैव, पृ० ७३.
९. वनमालवर्मा—तेजपुरशासनं—तत्रैव पृ० ६२.
१०. इन्द्रपाल—गौहाटीशासनं—तत्रैव, पृ० १२०.
११. वनपाल—तेजपुरशासन—कामरूपशासनावल्यां पृ० ६३, इन्द्रपाल—गुआकुचीशासनं—कामरूपशासनावल्यां पृ० १३८.
१२. कामरूपशासनावल्यां पृ० ११७.
१३. तत्रैव, पृ० १५१.
१४. इन्द्रपाल—गौहाटीशासनं—तत्रैव, पृ० ११७.
१५. वल्लभदेव—ताम्रशासनं—।

वरीयस्त्वां सम्पादयन्ति, अपि तु शैवधर्मं प्रकाशयन्ति। वनमालस्य तेजपुर-शासनस्य चतुर्विंशतिश्लोकेन प्रतीयते।

काहा धूरूहे नहुषस्य येन पतितं कालान्तरादालयं सौधं,]
भवितनताखिलामश्वरव्रातार्च्चितांघ्रः पुनः।

प्रालेयानलशृङ्गतुङ्गमतुलग्रामेभवेश्याजनै-
र्युक्तं हाटकं पुनः, क्षितिभुजा भक्त्या नवं चक्रुषा।

अनेन श्लोकेन प्रतीयते यत् अन्यान्या देव्यस्तथा देवताऽस्यैवादिदेवस्य तथा परममाहेश्वरचरणयोः पूजामकुर्वन्। रत्नपालस्य वडागांवताम्रशासनस्य प्रथमश्लोकस्योत्तरार्द्धं निम्नरूपमस्ति।

एवं यः परमात्मवत् पृथुगुणो ह्येकोप्यनेकी भवन्।
प्राकाम्यन्दधदेव भाति भुवने स स्तात् श्रिये शङ्करः॥

अत्र शिवः परमात्मा कथितः यः सर्वगुणसम्पन्नः पृथिव्यां देदीप्यमानश्च भवति[1]।

इत्थं शिवो गुणातीतपरब्रह्मपरमात्मरूपेणैव सम्मानितः पूजितश्चाना-भवत्। भगवतः शिवस्य तथाकथितव्यक्तिगतगृहस्थजीवनस्य, तेन सह समन्विततात्पर्यपूर्णप्रसिद्धघटनानामुल्लेखोऽभिलेखेषु बभूव। इन्द्रपालस्य गौहाटीलेखः प्रथम श्लोकः गौरीशिवयोः सुन्दरं दाम्पत्यं प्रकटयति[2]।

खट्-वाङ्ग-परशुर्वृषः शशिकलेत्यादि त्वदीयं मया
सर्वस्वं जितमद्यनाम कितव प्रत्यर्प्पितं तैः पुनः।

प्रेष्या केवलमस्तु मे जलवहा गङ्गेति गौरीगिरी
शम्भोर्भूतकलाजितस्य जयति व्रीडाविनम्रं शिरः।

तस्मिन् श्लोके गौरी स्वभर्त्तारं कथयति, यत् भो द्यूतकार भवतः स्वकीया परशचन्द्रकलादिसम्पत्तिरासीत् सा मया विजिता, तथा कृपया पुनः प्रत्या-वर्त्तिता च, किन्त्वहं जलधारणाय गङ्गां न प्रत्यावर्तयिष्यामि। द्यूतक्रीडापरा-जितः शिवो गौरीकथनमाकर्ण्य नतमस्तको बभूव। इत्थं शम्भोर्मुखं जयति।

---

१. वैद्यदेव—कमऊलीशासनं—इपि० इण्डि० खण्ड २ पृ० २९१.
२. इन्द्रपाल—गौहाटीताम्रशासनं—श्लोक प्रथम।

अस्माभिः प्रागेव लिखितः, यत्तु सुभंकरपाटके, खोनमुखलेखेषु च तस्यार्द्धनरस्य, अर्द्धनार्यश्च कल्पना कृता। तेषु इदमेव कथितं—

वन्दे तमर्द्धयुवतीश्वरमादिदेवमिन्दीवरोरगफणामणिकण्ठबन्धम्।
उत्तुङ्गपीनकुचकुङ्कुमभस्मभिन्नं शृङ्गाररौद्ररसयोरिव सगंमेकम्॥

तस्यैकस्मिन् स्कन्धे नीलपद्ममस्ति। अपरस्मिन् स्कन्धे सर्पस्यैकं मणिमाणिक्ययुतं जीर्णं फणमस्ति, वक्षसि पाशैकमस्ति। अतिवहुमूल्यचूर्णरञ्जितं स्तनञ्चैकमस्ति, तथा अपरांशो भस्मनारञ्जितोऽस्ति। इत्थं प्रतीयते यत् स सुन्दरभयङ्कररसयोरेकः सम्मिलितः प्रतीकोऽस्ति। निधनपुरलेखे कथितमस्ति यत् शिवेन केवलं दृष्ट्या भस्मीसात्कृतः कामदेवः। ईक्षणजितकामरूपम्[१]। केषुचित् अभिलेखेषु सः खट्वाङ्कपरशुपिनाकशूलधारिभिः[२] शब्दैः सम्बोधितः। तस्य जङ्घाविषये कथितमस्ति यत् तौ नञ्चितावरत', मस्तके च शशिकलाविद्यमानाऽस्ति[३]। स सर्पमेखलां धारयतिस्म[४]। कैलासपर्वते तस्य निवास आसीत्[५]। गौरीपतिमस्तके गङ्गा शुशुभे[६]। प्राचीनकामरूपे शिवस्योपासनां पूजा च विभिन्नासु रूपासु प्रसिद्धा आसीत्। यद्यपि कामरूपे अत्यधिकाः शिवमूर्त्तयः समुपलभ्यन्ते, या लिङ्गरूपे नहि सन्ति। तथापि लिङ्गरूप एव तासां पूजा प्रतिष्ठिता आसीत्। अधः भागे प्रसरन्नंशो योनिः कथ्यते। उपरि दीर्घांशं लिङ्गमस्ति। योगिनीतन्त्रानुसारेण कामरूपे समुपलब्धानां पूजितानां लिङ्गानां संख्या कोटिरेकादधिकाऽस्ति[७]।

अस्यातिरिक्ते परवर्त्तिनि युगेऽपि शिवपूजा दृश्यते। अस्माभिः प्रागेव लिखितं यत् कुचविहारस्य कोचराजानस्तथा तत्सेनाः कथं शास्त्रविधिना,

---

१. कामरूपशासनावल्यां पृ० ११.

२. धर्मपाल—खोनमुखशासनं—इपि० इण्डि०, खण्ड ३०, पृ० २०६.

३. खट्वाङ्कपरशुर्वृपः शशिकलेत्यादि-इन्द्रपाल—गौहाटीशासनं—कामरूपशासनावल्यां, पृ० ११७.

४. योगीश्वरकृत-भास्करवर्मा-निधनपुरशासनं—कामरूपशासनावल्यां, पृ० ११.

५. रत्नपाल—वड़ागांवशासनं—कामरूपशासनावल्यां, पृ० ९१.

६. इन्द्रपाल—गौहाटीशासनं—श्लोक प्रथमः।

७. कोटिलिङ्गसमाकीर्णा कामाक्षा कल्पवल्लरी।—योगिनीतंत्र १.११.३६.

लौकिकविधिना च बहुप्राणिनां बलिदानं प्रदाय शिवमपूजयन् । तथा राजा शासनं प्रदाय बलिदानप्रथाया मान्यतामददात् । अस्मिन् विषये देवदास्याः स्थाने, शिवरात्र्योत्सवे च प्राणिनां बलिदानस्योल्लेखोऽप्यस्माभिः लिखितः । शिलालेखेषु शिवमन्दिराणां पुनर्गठनस्योल्लेखः प्राप्यते । वनमालस्य तेजपुर-ताम्रशासने उल्लेखः समुपलभ्यते यत् सर्वे श्रेष्ठदेवताः यस्य चरणौ भक्त्या प्रणमन्ति । स एव भगवतो हाटकेश्वररूपहादेवस्य मन्दिरमपतत् । तन्मन्दिरं हिमालयपर्वतस्य शृंगनिवोच्चमीयात् । तस्मिन् मन्दिरे च बहुप्रजाः, ग्रामाः हस्तिनः, गणिकाअपि आसन् । वनपालोऽस्य मन्दिरस्य नवनिर्माणं कारयित्वा राजानहुष इति कीर्ति लेभे[1] । अस्योल्लेखः प्रागेव कृतः । यत्—चीनीपरिव्राजको ह्वेनसांगः अतीवभ्रान्तः । तेन लिखितं यत् तस्मिन् काले तत्र बहुमन्दिराणि आसन् । निश्चितमेतदस्ति यत् अधिकेषु मन्दिरेषु अधिष्ठातृदेवता शिव आसीत्[2] । सम्प्रति तेजपुरस्योत्खनने दशम्याः शताब्द्यारेकस्य शिवमन्दिरस्य भग्नावशेष आविष्कृतो बभूव । उत्खननकर्ता वनर्जीकथनानुसारेण तस्य मन्दिरस्योपर्यंशे पञ्चानां लघुमन्दिराणामंशमस्ति । तेषु पञ्चसु शिवलिङ्गम-ङ्कित मस्ति मन्दिरावलोकनेन ज्ञायते यदिदं दशम्यां शताब्द्यामेव परिष्कृतं जातम्[3] । तेजपुरस्य दहपरवतियाग्रामे षष्ठशतकस्य खननेनैकं शिवमन्दिर-मुपलब्धं जातम्[4] ।

---

१. धरुहे नेहुषस्य येन पतितं कालान्तरादालयं
सौधं भक्तिनताखिलामरवरव्रातार्च्चिताङ्घ्रेः पुनः ।
प्रालेया च लतुङ्गतुङ्गमतुलग्रामेभवेश्याजनै
र्युक्तंहाटक पुनः क्षितिभूजा भक्तया नवं चक्रुषा ।
—कामरूपशासनावल्यां, पृ० ६२.

2. Walters—On young choung—p. 186.
3. The upper part represents five miniature temples wille. The phallic emblem of Śiva in each of them it appears from the nature at the carvings that is temple to which these three architectural specimens along was erected lote in the tenth century A.D.,—Archaeological, Survey of India, Annual Report, 1924-25, 8.96.
4. Close to the modern civil station of Tejpur in the small village of Dahparbatiya which possesses the unique estinc-

शाक्तधर्मः

हिन्दुधर्मे यो मुख्यभागो वा सम्प्रदायोऽस्ति तस्मिन् शक्तिधर्मो बहुमहत्त्वपूर्णोऽस्ति। अस्मिन् शक्तिः कालीत्यादिविविधनामभिः पूज्यते। वैष्णवीशक्तौ लक्ष्मीराधाः प्रसिद्धाः सन्ति। यद्यपि कौमारीवाराहीत्यादीनामवताराणां शक्तिरूपिणी दैवी कल्पिता स्वीकृता चाभवत्, तथापि आभिः मुख्यतया शिवशक्तेरेव बोधो भवति।

स्त्रीमूर्तेरर्थात् देवीमूर्तेरुपासनायाः प्राचीनभारतस्य साहित्ये तादृशी प्रसिद्धिर्नास्ति। चीनदेशे 'कोआंगइनस्य' सेनापूजामहत्त्वं यथा बहुप्राचीनकालादेव चीनधार्मिकसाहित्ये दर्शने न उल्लिखितो भवति। तादृशः शक्तेरादरपूर्वकोल्लेखः प्राचीनसाहित्ये दुर्लभोऽस्ति। यद्यपि ऋग्वेदे अथर्ववेदे च कासां कासां देवीनामुल्लेखः प्राप्यते, तथा ताः सर्वाः देव्यः शक्तिरूपिण्यः कथिताः, तथापि परवर्तिकाले दुर्गायाः काल्याः वा रूपे इमाः सर्वाः ख्यातिं नैव प्राप्तवत्यः। प्राचीनमिश्रग्रीसैटलीत्यादिषु प्रदेशेषु देव्याः पूजाऽतिप्राचीनाऽस्ति। अनाहित देव्यारर्चना वैक्ट्यायां बहुप्राचीनकालादेव अभवत्, कुषाणकालीनमुद्रायाञ्चाप्यस्याम् उल्लेखो विद्यते। अनेनानुमीयते यत् भारतस्योत्तरपश्चिमप्रान्तेष्वपि अस्याः प्रभाव आसीत्। अर्वाचीनयुगेऽपि विस्फोटकस्य दैवीति मत्वा दक्षिणभारते परिपम्यनदेव्याः स्तुतिः क्रियते। गुर्जरप्रान्ते इदानीमपि न्यूनातिन्यूनचत्वारिंशदधिकैकशतदेवीनां पूजा प्रचलिताऽस्ति। मध्यभारते भैरवीच्छिन्नमस्तकादीनां देवीनां महत्त्वं बहु सुलभमस्ति।

तत्र किमपि न वैमत्यमस्ति यत् भारते शक्तेराराधनस्य प्रारम्भो मुख्यतः असमप्रदेशादेव बभूव। स्मर्तव्यमिदं यत् आसामवंगालविहारोडीसादीनां प्रान्तानां निवासिनः आर्याः नासन्। तिब्बतब्रह्मदेशथाईलाण्डदेशादागतैः मनुष्यैः मुण्डाद्राविडाष्टिकजात्या च सम्मिलितैः भूत्वा वंगालासामौड़ीसाजातेश्च प्रादुर्भावोऽभवत्। अतोऽस्मिन् प्रान्ते वैदिकस्य पौराणिकस्य च धर्मस्य प्राचीनकालादेव कश्चित् विलक्षणप्रभावोऽनुभूतो न बभूव। अतः वाजसनेयसंहितायां

---

tion of having with in limits the ruins consist of the remains of a brick built temple of Śiva of the five period erected upon the ruins of a stone temple of the later Gupta period, circa sixth century A.D.'

—Archaeological Survey of India, Annual Report, 1924-25, p. 98.

अंगवंगकलिंगदेशानां विषये स्वल्पः एव कटाक्षः कृतः वर्तते। एषु सर्वेषु प्रान्तेषु इदानीमपि द्विजा स्वीकृतानां स्त्रीणां शक्तीनां च पूजा आराधना वा प्रचलिताऽस्ति । शक्तिधर्मोऽयं शिवेन सह सम्मिलितो भवति, परन्त्वियं शिवशक्तिपरवर्त्तियुगे वहुप्रकारका आसीत् । अस्य पूजायाः वहुप्रकारेषु दशमहाविद्या-महामात्रिकानायिकायोगिनी-डाकिनीत्यादिकाः सुप्रसिद्धाः सन्ति ।

अयमेव शक्तिधर्मो विकासानुरूपे प्राचीनयुगे तस्मात् किञ्चित् भिन्नो जातः। यूरोपस्य सुप्रसिद्धः वापुः जुखियलः ईश्वरभक्त्या भावनां ध्यानं धारणां च प्रतिपन्नमकरोत् । तस्यानुसारेण मातृरूपे पवित्ररूपाराधना इति वस्तुद्वयमेकमेवाऽस्ति । कापुआ नामके सुप्राचीने शिलालेखेऽप्युल्लिखिताऽस्ति । भगवान् मातृरूपिणी सुक्षनयानस्य भविताक्षु गा केवलं वन्दनां अर्थात् मगमत्जाः शक्तिरूपं स्वीकृतम् । तदेतोत्तरपूर्वभारते प्रचलितेन शक्तिधर्मेण सहाभिप्रेतं समेषाम् । कामरूपः प्राचीनकालात् शक्तिवादस्य प्रसिद्धं पीठस्थलम् आसीत् । गौहाटीनगरस्य क्रोशेके ब्रह्मपुत्रनदस्य तटे स्थितं कामाक्षादेव्या मन्दिरमस्ति । अस्य मन्दिरस्य निर्माणमसकृद् बभूव । अष्टादशशतके तत्कालीन आहोमराजा वहुदानमकरोत् । तेनैव दानेन मन्दिरेऽस्मिन् चमत्कारिता विकसिता जाता, बंगदेशस्य नदियाजनपदस्य नियासिब्राह्मणस्योपरि अस्य मन्दिरस्य निरीक्षण-स्योत्तरदायित्वमायातम् । अस्य ब्राह्मणस्योपाधिः गोस्वामी भवति । अस्मै गोस्वामिने च धनस्य सूतरूपेऽधिका कृषिः प्रदत्ता । तस्य बुद्धिरूपेणार्जितेन वित्तेन अस्य देवीमन्दिरस्य दैनिककार्यं सुचारुरूपेण सम्पन्नं भवेत् । देवाल-योऽयं मूलतः दशदेवालयानामेका मण्डलम् अस्ति या एकस्मिन्नेव पर्वते वर्त्तमानाऽस्ति। एषु दशमन्दिरेषु शक्तिरूपिण्याः भगवत्याः दशमूर्त्तीनां विविधो विकासोऽस्ति । दृश्यावली तु अतीवसुखदायिकाऽस्ति । तथा मन्दिरस्य निर्माणविधिः सुन्दरोऽस्ति ।

उत्तरभारते प्रचलितेन प्रथानुसारेण अस्य मूलमन्दिरं यत् कामाक्षा-देव्याः मूलमन्दिरनिर्माणसमयस्य ई० १५५० शतकस्यैको लेखस्तत्राप्यधुनाऽपि विद्यते । येन लेखेनास्य प्राचीनता प्रमाणिता भवति । मन्दिरेऽस्मिन् देव्याः योनिपीठेः स्थितोऽस्ति । अस्य सम्मुखे द्वौस्तम्भौ स्थितौ वर्तते । तत्र बलि-व्यवस्था तथाऽधःस्थले भैरव्याः मन्दिरमस्ति । कञ्चित् कालं यावत् तत्र मनुष्यस्य बलिरभवत् । परन्त्वधुना राजनियमेन निवारिता बलिव्यवस्था ।

अनेन पंचप्रकारस्य यथेच्छं सेवनं भवति। तस्या अघोरसम्प्रदायस्य बह्व्यः शाखाः सम्मिलिताः भवन्ति। पूर्वोत्तरे प्रचलितेषु ईदृक् तन्त्रमथवा देवीसम्बन्धितं पुराणम् नास्ति यत् कामाक्षादेव्याः विवरणं न करोति। योगिनीमहानिर्वाण-कालिकातथामेरुनामकेषु तन्त्रेषु कालिकापुराणे च देव्याः महिमा सकृदुल्लिखितोऽस्ति। सुप्राचीने पद्मपुराणे कामाक्षादेव्याः नाम प्राप्यते। कालिकापुराणे एकोऽध्यायो रुधिराध्वाय इति कथ्यते। तस्मिन्नध्याये कामाक्षादेव्याः समक्षे नरबलेः कथोल्लिखिताऽस्ति। यद्यपि ब्राह्मणक्षत्रिय-वैश्याः अनुमतिं बिना नरबलिं दातुं समर्थाः नाऽसन्, तथापि राज्ञः अनुमतिमादाय नरबलिं दातुं शेकुः वैदिकयज्ञे पशुवधोऽनुमोदितोऽस्ति। कालिकापुराणस्य सप्तषष्ठाध्याये बलिदानस्य क्रमं, तथास्वरूपस्याखिलं विवरणं कथितम्। रुधिरेण देवी प्रसन्ना भवति। राजानः अपि शत्रुगणवधं कर्तुं शक्नुवन्ति।[1] तत्रैवोल्लेखोऽयं यत् मनुष्यस्य बलिना देवी सहस्रैकं वर्षं यावत् प्रसन्ना भवति। त्रयाणां मनुष्याणां च बलिना देवी लक्षैकं वर्षं यावत् प्रसन्ना तिष्ठति। मनुजपललेन कामाक्ष्यादेव्याः, भैरवस्य च त्रिसहस्रं वर्षं यावत् तृप्तिर्भवति। मन्त्रेण पूतं रुधिरसमृतरूपे परिणमयति। अतः बलेर्मस्तकं पललञ्च देवानां रुचिकरम्। एतदर्थं मस्तकानि मांसानि रुचिकरम्। एतदर्थं मस्तकानि मांसानि रुधिराणि य दातव्यानि।[2]

अस्याः शक्तेरुपासनया सर्वस्याभीष्टस्यसिद्धिर्भवतीति कथयित्वा साधारणमनुष्यान् स्वं स्वं क्षेत्रं प्रत्यानेतुं प्रयासमकुर्वन्। चतुःषष्ठिषु योनिषु कामाक्ष्यादेव्याः स्थानं सर्वोत्कृष्टं कथितमस्ति। योगिनीनां गणना-प्रसंगे ब्राह्मणी, चण्डिका, गौरी, रौद्री, इन्द्राणी, कौमारी, वैष्णवी, दुर्गा, नरसिंही, कालिका, चामुण्डा, शिवदूती, वाराही, कौशिकी, माहेश्वरी, शंकरी, जयन्ती,

---

१. कामस्तु बलिदानस्य स्वरूपं रुधिरादितः। यथा स्यात् प्रीतये सम्यक् तत्वाङ्गं भक्ष्यामि पुत्रको............बलिदानस्य सततं जयति शत्रून नृपानः नृपः। कालिकापुराणे ६७.१-६।

२. अग्रिमपृष्ठेऽपि द्रष्टव्यम्—
नरेण बलिना देवी सहस्रं परिपत्यरान् विधिदत्तैर्नाप्नोति तृप्तिं लक्ष्यं त्रिमिनरैः। नारेणेवाथ मांसेन त्रिसहविसहस्रान् च तत्शरान् तृप्तिमाप्नोति कामाक्षाभैरवीसमरूपधृक् मंत्रपूतं श्रोणितन्तु पीयूषं जायते सदा। मस्तकं चापि तस्या।स्ति मांस चापि तथा शिवा। —कालिकापुराणे ६७.१९-२२.

सर्वमंगला, काली, कापालिनी, मेधा, शिवा, शाकम्भरी, भीमा, शान्ता, भ्रामरी, रुद्राणी, अम्बिका, क्षमा, धात्री, स्वाहा, स्वधा, अपर्णा, महोदरी, क्षेमकरी, उग्रचण्डाचण्डौगा, चण्डनायिका, चण्डा, चण्डवती, चण्डी, महामोहा, प्रलयङ्करी, बलविकरणी, बलप्रमथनी, मनोमथनी, सर्वभूतदमनी, उमातास, महानिद्रा, विजयाजया, अष्टयोगिनी इति नामानि मेरुतन्त्रे महानिर्वाणतन्त्रे नोल्लिखितानि सन्ति। कालिकापुराणेऽपि यासां देवीनां नामानि लिखितानि सन्ति तासु सर्वासु कामाख्यादेव्याः नाम सर्वप्रथमं अस्ति। कालिकापुराणानुसारेण यदा सती प्राणत्यागमकरोत् तदा तस्याः पतिः शिवः तस्या मृतशरीरं स्कन्धे निधाय समस्तवसुन्धरामभ्रमत्, येन भ्रमणेन विश्वस्याखिलकार्यमचलं भवेत्, इत्याशंकया भगवता विष्णुना स्वसुदर्शनचक्रेण सत्याः शरीरं चूर्णीकृतं, तच्च द्विपंचाशतां शेषु विभक्तं जातम्। अस्मिन् कामाख्याक्षेत्रे च सत्याः योनिरपतत्। अनेनैव हेतुना कामाख्यापर्वतः स्वरूपं परित्यज्य नीलवर्णो बभूव। देव्याः कामाख्यानामानेन कारणेन वभूव यत् स्थानेऽस्मिन् सा स्वपतिना सह स्वस्याः कामनायाः निवृत्तिमकरोत्। अर्थात् कामशब्देनैव कामीक्षापदस्य व्युत्पत्तिर्जाता। अस्या नाम कामा, कामदाऽपि च प्राप्यते। कूर्मपुराणे यथा—शिवाख्य, वादाख्या, ब्रह्माख्या, इंसाख्या इत्यादीनि पदानि मिलन्ति। तथैव कामा, कामाख्या, इति पदद्वयमेकमेवाऽस्ति। कालिकापुराणे एकस्मिन् स्थले कामा इति पदं कथितं, तत्रैव च स्वर्णश्रीनद्याः पूर्वे एकस्याः कामानद्या अप्युल्लेखोऽस्ति। प्राचीनस्वर्णश्रीनद्या आधुनिकसंज्ञा सुवनश्री आसीत्।

अस्य मन्दिरस्याधिष्ठात्रीदेव्याः कामाख्यायाः स्वरूपविषये बहुविचारविमर्शो योगिनीतन्त्रे कालिकापुराणे च समुपलभ्यते। ब्रह्मरूपासनातनीमहाविद्यापरमेश्वरी काल्यस्ति। सैव सर्वसिद्धिविधायिनी कामाख्यास्ति। इयं काली कथं कामाख्या जाता, अस्य कथनस्य विषये सुन्दरंकमाख्यानं वर्त्तते।

स्वयम्भू ब्रह्मा यदा सृष्टिमारमतेस्म, तदा सः अहंकारदोषग्रस्तो जातः, सम्पूर्णभोगालये च परिणितोऽभवत्। परमेश्वरी काली ब्रह्माणमहंकारसागरे मग्नमवलोक्य ब्रह्मणः शरीरस्यार्द्धादेव परमदुर्धर्ष केशीनामानं दैत्यमुत्पादयामास। स दैत्यः ब्रह्माणं कवलीकर्त्तुमधावत्। इमां परिक्रियां दृष्ट्वा ब्रह्मा विष्णुसहित इतस्त तोऽभ्रमत्। तदनन्तरं केशीदैत्यः केशीपुरनामनगरं निर्माय तस्मिन् निवासं विधाय 'भूर्भुवः स्व' इत्युच्चार्य अखिलं जगत् भुक्तवान्, अपि च ब्रह्माणं जहि, ब्रह्माणं जहि, इति कोलाहल नभसि जातः। ब्रह्मा दर्पशून्यो भूत्वा

विष्णुना सह जगन्मातुःविन्ध्यवासिनीकालीदेव्याः स्तुतिं वारभत्। बहुस्तुत्यां कृतायां सत्यां आकाशवाणी जाता यत् पितामहः त्वं किं वाञ्छसि। ब्रह्मा उत्तरमददात् यत् केशीनामा महा सुरैकः अस्माकमखिलं जगन्मण्डलं स्वहस्तगतं कृतवान्। समयेऽस्मिन् असुरं पूर्ववत् स्वायत्तं कुरु। हे देवि, भवत्याः चरणयोरिदमेव निवेदनमस्ति। तदा काली उवाच, तवाहंकारस्य समाप्तिर्जाता, अतः अखिलं जगत् तवाधिकारे भविष्यति। मायामयमिदं जगत् कस्यचिदन्यस्य नास्ति। तव दर्पं दृष्ट्वा त्वां प्रति दुर्धर्षेण विघ्न उपस्थितः, तवाहंकार एव केशीदैत्यस्य स्वरूपमस्ति। सम्प्रत्यहं तमवधति। स्वस्थाने तिष्ठ, भयं मा कार्षीः। एतत्कथनानन्तरं भगवती ब्रह्मरूपिणी काली तं केशी इति नामानं महासुरं भस्मसात्कृतवती। अतः परं काल्युवाच यदहंकारवशादेव ब्रह्मा बहुपापपरिपूर्णो जातः। अत एव स्वार्जितपापसमूहं दूरीकर्तुं केशिदैत्यस्य भस्मना एकस्य तृणलतापूर्णपर्वतस्य सृष्टिं कुर्यात्, तान् गोग्रासान् च यावत्यः गावः खादिष्यन्ति। तावन्मात्रं ब्रह्मणः कल्मषं क्षीणं यास्यति। तदा सृष्टिकर्त्ता ब्रह्मा केशिदैत्यस्य भस्मैकत्रीकृत्य कमण्डलोः जलमत्यजत्, येन जलेन पर्वतस्य सृष्टिर्जाता। पर्वतोऽयं नात्युच्चः, अपि च बहुगोग्रासधारणकर्त्ता आसीत्। तेन भस्मीभूतेन गोग्रासेन गोसमूहः परिपुष्टतां प्राप्तवान्। येन परिमाणेन गोभिः शष्याणि भक्षितानि, तेनैव परिमाणेन ब्रह्मणः कल्पस्य क्षयो बभूव। तथा ब्रह्मा विष्णुश्च अवदताम्। हे मातः, भवत्याः मंगलदायकयोः चरणयो रचना कया रीत्या सम्पादयावः। काल्युवाच—पत्रकेशीदानवस्य भस्मना पर्वतो निर्मितो बभूव, स पर्वतोऽतितेजस्वी अस्ति। तस्मिन्नेव स्थाने च यथेच्छं मत्पूजनं भवितुं शक्नोति। तस्मिन्नेव स्थाने मम योनिमण्डलो जातः। अयं योनिमण्डलः मदंशादुत्पन्नो बभूव एषां सर्वेषां उद्भवस्थानज्ञानमेव मदीया प्रकृतिः, तदेव ज्ञानं योनिमण्डलम्। इमं योनिमण्डलं सम्पूज्य त्वं सृष्टिं कुरु। अस्मिन्नेव पीठे ममाधिष्ठानं वर्त्तते। यः पुरुषः योनिमण्डलं गत्वा कामाख्यां देवीं पूजयेत् स सर्वसिद्धेश्वरो भूत्वा अस्मिन् लोके परलोके चानन्दं प्राप्नुयात्। युवयोः अन्येषां जनानांच कल्याणाय योनिमण्डलोयं निर्मितो बभूव। अयं कामरूपदेशः भारते विद्यते।[1] महालयोऽयं नवयोनिसमाकीर्णो महाफलदायकश्चाऽस्ति। कामरूपे कामाख्यातेजसा योनिमण्डलम्

---

१. तवान्येयानद्वितार्थं स्थापितं योनमण्डलं। पृथ्वेयाम् भारतवर्षे कामरूपं महाफलम्। —योगिनीतन्त्रे १.१५.५५.

उद्दीपयति नक्षत्रलोकात् ध्यानयोगाच्च एकं नक्षत्रं निपात्य योनिपीठं श्रेष्ठ-ज्योतिःसम्पन्नं विलोक्य तत्र तपःकरणमुक्तिं भवेत्। यावत् योनितेजसि सम्मिलितं सतत् ज्योतिः दृष्टिपथे नाऽयाति तावत् विपुलं तप आवश्यकं भवेत्।[1]

किञ्चिद् ध्यानपूर्वकेन विमर्शेन कामाख्यायां कामादेव्याः नाम्नि स्वल्पोऽनार्यप्रभावो दृश्यते। अयमनार्यप्रभावः अस्फ्रिकभाषासु निम्नोक्तपदैः सह दृश्यते। यथा—(१) कामोई (राक्षसः), (२) कामो इथ (दानवः), (३) कोमन (कवर), (४) कामेथ (मृतशरीरं), (५) कमरु (प्राचीनदेव-विशेषः)[2], अस्मिन्नेवाधारे कामरूपराज्यस्य नाम कमरु, अर्थात् पौ-आसीत्। अस्य समानता पर्वतैः सह दातुं शक्यते। केशिदैत्यः, यस्य वधं कृष्णः अकरोत् अयमेव शब्दः अस्फ्रिकखासीखशेवा (यस्यार्थो—विशिष्टो वृक्षः) इति शब्देन सम्बन्धं करोति।

कामाईशब्दस्यान्तर्गते यावती पदावली समुपलब्धा अस्ति, तासां सर्वासां सम्बन्धः कब्रैः प्रेतात्मभिश्च प्रतीयते। सम्भवतः प्राचीनकाले कामा-देवी अस्य कब्रस्थानस्य एकः प्रेतात्मा आसीत्, विश्वजननीरूपे च पूर्वजैः पूजिताऽऽसीत्। प्रसङ्गेस्मिन् शब्दार्थाभ्यां कामादेव्याः जापाने शिन्तोदेवीकाभ्यां सह कश्चित् घनिष्ठः सम्बन्धः आसीत् न वा इति विचारणीयो विषयः। प्राचीन-जापाने शिन्तोकामी इति व्यापकं पदमस्ति। तेन पदेन देवानां मनुष्याणां पितृणाञ्चापि वोधो जायते।

कामीदेवताभिः सह इदं कथयेत् यत् शिन्तोमन्दिरेषु न काचित् मूर्तिः स्थास्यति। केवलमत्र एकं देदीप्यमानं दर्पणम् आसीत्। यत् उज्ज्वल-मूर्तिः सौरदेव्याः प्रतीको मन्यतेस्म। जानन्तु सर्वे यत् कामाख्यादेव्यामपि न काचित् मूर्तिरस्ति, अपितु तत्र केवलं एकं योनिचिह्नमस्ति यत् भगवत्याः देव्याः सन्तानप्रजननक्षमतां विकासयति। जापाने इदं योनिचिह्नं कस्यचि-दिन्द्रजालस्य प्रभावादुत्पद्यते, इत्थं मन्यते। वाहरफाल्डस्य 'दी मदर्स' ग्रन्थे लिखितमस्ति यत् जापानस्याधिवासिनः उत्तमां वेशभूषां धृत्वा स्वकीये

---

१. योगिनीतन्त्रे १.१५.

२. बी० के० ककाटी—असामीज, इट्स फार्मेशन एण्ड डेवलपमेण्ट, पृ० ५३.

कञ्चुकछिद्रे स्थापयन्ति। यथासां कदमिकानामुपलब्धिर्न सम्भवेत् तर्हि स्त्रीणां लिङ्गवोधककामोत्तेजकचित्राणि स्थापयेयुः[१]। जापानस्य 'एडोनाम' स्थाने, एकस्मिन् प्राचीनमन्दिरे एकं विपुलं योनिचित्रमङ्कितमस्ति। सम्प्रत्यपि श्रद्धालवो जापाननिवासिनः तच्चित्रं चुम्वन्ति, आलिगयन्ति[२] च। स्त्रीणां धवलदन्तानां कृष्णवर्णेन मिश्रणस्यैकादभूतविशेषताऽस्ति। प्राचीन कामरूपेऽप्ययमाचारः प्रचलित आसीत्। योगिनीतन्त्रानुसारेण—

संसारमागतं पातकं नैव स्त्रीधर्मे धर्ममाश्रय।
ना शुक्रदर्शनं स्त्रीणाम् ताम्बूलसा सदा भवेत्[3]॥

अर्थात् स्त्रीणां ताम्बूलभक्षणेन तासां दन्ताः कृष्णतां गता आसन्। जापानस्य केषुचित् भागेषु स्त्रिय अथापि इत्थं कुर्वन्ति। जापानसम्राष्टप्रलेऽपि च एषा पद्धतिरवलोक्यते। विदुषां कथनमस्ति यत् अमरेतुसुरदेव्या एव अयं प्रभावोऽस्ति[४]। मलेशियानगरेऽपि स्त्रीणां दन्तानां कृष्णीकरणस्य प्रथा प्रचलिता अस्ति[५]।

मात्राराधनयैव मातृतन्त्रः प्रभावितो भवति। मातृप्रधानसमाजस्य प्रतिष्ठा च जायते इति आसामस्य नागसम्प्रदाये दृढतरोऽयं विश्वासः। तस्मादुत्तरपूर्वे एको ग्रामोऽस्ति यस्य निवासिन्यः स्त्रिय एव सन्ति। यदा कदा केचन विक्रेतारः स्ववस्तुविक्रेतुं तत्र गच्छन्ति, तेषां संयोगेन भूषणानि धारयन्ति स्त्रियः, येन तेषां जनानां न वंशपरम्परा प्रसरति[६]।

जापानस्य विषयेऽपि कथ्यते यत् तत्र काश्चित् प्रसिद्धसाहित्य-लेखिकाः स्त्रिय आसन्। तस्य देशस्य प्राचीनेतिहासाध्ययनेन ज्ञायते यत् स्त्रीणां वह्वेतिहासिकवर्मा आसन्। किञ्चित् कालं यावत् चीनाधिवासिनः इत्थं विश्वासमकुर्वन् यत् जापाने वह्व्यः योद्धृस्त्रिया आसन्[७]। अतः अस्माकं

---

१. दी मदर्स, वाल्यूम ३, पृ० २७८.
२. औ० ए० वाल—सैक्स एण्ड सैक्स वर्सिप—पृ० ४८१.
३. योगिनीतन्त्रे—२.९.१५.
४. दी मदर्स—राइट इन इण्डिया—पृ० १९७.
५. वेष्टर मार्क—दी हिस्ट्री ऑफ ह्यूमन मैरेज—पृ० १६६-१८२.
६. इम्पीरियल गजेटियर ऑफ इण्डिया—पृ० ४७६.
७. डब्लू० जी० ऑस्टन—जापानीज—पृ० ५५-५६.

कथनमेवोचितं भविष्यति, यत् संस्कृतकामाशब्दस्य, आस्ट्रिककामाईशब्दस्य, जापानीकामीशब्दस्य च सादृश्येन तथा विभिन्नप्रान्तेषु प्रचलितक्रियाकलापैः सामाजिकसंस्करणैश्च प्रमाणितोऽयं भवति यत् योनिदेव्यारुत्पत्तिः मनुष्य-समाजे बहुप्राचीनकालादेव प्रचलिता आसीत्। प्राचीनमातुः पुत्रोत्पादनक्षमता आस्ट्रिकसम्प्रदायस्यागमनेन सह आसामे प्रचलिता जाता। आसामे आस्ट्रिक-जनाः पूर्वात् अथवा पश्चिमदिश आगतवन्तः। नेदं मतं निर्विवादम्। तथापि सत्यमिदं, यत् ते पश्चिमदिशः वा पूर्वदिशः आगताः स्युः, परन्तु कामरूपस्य पश्चिमे तथा पूर्वस्मिन् प्रान्ते च प्राचीनमन्त्रपीठस्य तथा योनिपूजायाः प्रभावोऽधिक आसीत्।

नरकस्य मृत्योरनन्तरं वस्तुतः आसामस्य धार्मिकेतिहासे न किमपि स्पष्टं प्रतीयते। कालिकापुराणेऽस्योल्लेखो न मिलति। योगिनीतन्त्रस्य स्वल्पैः तथ्यैः कस्यचित् कथनस्य स्पष्टीकरणं न स्फुटतया भवति। नरकस्योपाख्याने इत्थं न मिलति, येन कामाख्या सह शिवस्य सम्बन्धो भवेत्। कामाख्याया आविष्कारं प्रतिष्ठाञ्च विष्णुः कृतवान्। यदा नरकः स्वधर्ममार्गात् अधर्म-मार्गमगच्छत्, तस्मिन् समये विष्णुना सह युद्धे कामाख्यादेवी विष्णोः सहा-यतामकरोत्। कालिकापुराणे पुनः तस्याः उपाख्यानग्रहणानन्तरमेव एका नूतना भावना व्यक्ता जाता। यत् कामाख्यादेवी विष्णुश्रयी, परमाराध्या च न जाता, यतो हि तस्याः पूजां, आराधनाञ्च नरकोऽकरोत्। किन्त्विदानीं कामाखयादेवी स्वपतिना सह गुप्तप्रणयकर्म्यः प्रतिमायाः रूपे परिणता बभूव। सा बहुदिनात् प्रागेव बिष्णोः सम्बन्धमत्यजत्। तथा नीलांचले पार्वतीनाम्ना प्रख्याता बभूव या पार्वतीशिवस्नेहं कामयाञ्चकार।

अनया नूतनया भावनया तस्याः कामभावना एव व्यक्ता भवति। अस्याः कामात्मिका कामाख्यादेव्याः नवीनस्य रूपविषये किञ्चित् कथनमनुचितं न भविष्यति। भगवान् कामदेवः शिवस्य क्रोधेन भस्मीभूय यत्र जन्म लेभे तस्यैव नाम कामरूपदेशोऽस्ति। "पपत्रः कामरूपं परिजग्राह" अयं कामरूपः कथितः। तत्र शिवनिवासायैकं विशिष्टं स्थानं निर्धारितमस्ति। अत्र भगवतः शिवस्य षट्सु आशासु षट्स्थानानि वसन्ति। अस्य भूभागस्य मध्ये नीलांचले पर्वते पार्वत्या निवासोऽस्ति। उत्तरपूर्वे दिशि नाटकपर्वते शिवः पार्वत्या सह निवसति। तस्यैव सन्निकटे एको विशाखः तडागोऽस्ति। शिवः पार्वत्या सह जलक्रीडां करोति। अस्याः पार्वत्या देव्या नामान्तरं कामाख्या अस्ति। स्वस्य

गोपनीयकार्यपूर्णकरणस्य प्रतिष्ठया अस्याः कामाख्या नाम जातम् । सा शिवेन रक्षिता सती प्रतिदिनं योनिपीठमभिसिञ्चति । दूरस्थे पूर्वप्रान्ते स्वर्णनाम्नी काचित् नद्यस्ति । तस्याः नामकरणस्येदमेव कारणमस्ति यत् तस्याः जलस्रोता स्वर्णविन्दुना चन्दनेन च सहावहत् । अस्य स्वर्णस्य बिन्दुभिः, चन्दनेन च मिश्रितं जलं शिवः स्वस्याः पत्न्या उपरि लिम्पतिस्म । यदा तस्य पत्नी स्नातुं सन्नद्धा आसीत् तस्या द्वितीयं नाम ललितकामता च प्राप्यते, यस्या न काचिदधिक सुन्दरी विद्यते । यत्र योनिगिर्यासीत् तत्र शिवो लिङ्गरूपे पाषाणरूपं दधार । दृष्ट्वेदं ब्रह्मा, विष्णुश्च स्तब्धा वभूवतुः । यदा शिवः कामाकामाक्षाभ्यां देवीभ्यां च सह विहरितुं स्वं रूपं धारयामास, तर्हि अन्ये देवा अपि रमणेच्छायां सत्यां स्वरूपमधार्षुः । शिवः कस्मैचित् भक्ताय कस्मिंश्चिदपि वर्णदाने समर्थो नाऽस्ति, वर्णदाने पार्वत्यारनुमतिरावश्यकी इत्थमेवेदं नूतनोपाख्यानं यौवनधारणेन रिरन्यां वत्या च प्रदीप्तमस्ति । प्राचीनया कथया नूतनैकां धारणां प्राददात् । अस्या गतिरपरं लक्ष्यं स्वीकृत-वती । अस्यां नूतनभावनायां किञ्चित् प्राचीनता सम्मिश्रणाय विष्णोश्चक्रेण भगवत्याः शरीरादेकं अत्रापतत् । सयोजितोऽयं नूतनोऽशंः । अतः कामरूपे यत्र तत्र प्राचीनानि पवित्राणि स्थानानि सन्ति । तेषां सत्याः केनचिदंशेन सह घनिष्टः सम्बन्धः प्रदर्शितोऽस्ति ।

देवीभागवते सत्याः मृतशरीरसम्वन्धे अष्टोत्तरशतस्थानां वर्णनं मिलति । तेषु अष्टोत्तरशतसंख्यासु स्थानेषु कामाक्षाया नाम नोपलभ्यते । देवीभागवते सप्तमस्कन्धस्य त्रिंशत् अध्याये सर्वेभ्यः पूर्ववर्त्यन्चलस्य वर्णन-मस्ति यत् सत्याः मृतशरीरसकलयुक्तमस्ति । तद्शुण्ड्रवर्द्धनमस्ति । किन्त्वे-कस्यां द्वितीयस्यां तालिकायां नेपालस्य गुह्यकालीने चीने च नीलसरस्वत्या सह कामाक्षया अपि नाम मिलति । महामाययाधिष्ठितं योनिपीठं कामाक्षा-नाम्नोद्घोषितम् यत्र महामाया मासिकरक्तस्रावं करोति । अर्थात् देवी-भागवतानुसारेण कामाक्षापीठः कस्यचित् विशिष्टभगवत्याः मासिकरक्त-स्रावेण युक्तोऽस्ति । तस्य सत्याः शरीरात् न कश्चित् सम्वन्धो विद्यते ।

कालिकापुराणं सत्याः शरीरस्य विभिन्नेपु प्रक्षेपांशमादाय किञ्चित् नवीनांशं संयोजयति । तस्य मतानुसारेण स्वल्पोंऽशः प्राचीनकामरूपेऽवश्यमेव अपतत् । अर्थात् तेन प्राचीनासामप्रान्तं शाक्तार्यावर्त्तान्तर्गते मेलनस्य प्रयासः कृतः । इदमपि कथितमस्ति यत् शिवः सत्याः मृतशरीरं स्कन्धौ निधाय पूर्व-प्रान्तेपु यावत् दूरमभ्रमत्, स च देश याज्ञिकदेशो निर्देशितः । शिवः सत्याः

शरीरमादाय पूर्वीयप्रान्तमभ्रमत् नीलांचलकारागृहे तस्य योनिपीठः, उग्रतारायां नाभिः, कामरूपसन्निकटे च तस्य भालं पपात । कस्मिंश्चित् विशिष्टस्थाने तस्य मस्तकमपतत् अस्पष्टमिदम् । इत्थं प्रतीयते यत् प्राचीनकामरूपस्य पूर्वीयप्रान्तस्य सीमायां, तथा दिक्करवासिन्यां, ,ललितकामतायाञ्च भालं पतितुं शक्नोति । शेषांकानि यत्र तत्र पतितानि आसन् तेषां कामरूपेण न घनिष्ठः सम्बन्धोऽस्ति ।

कामाक्षोग्रताराललितकामतादिस्थानानां प्राचीनरूपेण सह सम्बन्धमायोज्य एषां स्थानानां महत्त्वं वर्धितुं चेष्टा कृताऽस्ति । योनिप्रतीकोपरि विमर्शस्येदमेव कारणमस्ति यदत्र योनिपीठस्य कल्पना बभूव, तथा भगवतीमहामायायाः रक्तस्रावकथा चित्रिता जाता ।

नरकस्योपाख्याने भगवती, महामाया, अम्बिका, विश्वजननीत्यादिभिः शब्दैः सम्बोधिता, किन्तु तत्पश्चात् भगवत्याः उपरिकामुकताया आरोपः कृतः वर्तते । सैव जनसमाजेऽधिकः प्रचलितोऽस्ति । कथेयमति प्रसिद्धा अस्ति । नरकः कामाक्षादेव्याः रूपेण विमोह्य प्रणयं न्यवेदयत् । चतुर्देवी एकस्यां प्रतिज्ञायां नरकेण सह सहवासं कर्तुं स्वीकृतिं दत्तवती । सेयं प्रतिज्ञाऽस्ति । यदेकस्यामेव रात्रौ नरकः मन्दिरं सरोवरं पर्वतस्याधस्ताद् च मन्दिरं यावत् यातायातमार्गस्य निर्माणं कुर्यात् । सर्वं निर्माणकार्यं समाप्तप्रायमासीत्, तस्मिन्नेव समये देव्याः गोपनीयसन्धिना कुक्कुटः कोलाहलम् अकरोत् । येन नरकस्य प्रणय एव जातः, किन्तु भोगं कर्तुं न समर्थो बभूव । कोचराज्ञां विषयेऽपि एका कथा प्रचलिताऽस्ति । यत् सन्ध्याकाले प्रार्थनासमये मन्दिरद्वारं पिधाय देवीनृत्यं प्रारभत । राजा अस्याः नृत्यरतादेव्याः मूर्त्तं द्रष्टुमैच्छत् । अस्य प्रबन्धं स्वप्रधानपुरोहिते केन्दुकलाईनामधेये समर्पितवान् । तस्यादेशानुसारेण राजपुरोहितः मृत्तिकायां छिद्रं निर्माय द्रष्टुं प्रारभत । इमां प्रक्रियां देवी अपश्यत्, क्रुद्धश्च भूत्वा राजपुरोहितस्य मस्तकमच्छिनत् । राजानं तथा तस्य वंशधरान् शापितवती । यत् पर्वतेऽस्मिन् भवन्तो न कदापि देव्याः द्रष्टुं समर्थो भवेयुः । अस्यां कथायां कियती यथार्थता वर्तते इति कथनं दुरूहमस्ति । किन्तु इदानीं यावत् कोचराजा तं पर्वतं स्वशिरसि क्षत्रं धार्यं गच्छति । देव्याः यौनाकर्षणमेव पर्याप्तं नासीत् अपि तु नूतनभावनाया जागृतिर्जाता, कुत्र कुत्रचित् स्थले त्रिपुरया सह कामाक्षादेव्यभिन्ना कथिता । स एव त्रिपुराया एकोंऽशः त्रिपुरावालाऽस्ति या हस्ते पुष्पाणि, धनुरादायातिष्ठत् । एतदर्थं सौन्दर्यस्य यौनाकर्षणस्य च प्रतीकाऽस्ति । आभ्यां दक्षिणा-

चारवामाचाराभ्यां धाराभ्यां त्रिपुरवालायाः पूजासम्भवाऽस्ति । वामाचारस्य पूजा तदैव सार्थका भवेत् यदा कस्यचित् जीवितरमण्याः पूजा भवेत् । कुमारीपूजाव्यवस्थाऽपि तस्मात् समयात् जाता । कुमार्याः निर्वाचने जातेः बन्धनं नाऽस्ति । सम्यक्तया कुमार्याः पूजया पूजकस्य सर्वविधलाभो भवति । योगिनीतन्त्रानुसारेण ब्रह्माविष्णुमहेशादयः समस्तब्रह्माण्डनिवासिनः कुमार्याः पूजामकुर्वन् । हे सुन्दरि, अहं कोटिसहस्रजिह्वाभिः, मुखैश्चापि कुमार्याः पूजावर्णनेऽसमर्थोऽस्ति । हे प्रिये, सर्वजातिगणेन कुमारीपूजा कर्त्तव्या । हे शिवे कुमारीपूजायां जातिभेदो नास्ति[1] । कुमार्युपासकेभ्यः, वाद्यादकेभ्यः नर्त्तकेभ्यः, संगीतकेभ्यश्च गणिकानां मध्ये रात्रिजागरणमुपयुक्तं स्वीकृतम् । शरत्कालस्य दशमे दिने सुन्दराणि वस्त्राणि परिधाय कुमारीणां गणिकानाञ्च मध्ये स्थिरीभूय अतिवेगेन यौनगुणगानं अत्यावश्यकमस्ति । अपि च परस्परशरीरोपरि तण्डुलान् पुष्पादीनि न विक्षिपन्ति । यद्येषां क्रीडा नाऽभविष्यत् तर्हि देवी तुष्टा नाऽभविष्यत् । अयं श्रावणोत्सवः कथ्यते ।

कामाक्षाया द्वयोः वामाचारदक्षिणाचारयोश्च रीत्या पूजां कर्त्तुं शक्यते । वैदेशिकानां कृते कामाक्षादेव्याः पूजायां न काचित् बाधाऽस्ति । स्वस्वदेशनियमानुसारेण जनाः देव्याः पूजां कर्त्तुं समर्थाः भवन्ति । कामरूपे यादृशः प्रभावो देव्याः समुपलभ्यते नान्यत्र । कामरूपे गृहे गृहे देवी प्रतिमाऽस्ति तथा कामरूपे प्रत्येका नारी देव्याः प्रतिरूपाऽस्ति ।

योगिनीतन्त्रस्याध्ययनेन प्रतीयते यत् कामरूपे तान्त्रिकमते वामाचारदक्षिणाचारौ द्वावेव कथितौ । देव्याः पूजा वाह्यतः आगता इति सम्भाव्यते । अस्यां योगिनीतन्त्रस्य निम्नोक्तांशो द्रष्टव्यः । विश्वम्भरनामा नेत्रवंशीयो राजा वैश्यकुलोत्पनामेकां कुमारीमपूजयत् । सा कांचीनाम्नी सर्वसुलक्षणसम्पन्ना कृष्णवर्णा चासीत् । हे महादेवि, पूजावसरेऽस्याः कुमार्याः कृष्णवर्णशरीरात् प्रभामण्डलः प्रकाशितोऽभवत् । राजा तेन प्रभामण्डलेनाच्छन्नो भूत्वा कैवल्यमलभत । इयं कुमारी कांचीप्रभापूर्णा नासीत् । किन्तु तस्मादेव समयात् ज्योतिर्मयी भूत्वा तस्मिन्नेव स्थाने पूजामगृह्णात् । तथा कांचीमहाफलदायिनीनाम्ना प्रसिद्धा जाता । सर्वप्रकारेण च पञ्चक्रोशस्य पूर्णफलदात्री बभूव । अनेनैव कारणेन कांचीपुरी वाराणसीतुल्या कल्याणदायिनी कथिता । पूर्वे काले महात्मा कम्पिल्यः अनयैव पद्धत्या कुमारीं पूजयामास । सर्वप्रथमे

---

१. योगिनीतन्त्रे— १.१७.२९-३१.

काम्पिल्यनाम्नि नगरे कुमार्याः पूजा बभूव। अद्यापि सा कुमारी शिलारूपे वासं विदधती दृश्यते। यः पुरुषः काम्पिल्यनगरमधिवसति सो देव्याः प्रसादेन अस्य लोकस्य सर्वाणि तुष्टिप्रदभोगानि भुक्त्वा सर्वसम्पत्तिशाली भवति।

ध्यानेनावलोकनेन ज्ञायते यत् दक्षिणभारते या प्राचीनकांचो आधुनिककांजीवरमस्ति तत्रैव कुमारीपूजायाः, तान्त्रिकपूजायाश्च विकासोऽभवत् तदनन्तरमुत्तरप्रदेशस्य काम्पिल्यनगरे भवन् कामरूपे बभूव। अर्थात् दक्षिणभारतादुतरभारते भूत्वा पूर्वभारते कामरूपे च विकासो बभूव। प्राक् यत् श्रावोत्सवस्य वर्णनं कृतं तत् विन्ध्यपर्वतं परितो निवासिनां शवरजनानां दानमस्ति। यथा—सर्वे श्रोताः समुद्रमभिपतन्ति। तेनैव प्रकारेण सर्वाः तान्त्रिकधारा कामरूपेण प्रभाविता बभूवुः। अस्मात् हेतोः योगिनीतन्त्रे नवयोनीनां वीष्ट्युपवीधीपीठोपपीठसिद्धपीठमहापीठब्रह्मपीठविष्णुपीठरुद्रपीठानाञ्च वर्णनं जातम्।[1]

प्राचीनकामरूपस्य विभिन्नेषु स्थानेषु इमान् सकलान् आचार-व्यवहारात् दृष्ट्वा योगिनीतन्त्रे कथितमस्ति यत् आचारव्यवहारः किरातधर्मेण प्रभावितोऽस्ति।[2] अत्र तपस्यायाः, पवित्रतायाः दीर्घकालव्यापिन्याः प्रतिज्ञायाश्चाभावोऽस्ति। परन्तु मत्स्यमांसभक्षणं रमणीभिर्रमणञ्च विहिते स्तः। कामरूपस्य पूर्वीप्रान्तस्य सौभारभूभागे मनुष्याः सकलान् भोगपदार्थान् खादन्ति विक्रीणन्ति च। पूर्वीयप्रान्तस्य कौल्वापीठे न स्वस्याः जातेः कथनेन जातिधर्मः प्रवृत्तो भवति। धर्माधर्माचारे च ते स्वत एव निपुणा भवन्ति। सर्वोऽयमाचारव्यवहारः किरातधर्मे प्रचलितोऽस्ति। तस्यां जातौ बहुविवाहस्तथा मातरं परित्यज्य पितुः पत्नीगमनं, रक्तस्रावक्षरणात् प्राक्वालिकासम्बन्धः, तत्प्रान्तीयानां देवतानां तथा देवीनां सम्मानार्थं यौनपूजा प्रसिद्धाऽस्ति वामाचारमार्गे स्त्रीसंसर्गोऽत्यावश्यको भवति। यत्र प्रेम्णा स्त्रीसंयोगो नोपलभ्यते तत्र धनेन वलेन चान्वेष्यते। प्रसिद्धाभातारानाथेन स्वात्मजीवन्यां लिखितं यत् ज्ञानमित्रनामा कश्चिद् गुरुः स्वशिष्यं शान्तिगुप्तमवोचत् यत् सम्प्रति भवतोऽभिषेकस्य समय उपस्थितो जातः। नद्याः पारे एका सुन्दरी रमणी वसति, तामानयास्माकं पार्श्वे। शिष्यशान्तिगुप्तो नदीमुत्तीर्य अगच्छत्।

१. योगिनीतन्त्रे, १.१७.४४-५३.

२. तत्रैव, २.९.९.

३. तत्रैव, २.९.१३-१८.

किन्तु सा रमणी बहुसुरक्षिता आसीत्। अतः सः शिष्यः धारणीनाममन्त्रेण तां स्कन्धवारमारुह्य गुरोः सन्निकटं आनयत्। धारणीमंत्रप्रभावेण मुखाद् काचिद् वाणी न निःसरति। इयमेव स्त्री परवर्त्तियुगे योगिनी मेनकानाम्ना प्रसिद्धा जाता। वेदपादनामा ब्राह्मणोऽपि काञ्चित् चाण्डालरमणीं मंत्रेण वशीभूतामकरोत्। तस्याः परिवाराय बहुधनं प्रदाय स्वपार्श्वे आनयत्।

कालिकापुराणेऽपि ईदृशः यौनोपभोगस्यानेकाः कथाः प्रसिद्धाः सन्ति। ब्रह्मास्तेन मनसा जातकन्यां प्रति मोहितो बभूव। महावराहो ऋतुमत्या पृथिव्या सहारमत्। कपोत्रमुनिः तारावतीं प्रति प्रणयं प्राकटयत्। ककुस्थ उर्वस्या सह रमणमकरोत्। कापालिकः तारावत्याः दर्शनमकरोत्। रम्भासुरः त्रिवत्सरं यावत् बालिकोपरि धर्षणमकरोत् येन महिषस्य जन्म जातम्। भगवान् शङ्करोऽपि सावित्र्या सह व्यभिचारार्थमगच्छत्। शिवो भ्रमेण तां सावित्रीं स्वकीयां पत्नीमबोधीत्। कालिकापुराणे कपोत्रमुनेर्या कथा वर्णिता वर्तते तया ज्ञायते यत् तस्मिन् समये व्यभिचारस्य, यथेच्छगमनस्य वा न काचित् सीमा आसीत्। कयाचित् विवाहितरमण्या सहान्यपुरुषोऽभि-सर्त्तु समर्थ आसीत्। अनया क्रिययोत्पन्नस्य पापस्य शान्तिः, अपरस्त्रिया सह रमणेनाभवत्। समाजस्य बन्धनं स्तरञ्च विच्छेदे सति एतादृशी दयनीया स्थितिर्भवतीति विषयकमनुमानं सारल्येन भवितुमर्हति। स्थितिरियं काम-रूपस्य किरातजनेष्वपि प्रचलिता आसीत्।

एतदर्थं कामरूपसम्बद्धेतिहासनिर्माणाय कामरूपस्य विभिन्नशासकानां काले प्रचारितायाः, प्रसारितायाश्च शासनावल्यास्तथा शिलालेखानां साहाय्य-मत्यावश्यकमस्ति। अस्माभिः प्रागेव कथितं यत् कामरूपे विभिन्नधर्माणां कीदृशः प्रभावो वस्तुत आसीत्। अस्य ज्ञानाय यादृशानि साधनानि सन्ति तादृगेव विभिन्नैः राजभिः प्रचारिताभिलेखानां मूल्यं नास्वीक्रियते।

अस्माभिर्विभिन्नसूत्रैः कथनमिदं स्पष्टं कृतं यत् बहुप्राचीनकालात् कामरूपः शक्तिवादस्येको विशालं महत्त्वपूर्णं पीठस्थलम् आसीत्। अभिलेखेषु यद्यपि स्पष्टतयाऽस्य विषये न किंचित् प्रमाणमुपलभ्यते तथापि एकाधिकाः शब्दाः प्रयोगाश्च मिलन्ति। एभिः सम्भाव्यते यत् तात्कालिकजनसमाजे देवीतत्त्वस्य, शक्तिधर्मस्य वा प्रभावः परिलक्षितो भवति। तथा शक्तिसम्ब-न्धीनामावली राजपरिवारे परिलक्षिता भवति तथैव जनसाधारणेऽपि अस्या प्रभावो दृश्यते। नामावल्याः सूची अधोलिखिताऽस्ति। भास्करवर्मणो

निधनपुरशासने रत्नादुपोढलक्ष्मीकात्[1] कार्त्तयुगीव श्यामादेवी तस्मादजीजनत्तनयं[2], कामरूपलक्ष्मीसमालिङ्गन[3]-शक्तिकुण्डस्वामी[4], सवितृदेवस्वामी[5]। भास्करवर्मणो दूवीस्थाने लक्ष्मीः पाणि-गृहीत[6] ऋणा सूचीडो देवी श्रीरिवरूपिणि कृष्णेनेव[7] च देवकी भगवती[8] गुणवतीदेवी[9] श्रीलक्ष्मी-लक्ष्मीरिव[10] लक्ष्मीः शिवाविलास[11], वलवर्मणो नवग्रामशासने तत्र श्रीमती हारुप्येश्वर[12] श्यामायिकया मनस्वी[13], हर्जरवर्मणः ड्यूनथललेखे तत्र च देवी कमलनिवासिनीव प्रकटयति रूपगुणान् महादेवी मंगलश्रीः[14]। वनमालस्य तेजपुरशासने श्रीजीवदयेतिसंज्ञा[15] प्रभातसन्ध्येव तेजसो जननी[16], यस्य महादेवी विलोच्य मनसोनुगा भवलक्ष्मीः[17] श्रीकामेश्वरमहागौरी[18] वलमालस्य परवतिया लेखे अभवलल्क्ष्मीः[19], श्रीकामेश्वरमहागौरी[20], चण्डिकापुष्क-

---

१. कामरूपशासनावल्याम् पृ० १३.
२. तत्रैव, पृ० १४.
३. तत्रैव, पृ० १६.
४. तत्रैव, पृ० १६.
५. तत्रैव, पृ० २३.
६. इपि० इण्डि०, वाल्यूम ३०, पृ० २९८.
७. तत्रैव, पृ० ३०१.
८. तत्रैव, पृ० ३०२.
९. तत्रैव ।
१०. तत्रैव, पृ० ३०२.
११. तत्रैव, पृ० ३०४.
१२. कामरूपशासनावल्याम्, पृ० ७७.
१३. तत्रैव, पृ० ७९.
१४. तत्रैव, पृ० ५०-५५.
१५. तत्रैव, पृ० ६०.
१६. तत्रैव, पृ० ६०.
१७. तत्रैव, पृ० ६१.
१८. तत्रैव, पृ० ६३.
१९. इपि० इण्डि०, वाल्यूम, पृ० २६.
२०. तत्रैव ।

स्त्री[1], रत्नपालस्य बडागांवशासने शक्तिः शुभा शाङ्करी[2], सञ्चरणचारुजर्याजितश्रीः[3] अवनिकुलसमुत्थक्ष्मापसंप्राप्तलक्ष्म्याः स्थितमिव[4], श्यामायिका[5], रत्नपालस्य श्यालकूचीलेखे लक्ष्मीरिव जनसेव्या[6], इन्द्रपालस्य गौहाटीताम्रशासने गङ्गेति गौरीगिरा[7], हरेरिवश्री[8], राज्यलक्ष्मीः[9], पत्नीगुणवती सती[10] इन्द्रपालस्य गुआकुचीलेखे गौरीगिरा[11] रत्नप्रभारुचिरमास्पदमेव लक्ष्म्याः[12] हरेरिवश्रीः[13], राजलक्ष्मीः[14], महागौरी[15] महागौरी कामश्चरयोस्[16] लक्ष्मीभारोद्वहनाच्युत[17] सरस्वतीनिजनिवास[18] कामिनीमनोमोहनैकमन्त्रः[19] कलाविलासिनीसुभग[20] हरगिरिजाचरणपंकज[21] गोपहितैषी[22] यशोदया, धर्मपालस्य

---

१. इपि इण्डि०, वाल्यूम्, पृ० २६.
२. कामरूपशासनावल्याम्, पृ० ९२.
३. तत्रैव, पृ० ९३.
४. तत्रैव, पृ० ९५.
५. तत्रैव, पृ० १००.
६. तत्रैव, पृ० ११२.
७. तत्रैव, पृ० ११७.
८. तत्रैव, पृ० १२०.
९. तत्रैव, पृ० १२१.
१०. तत्रैव, पृ० १२३.
११. तत्रैव, पृ० १३३.
१२. तत्रैव, पृ० १३४.
१३. तत्रैव, पृ० १३५.
१४. तत्रैव, पृ० १३६.
१५. तत्रैव, पृ० १३९.
१६. तत्रैव।
१७. तत्रैव।
१८. तत्रैव।
१९. तत्रैव।
२०. तत्रैव।
२१. तत्रैव, पृ० १४०.
२२. तत्रैव, पृ० १३८.

शुभंकरपाटके लेखे अर्द्धयुवतीश्वर[1] महीलक्ष्मीः[2] कमलया[3], गिरिजैव शम्भोः[4], पार्वतीव[5] विजयश्रीनौभुक्तकभूसीम्नि[6]—धर्मपालस्य, पुष्यभद्रालेखे भगवती[7], भास्वरोलक्ष्मीवान्[8] धर्मपालस्य, खोनमुखशासने—अर्द्धयुवतीश्वर[9], गौरी-लक्ष्मीरिव हरेः प्रिया[10] तस्यासीनमनोरमा नाम अपराख्या—मनस्विनी[11] इत्यादिनामानि उल्लिखितानि ।

यद्यैषां नाम्नां तालिकाया विश्लेषणं कुर्यात् तर्हि स्पष्टं भविष्यति यत् लक्ष्मीः, श्रीश्यामा, श्यामापिकया, कमलनिवासिनी, मंगलश्रीः, श्रीजीवदया, भवलक्ष्मी, चण्डिका, गंगा, गौरी, रत्नप्रभा, रुचिरा, सरस्वती ,कलाविलासिनी, गिरिजा, यशोदा, महीपलक्ष्मी, कमला, पार्वती, मनोरमेत्यादिनामावली राज-पत्न्या नाम्ना सम्बन्धिताऽस्ति । तथा तस्मिन् समये कामरूपे प्रतिष्ठिताया: देव्याश्चरितस्य बहुधा विकासं प्रकटयति । अनेन साधारणकामरूपवास्तव्यानां नामस्वपि देव्याः प्रभावोऽनुभूतो भवति । निवनपुरलेखे समुपलब्धशक्तिकुण्ड-स्वामिनः, अर्थोऽयं भवितुं शक्नोति यत् कस्यचित् कुण्डस्य नाम शक्तिकुण्ड आसीत् । तस्य स्वामी वा, अथवा पूर्णसात्विकप्रवृत्तेः पूर्वपुरुषा आसन्, ते स्वतपोभिः तस्याः देव्याः परिचयं दातुमैच्छन्त—येन कारणेन तस्या नाम शक्तिकुण्डो बभूव । वनमालवर्मणः पर्वतियालेखे चण्डिकापुष्करणी-नाम्नरेकस्य तडागस्योल्लेखो मिलति । अस्यायमर्थो भवति यत् पुष्करिण्याः सन्निकटे चण्डिकादेव्या मन्दिरमस्ति येन तस्याः पुष्करिण्या नाम चण्डिका-पुष्करिणी बभूव, अथवा तस्य स्थानस्य नाम चण्डिकादेवीनाम्ना प्रसिद्धं

---

१. कामरूपशासनावल्याम्, पृ० १५०.
२. तत्रैव, पृ० १५२.
३. तत्रैव, पृ० १५३.
४. तत्रैव ।
५. तत्रैव, पृ० १५६.
६. तत्रैव, पृ० १५८.
७. तत्रैव, पृ० १७३.
८. तत्रैव, पृ० १७५.
९. इपि० इण्डि०, वाल्यूम ३०, पृ० २०५.
१०. तत्रैव, पृ० २०८.
११. तत्रैव ।

जातम् । तस्मिन् स्थाने स्थितत्वात् पुष्करिण्या नाम चण्डिकापुष्करिणी बभूव । किन्तु तात्पर्यमेकमेव । अनेन प्रतीयते यत् तस्मिन् समये चण्डिकानाम्नीशक्तेरुपासना तस्मिन् स्थाने बहुव्यापकाऽऽसीत् ।

कामरूपे शक्तिधर्मस्य प्रभावोऽनुशासनस्य बहुव्यापकशब्दैः सुदृढरूपेण प्रमाणितो भवति । यथा तालिका प्रागुल्लिखिता च । वनमालस्य पर्वतियाताम्रशासने कामेश्वरमहागौर्याः, इन्द्रपालस्य गुआकूचीलेखे महागौरीकामेश्वरस्योल्लेखो मिलति । अस्याध्यायस्य प्रारम्भादेव वयम् अस्य तथ्यस्य प्रतिपादने सचेष्टा आस्म । यदत्र बहुप्राचीनकालादेव कामेश्वरापेक्षया कामेश्वरीप्रभावोऽधिकोऽस्ति । शक्तिमार्गः साध्यः परम्परागतो वा भवेत्, जनसमाजेऽस्य विस्तारो व्यापकरूपेणासीत् । एतदर्थमेव साधारणगौर्याः अपेक्षया महागौरीपदं शक्तिधर्मस्य महत्त्वं व्यापकत्वञ्च प्रदातुं प्रयुक्तं बभूव । अर्थात् कामरूपस्याराध्यदेवीपरमेश्वरी महागौर्यासीत् । यदि कामरूपे साधारणजनसमाजे वास्या विस्तारो न भवेत् तर्हि ताम्रशासनेष्वुल्लेखो न स्यात् ।

बौद्धधर्मः

कामरूपराज्ये प्राचीनकालात् बौद्धधर्मः प्रचलित आसीत् न वा इत्यस्मिन् विषये वहुमतभेदोऽस्ति । तिब्वतेतिहासकारतारानाथेन बौद्धधर्मस्येतिहासे कथितम् यत् कामरूपे बौद्धधर्मस्य प्रभावः विकासश्च किञ्चित् परवर्तियुगे वभूव । अर्थात् सप्तदशशताब्द्यां बौद्धधर्मस्याभ्युदयो दृश्यते । प्रसिद्धवौद्धाचार्यघितिकः कामरूपस्य सूर्योपासकान् मनुष्यान् बौद्धधर्मे दीक्षितानकरोत् । ये जनाः सूर्यस्य मन्दिराणां निर्माणं कारयामासुः, ते घितिकप्रभावेण तानि मन्दिराणि ध्वंसीकृत्य बौद्धमठानां निर्माणं कारयामासुः । कामरूपे घितिकप्रभाविण बहवः सिद्धपुरुषाः बौद्धधर्मं स्वीकृतवन्तः । तथा कामरूपे बौद्धधर्मप्रचारस्य प्रयासमप्यकुर्वन् । तांत्रिकशैवपासकोऽश्वाभवो बौद्धधर्ममगृह्णात्, कामरूपे च महायानधर्मस्य बहुरूपेण विस्तारमप्यकरोत् । अश्वाभवस्य प्रभावादेव कामरूपे बहवः शाक्तवैष्णवास्तथा शैवाः स्वस्वधर्मं परित्यज्य भगवतः वुद्धस्य महायानं धर्ममगृह्णन् कामरूपे च बौद्धधर्मं विस्तृतवन्तः । ज्ञात्वेदं सर्वं यत् बौद्धधर्मस्य, परवर्तिपरिवर्त्तनस्य फलमस्ति, तत्सर्व

१. इन्साइक्लोपेडिया ऑफ रिलीजन एण्ड एथिक्स, खण्ड १२, पृ० १९३ ।
२. इन्ट्रोडक्शन ऑफ बुद्धिस्ट इसोटेरिज्म, पृ० ४६.

कामरूपे परिपुष्टरूपं धृतवान्। तान्त्रिकशक्तिधर्मेण सहैव, तान्त्रिकबौद्धधर्मोऽपि कामरूपे प्रचलितो जातः। भारतस्यास्मिन् प्रान्ते बौद्धधर्मस्य वज्रयानशाखायाः प्रतिष्ठायाः, भारतस्य तिब्बतस्य च मैत्रीबन्धनस्य प्रमाणानि सन्ति।

ये ये बौद्धाः, संन्यासिनः, साधवः वज्रयानसम्बन्धितबौद्धधर्मस्य प्रचारस्य प्रसारस्य चोत्तरदायिन आसन् ते सर्वे सिद्धाः घोषिताः जनैः। जनश्रुत्यनुसारेण सिद्धपुरुषाणां संख्या चतुरशीतिः कथ्यते। एषु सिद्धेषु प्रमुखसिद्धाः सरदनागार्जुनलुइयेत्यादयः प्रमुखा आसन् तिव्वती पगसमजानजंगस्यानुसारेण (Pay Sam Zon Jong) सम्भवतः लुइया कश्चित् धीवर आसीत्, य ओड्डियाने उत्पन्नो बभूव ओड्डियानस्य समन्तशुभस्य शासनकाले एकः प्रधान ग्रन्थ आसीत्[1] कश्चित् तिव्वतीगर्वटेवैवकाएवत्सवदनाड़डानै च (gurb tob और toka ababs bdem idem) तस्मिन् काले कामरूपस्य सर्वसिद्धस्य नाम भिन्ननाथः कथितोऽस्ति। कैश्चिद् विद्वद्भिः लुइपा मत्सेन्द्रनाथस्तथाभिन्ननाथैरेकोऽभिन्नश्च कथितः। परन्तु विषयेऽस्मिन् न कश्चित् सन्देहो वर्त्तते यत् लुइपामत्सेन्द्रनाथः, मीननाथो वा कामरूपे बौद्धधर्मस्य प्रवर्तक आसीत्। सरहः अर्थात् राहुलभद्रः कामरूपस्य पूर्वप्रदेशे स्थितायां नगर्यां ब्राह्मणपरिवारे जन्म लेभे। अस्मिन् विषये न कश्चित् सन्देहोऽस्ति यदियं राज्ञी नगरी वर्तमानकामरूपस्य गुवापारासीमायाः राज्ञी नगरी अस्ति। अनेके विद्वान्सः, यथा इटलीनगर्याः प्रसिद्धविद्वान् टुचीसरहस्य जन्म कामरूपस्य शूद्रपरिवारे मन्यते। नागार्जुनः सरहस्य शिष्य आसीत्, यः कामरूपे नेपाले भूटाने च ख्यातिं प्राप्तवान्। मीननाथस्य विषये प्रसिद्धः डॉ० पी० सी० वागची अवोचत् यत् पूर्वभारते स्थितो चन्द्रद्वीपे, समुद्रतटे तस्य जन्म ज्ञातम्। बौद्धशाक्तधर्माद् प्रादुर्भूतो यः कुलमतवादोऽस्ति तस्यैव (कुलमतवादस्य) प्रकाण्डः प्रवक्ता आसीत्। अभिनवगुप्तविरचिततन्त्रालोकस्य प्रसिद्धटीकाकारः तस्मिन्नेव पुस्तके कुलतन्त्रोत्पत्तेरहस्यमवर्णयत्। तस्य मतानुसारेण कामरूपमहापीठे महात्मा मीननाथः भैरवीभैरवाभ्याञ्च तदेव मतमायत्तीचकार।[2]

---

१. साधनमाला—भाग २, पृ० ४७.

२. भैरव्याः भैरवा प्राप्तम् योगम् व्याप्त प्रिये तत्र सखा शाक्तु सिद्धनेन।
मीनारूपेण वरानेन कामरूपे महापीठे मच्छन्देन महात्मना॥
—तंत्रालोके, पृ० २४-२५.

कौलज्ञाननिर्णयपुस्तके निगदितमस्ति यत् कामरूपस्य प्रसिद्धयोगिनी-कौलयानस्य प्रधानः प्रवक्ता मीननाथ आसीत्।[1] केषाञ्चित् विदुषां कथनमस्ति यत् प्राचीनासामीभाषायां अयमेव मीननाथो मत्सेन्द्रनाथो वा वाड्डयान्तरवोधिचित्तबन्धोपदेश इत्यलिखत्। परन्तु पुस्तकमिदं मीननाथ-विरचितमस्ति, अथवा कस्यचिदन्यस्य विषयेऽस्मिन् सन्देहो विद्यते।

प्रसङ्गेऽस्मिन् उल्लेखोऽयमावश्यकोऽस्ति यत् प्राचीनासामीभाषायां वहूनि मंत्राणि लिखितानि सन्ति। सर्वे इमे मन्त्राः वज्रयानशाखां परिपोषयन्ति। प्राचीनासामीभाषायां लिखितमन्त्रपुंथि इत्येषां भाषायां किञ्चिद् रहस्यमप्यस्ति। यथा—सर्पदंशस्य प्रतिशोधकानां दुष्टव्यक्तिशोध-कानां मन्त्राणामुल्लेखोऽस्ति। सर्वमिदं बौद्धसम्प्रदायस्य धारणीसम्प्रदायां तुल्यमस्ति। ह्रयेनसांगस्य यात्राविवरणेन स्पष्टं भवति यत् भास्करवर्मा बौद्धो नासीत्, तथापि सः श्रमणानामुपरि श्रद्धां भक्तिञ्चाकरोत्।[2] यदा भास्करवर्मा न्योषीत् यत् नालन्दायाः संघारामे भगवतो बुद्धस्य परमपवित्रधर्मस्याध्येतुं ह्वेनसांगनामा कश्चित् श्रमण आगतवान्। तदा सः नालन्दायाः प्रधानाचार्याय शीलभद्रायैकं पत्रमलिखत् यस्मिन् पत्रे ह्वेनसांगस्य सादरमामन्त्रणं कृतवान्। अस्य पत्रस्योत्तरे शीलभद्रः अतिसुन्दरं पत्रं भास्करवर्मणः सन्निकटे प्रेषितवान्। अस्य सम्पूर्णविवरणं १७० तः १७१ पृष्ठे लभ्यते। भास्कर-वर्मणः निमन्त्रणं स्वीकृत्य ह्वेनसांगः कामरूपमगच्छत्। भास्करवर्मा सुस्वागतेन स्वकीये प्रासादे तस्मै स्थान प्राददात्। प्रतिदिनं सः तस्मै संगीतस्य, भोजसभायाश्चायोजनमकरोत्। तस्मै च सः उपहारे पुष्पाणि, धूपानि दीपादीनि च समर्पयत्। सः तत्रैकं मासं यावत् स्थितिमकरोत् तदनन्तरं तौ प्रयागे समुपस्थितमहामोक्षपरिषदि योगदानाय सन्नद्धौ आस्ताम्। सम्पूर्णेयं परिषद् महायानस्य विकासार्थं कृता। कथ्यते यत् स्वयं भास्करवर्मा तस्यां सभायां भगवतो बुद्धस्य मूर्त्ति स्वस्मिन् हस्ते धृतवान्। यदा ह्वेनसांगः स्वस्मिन् चीनदेशे प्रत्यावर्तनायेच्छां प्रकटीकृतवान् तस्मिन्नेव काले भास्कर वर्मा प्रतिज्ञामकरोत् यदि ह्वेनसांगः कामरूपे न्यवत्स्यति तर्हि अहं तस्मै स्वीये राज्ये शतबौद्धमठनिर्माणार्थमनुमतिमदास्यम्।

कामरूपस्य प्राचीनशासनावल्याः वहुषु स्थानेषु धर्मशब्दस्योल्लेखो

---

१. कामाख्ये गीयते नाथे महामत्स्योदरे स्थिते ॥ कौलज्ञाननिर्णय, पृ० ४४.
२. ह्वेनसांग, खण्ड २, पृ० १९६.

वर्त्तते । यथा—भास्करवर्मणः निधनपुरताम्रशासने कथितमस्ति—

जयति जगदेकबन्धुर्लोकद्वितयस्य सम्पदो हेतुः ।
परहितमूर्तिरदृष्टः फलानुमेयस्थितिर्धर्म्मः ॥

अनेन श्री के०एल० बरुवा स्वीये 'अर्ली हिस्ट्री ऑफ कामरूप' नाम्नि ग्रन्थे इदं प्रमाणयितुमिच्छति यत् अस्मात् धर्मशब्दात् बौद्धधर्मस्य अर्थात् 'धर्म्मः शरणं गच्छामि' इत्यस्य बोधो जायते, तस्मात् कालादेव च बौद्धधर्मस्य विकासः कामरूपे बभूव । परन्तु अस्माकमिदं मतमस्ति यत् कामरूपे बौद्ध-धर्मस्य प्रतिष्ठा उपयुक्तप्रमाणैः सुव्यवस्थिता भवति, नहि ताम्रशासनानां धर्मपदोल्लेखात् सुव्यवस्थिता । यद्यपि धर्मशब्दो बौद्धधर्मस्य बोधको भवति तथापि हिन्दुधर्मे दर्शनेऽपि च बहुषु स्थानेषु अस्य प्रयोगो दृश्यते । मीमांसा-सूत्रस्य शाबरभाष्ये कथितमस्ति यत्—'या देवो श्रेयस्करा' स एव धर्मशब्देन उच्यते ।[1] महाभारते बहुस्थानेषु धर्मशब्दस्योल्लेखो वर्त्तते, यत्र धर्मपदं विशिष्टदेवताया बोधकं भवति ।[2]

---

१. मीमांसासूत्रभाष्यम् १.२.

२. स समानीय तत्पुत्र तमुपालभ्य पार्थिवम् ।
आत्मानं दर्शयामास धर्म्मः धर्मभृतां वरः ॥

—म० भा० १२.१२८, २२.

प्रीतात्मा स तु तं वाक्यमिदमाह द्विजर्षभम् ।
वाग्मी तदा द्विजश्रेष्ठो धर्मः पुरुषविग्रहः ॥ —म० मा० २४.९०, ८२.

स तु धर्म्मो मृगो भूत्वा बहुवर्षो सोषितो वने । प्रमाणयति यत् धर्मः कश्चित् मृगरूपं दधार । दक्षप्रजापतेः पञ्चशतकन्या आसन् । तासु कन्यासु दशकन्यानां विवाहो धर्मेण सहैव बभूव ।

—महाभारते १.१६.६-१३.

यदा दुःशासनः दौपद्याः वस्त्राणि सर्वेषां समक्षेऽपहृतवान् तदा धर्मः द्रौपद्याः शरीरमाच्छादयत् । महाभारते २.६८, ४६, ४८.

महाभारतस्य वनपर्वणि युधिष्ठिरस्य पञ्चानां पाण्डवानां समक्षे धर्मस्य कश्चित् विशिष्टरूपग्रहणं प्रसिद्धमस्ति ।

—महाभारते ३.३१३.६-८.

इत्युक्तं वाक्ये धर्मेतु चानमारुह्य सः द्विजः ।
सदारः ससुतश्चैव सस्नुषश्च दिवंगतः ॥ स०, २०८.

भास्करवर्मणः लेखे धर्मोऽदृष्टः कथितोऽस्ति। एतादृशी धारणा हिन्दुदर्शने न काचित् नवीना। प्राचीनहिन्दुदर्शने निगदितमस्ति यत्— "वैदिकप्रमाणमेयोथ पुण्यनामाद्रविशेषो धर्म्मः।" हिन्दूनां सर्वेषु दर्शनेषु स्वीकृतोऽयं यत् धर्मो दृश्यतो नास्ति। स्वफलानुसारेणानुगृहीतो भवति। अतः भास्करवर्मणः निधनपुरलेखे वर्णितधर्मो निश्चितमेव हिन्दुधर्मस्य वर्णाश्रमधर्मस्यैव द्योतकोऽस्ति। तस्मिन् लेखेऽधोलिखिताः पंक्तयः उल्लेखनीयाः सन्ति।

"स जगदुदयकल्पनास्तमयहेतुना भगवता कमलसम्भवेनावकीर्णाश्रमधर्मप्रविभागस्य निर्म्मितो[1]।"

अतोऽनुशासनस्य प्रारम्भे धर्मस्योल्लेखो भास्करवर्मणो हिन्दुधर्मं प्रति विश्वासं भक्तिञ्च सूचयति। कामरूपनृपाणां लेखेषु यत्र यत्र धर्मशब्दः समुपलभ्यते तत्र तत्र धर्मशब्देन वैदिकधर्मस्येव बोधो जायते। विषयेऽस्मिन् इन्द्रपालस्य गुआकुचीताम्रलेखे एव प्रमाणमस्ति। तत्र कथितं यत्—

"यस्मिन्नृपे······सम्यग्विभक्तचतुराश्रमवर्णधर्मा[2]।"

अस्मिन् ताम्रलेखे 'तथागत' पदस्योल्लेखो वर्तते। अनेन के०एल० वरुआ, बी० के० वरुआ स्वस्वग्रन्थेषु अस्य तथागतपदस्यार्थो बुद्धः, तस्य शब्दस्य प्रयोगात् च बौद्धधर्मप्रचारं प्रमाणयतः[3]। तस्य ताम्रलेखस्योक्तांशं निम्नरूपमस्ति—

उत्तरेण तथागतकारितादित्यभट्टारकशतकशासनमविषाभूसीम्नि
क्षेत्रालिस्थशाखोटक वृक्षः।
पशुपतिकारितपुष्करिणी दक्षिणपाटो क्षेत्रालिश्च[4]॥

इन्द्रपालो, देशपालनाम्ने ब्राह्मणाय यां पृथ्वीमददात्, तस्याः पृथिव्याः उत्तरसीमाया वर्णनमत्र कृतवान्। अनेन स्पष्टं याति यत् उत्तरसीमावर्णने कथिततथागतपदेन बुद्धधर्मात्, बौद्धभगवतश्च न किमपि तात्पर्यम्। तथागत-

---

१. कामरूपशासनावल्याम्, पृ० १५.

२. तत्रैव, पृ० १३६.

३. के० एल० वरुआ—अर्ली हिस्ट्री ऑफ कामरूप, पृ० १५२; बी० के० वरुआ—कल्चरल हिस्ट्री ऑफ आसाम, खण्ड १, पृ० १६१.

४. कामरूपशासनावल्याम्, पृ० १२४.

पदं कस्यचित् मनुष्यस्य नाम भविष्यति । यः भगवतः सूर्यस्य मन्दिरं निर्मितवान् । तथैव तस्य ताम्रलेखस्योत्तरभागे यत् पशुपतिपदं मिलति तेन पशुपतिपदेन पशोः पतिः अर्थात् भगवतः शिवस्य न कश्चिदर्थः । इदं तु केवलं कस्यचिदेकस्य व्यक्तेर्नामाऽस्ति । यः तडागमेकमखनत्, अथवा उक्ततडागस्योत्खननं कारयामास । तथागतपदस्य पशुपतिपदस्य च मुख्यः प्रारम्भिकाभिधार्थो निश्चितमेव शिवः बुद्धश्च अस्ति । किन्तु कथनमिदं नितान्तमसमीचीनं भविष्यति यत् परवर्त्तियुगे यत्र यत्र तयोः शब्दयोः प्रयोगो बभूवतुः तत्र तत्र बौद्धधर्मस्य तथा शैवधर्मस्य प्रतीतिर्भविष्यति । बौद्धधर्मस्य शैवधर्मस्य न परम शत्रोर्नाम यथाक्रमेण तथागतः, पशुपतिश्च भवितुं शक्नोति । परन्त्वत्र विरुद्धवादिता न काचित् समस्या । वयं इदमेव कथितुमिच्छामः यत् अनयोः द्वयोः पदयोगाधारेण समग्रकामरूपे तत्तद् धर्मस्य व्यापकप्रभावस्य च अनुमानमसम्भवमस्ति ।

तृतीयपरिच्छेदः

आर्थिकीदशा

अस्त्येतत्प्रमाणैः संसिद्धं यत् प्राक् प्राचीनकालात् भारतवर्षे व्यापार-वाणिज्यमासीत् प्रचलितम्। व्यवसायिकवृत्त्यर्थं भारतीयाः लघ्वीभिर्नौकाभि-र्व्यापारमकुर्वन् दूरं स्थितदेशैः सार्धमपि। स्थलपथेनापि भारतवर्षस्य अन्त-र्देशीयहट्टः आसीदतीव लब्धख्यातिः। सुदूरदेशेभ्योऽपि एष देशः प्राप्तलाभः आसीत्। अस्यानेकप्रमाणानि वैदिकसाहित्ये समुपलभ्यन्ते। जलपथेन द्विप्रकारकं वाणिज्यं प्रचलदासीत्। तत्रैकं नदीमाध्यमेन, अन्यच्च समुद्र-मार्गेण। अत्र नास्ति कोऽपि सन्देहः यत् भारतवर्षं नदीप्रधानदेशोऽस्ति। ऋग्वेदे ८.१६.११ स्थले प्रतिपादितमस्ति यद् इन्द्रोऽस्माकं सर्वेभ्यः शत्रुभ्यः नावं रक्षतु। एवं तस्मिन्नेव ६०.६५.३ स्थले प्रतिपादितमस्ति यद् हे मित्र ! वरुणो यथा नावा नद्यां तरणं अशिक्षयत् तथैव नः रक्षतु। भारतवर्षनिर्मित-नौकाभिः अस्मिन् देशे पूर्वतः पश्चिमदिग्भागं यावद् व्यापारं प्रचलितमासीत्। अलक्षेन्द्रेण (सिकन्दर) यथा भारतदेशः आक्रम्यते स्म तदा सिन्धुनद्यां वह्व्यः द्रोण्यः अदृश्यन्त। प्रसिद्धः इतिहासकारः टालीमहोदयोऽपि कथयति यत् तस्मिन् काले द्विसहस्रभारतीयजलपोतेषु अष्टौ सहस्रसैनिकाः, सहस्रशः अश्वाः, प्रचुरास्त्रशस्त्राणि प्रभूतं खाद्यान्नञ्चासीत्। वीसेण्टस्मिथमहोदयः लिखति यत् एताः सर्वा अपि नावः भारतवर्षोपलब्धकाष्ठैः भारतीयशिल्पिभिश्च निर्मिता आसन्।

कौटिल्यस्यार्थशास्त्रेऽपि भारतीयजलपोतनिर्माणसम्बन्धिपरिचयः समुपलभ्यते। अस्मिन् विषये प्रसिद्धः इतिहासकारः स्ट्रैवोमहोदयस्य साक्ष्यं कौटिल्येन तेन समतां भजते। एताः सर्वाः नावः (जहाज) राष्ट्रिया सम्पति-रासीत्, तासां निर्माणकार्यं राष्ट्राधीनमासीत्। एताः नावः शुल्केनापि समुप-लभ्यन्ते स्म। तदर्थं तस्य शुल्कस्य परिमाणस्यापि मात्राग्रन्थेषूल्लिखितास्ति। मत्स्यग्राहिकानां नौकानाम् वनेभ्यः काष्ठानयनकारिणां नौकानाम् धान्यानां पुष्पफलादीनां संग्राहिकानां नौकानाम्, यात्रिकवाहिकानां नौकानाम् एवं भूतानां विविधानां नौकानां नामानि समुपलभ्यन्ते। ऋग्वेदे भारतवर्षात्

जलयानानां अन्यदेशैः क्रयणस्यास्ति संकेतः। तत्र १.२५.७ स्थले उल्लेखो वर्तते, यद् ये व्यापारिणोऽर्थसंग्रहकामाः सन्ति तेऽवश्यमेव समुद्रं पोतं नयन्ति। पुनः १.१८२.५-७ स्थले वशिष्ठर्षिः कथयति यद् यदा वयं वरुणेन सार्धं जलपोतमारूढवन्तः तदा सः जलयानं समुद्रमध्यमगच्छत् तदा तरंगाणां ताडनैः सः जलपोतः नृत्यन्निवासीत्। भूयश्च १.११.४-५ स्थलेऽस्ति वर्णितं यत्तुग्रापुत्रः भुज्जुः भगवतोः अश्विनीकुमारयोः आशीर्वादेन नौदुर्घटनाभिरपि अरक्ष्यत। एवंविधानि अनेकानि प्रमाणानि ऋग्वेदे समुपलभ्यन्ते यैश्च ज्ञायते यद् भारतवर्षस्य बाह्यदेशेभ्यः समुद्रमाध्यमेन विविधादानप्रदानव्यापारः सुप्राचीनकालादस्ति सुप्रसिद्धः।

परवर्तिरामायणकालेऽपि नौयुद्धविषयकविस्तृतवर्णनमस्ति। यत् पंचशतजलपोतैः सहस्रैः कैवर्तैः युक्ता जलसेना शत्रुमार्गावरोधनार्थं सन्नद्धासीत्[1]। रामायणेऽस्ति समुल्लेखः यत् वानरसेना यवनद्वीपं (जावा), सुवर्णद्वीपं (सुमात्रा) मलयेशियादेशं अगच्छत्। महाभारते सभापर्वणि ५१ अध्यायेऽपि भारतवर्षाद् बहिर्देशेभ्यः अनेके राजानः इन्द्रप्रस्थमागत्य महाराजयुधिष्ठिराय उपहाराणि अयच्छन्, रोमदेशस्य राजा जलयानेन आगत्य उपहारं प्रदाय मैत्रीसम्बन्धं स्थापितवान्।

बोधायनधर्मसूत्रे २.२.२ धार्मिकब्राह्मणानां कृते समुद्रयात्रायाः निषेधोऽस्ति। जलयानेन समुद्रयात्रां कुर्वतां ब्राह्मणानां कृतेऽस्ति कठोरप्रायश्चित्तस्य विधानम्। अत्र आर्यावर्त्तस्य अनेके जनाः जलपोतैः समुद्रयात्रामकुर्वन्नित्यप्यस्त्युल्लेखः[2]।

मनुसंहितायामपि समुद्रयात्राकारकाः ब्राह्मणाः पतिताः उद्घुष्टाः। कौटिल्यस्यार्थशास्त्रानुसारं चन्द्रगुप्तसमये भारतस्य दूरस्थितैः देशैः साकं व्यापारिकमासीत् सम्बन्धः, अस्य चानेकानि प्रमाणानि समुपलभ्यन्ते।

"परविषयकः समुद्रः सार्थवासान् पात्राणि ...."

अनेन ज्ञायते यत् समुद्रपथमाध्यमं बहुव्यापकमासीत्।

पालिसाहित्येऽपि प्राचीनभारतस्य अनेकदेशैः सह वाणिज्यस्य

---

१. रामायणे अयोध्याकाण्डे ८४.७८.

२. बोधायनधर्मसूत्रे १.२.४.

माध्यममेवासीत्। जातकेष्वस्य सन्ति अनेकानि प्रमाणानि। ५.५१८ एवं ४.४४२ जातके अस्त्युल्लेखः यत् कस्मिन् समये ५ शतजनाः वाणिज्यार्थं जलपोतमारुह्य समुद्रमगच्छन् । सततसप्तदिवसयात्राकरणादनन्तरं स पोतः मग्नोऽभवद् एवञ्च ४९९ जनाः समुद्रे निमग्नाः अभवन् अनया वार्तया अवबुध्यते यत् कोऽपि व्यापारी अन्धसुपरकं कर्णधारं कृत्वा समुद्रयात्रार्थमगच्छत्, 'खुरमाला' समुद्रंगत्वा ततः सुवर्णरजतबहुमूल्यहीरकमौक्तिकादीनि रत्नान्यादायागच्छत्[1]। अनेन तत्कालीनसमुद्रीयव्यापारपरिचयः सम्यक् समुपलभ्यते।

'मिलिन्दपन्हो' स्थलेऽस्ति वर्णितं यद् हे राजन् ! एते पोतवणिजः जलयानस्थानकस्य (बन्दरगाह) शुल्कं निर्धार्य धनिकाः भवन्ति[2]। ऋग्वेदात् स्पष्टं प्रमाणीभवति यत् प्राक् प्राचीनकालात् बैबीलोन-मिश्र-सीरिया-बैक्ट्रिया-चीन-जावा-सुमात्रा-लंका-मलक्का-पेगु-रोम-प्रभृतिभिर्देशैः सार्धं समुद्रद्वारा वाणिज्यमासीत्।

कामरूपेतिहासानुसन्धित्सूनामनुसन्धानैः ज्ञायते यद् प्राचीनकालात् जलस्थलमार्गेण त्रिविष्टप (तिब्बत)-चीन-ब्रह्मा (वर्मा) दिभिर्देशैः कामरूपस्य व्यापारिकसम्बन्धः आसीत् । हैमिल्टनमहोदयः 'जाग्राफिकल स्टेटस्टिकल एण्ड हिस्टोरिकल डिस्क्रिप्शन ऑफ हिन्दुस्तान एण्ड दी एडजिसेण्ट कण्ट्रीज' नामके स्वग्रन्थे लिखति यत् कामरूपस्य जलमार्गस्य ख्यातिः प्राचीनकालादेव समीपवर्तिदेशेषु आसीत्। देशान्तरिकभागे कामरूपस्य व्यापारिकसम्बन्धः वंगमगधउत्कलप्रदेशैः सह ब्रह्मपुत्रगंगानदीमाध्यमेनासीत्। ईसवीय शतके यदा भास्करवर्मा ह्वेनसांग कामरूपागमनार्थमामन्त्रितमकरोत् यदा सह्वेन्त्सांगनामा चीनयात्रिकः स्वसहयोगिभिः सार्धं मगधप्रदेशात् प्रस्थानं कृत्वा चम्पकारण्यं पुण्ड्रवर्धनं अतिक्रमन् पूर्वं कामरूपदेशं प्राप्तवान् भास्करवर्मा स्वयमेव गंगायाः तटे (Ki-Su-Lovi-to)[3] सहर्षेण तस्य स्वागतमकरोत्। तस्मिन् काले कामरूपराज्ये सुदृढद्रुतगामिनीनां द्रोणीनां निर्मितिरभवत्, यतः भास्करवर्मणो दूतः कामरूपात् पत्रं आदाय दिवसद्वयेनैव नालन्दानगरमगच्छत्[4]। हर्षेणापि उत्कलस्थिते गंजामस्थानात्

१. जातके ४.४६३, ४६६, ६.५३९ एवं ४.४४२.

२. मिलिन्दपन्हो ६.२१.

३. वर्तमानराजप्रासादस्थिता।

४. Life of Hiuen Tsiang, p. 169.

नावा एको दूतः प्रैष्यत[१]।

बील—"बुद्धिस्ट रेकर्ड ऑफ वेस्टर्न वर्ल्ड" मध्ये लिखितमस्ति यद् भास्करवर्मणा एवं तस्य पूर्ववर्तिभिः राजभिः सह चीनदेशीयानां राज्ञां वाणिज्यसम्वन्धोऽतीवोत्कृष्टआसीत्। ह्वेन्त्सांगः स्वयमेवैतत्प्रमाणयति। यदा ह्वेन्त्सांगः चीनदेशं परावर्तनस्य प्रस्तावमकरोत् तदा भास्करवर्मणः सः कथितः यत् "अहं न जाने यद् भवान् केन पथा गमिष्यति एवं केन पथा आगमिष्यन्ति। किन्तु यदि भवान् दक्षिणसमुद्रमार्गेण प्रत्यागन्तुमिच्छति तदाहमस्य प्रबन्धं करिष्यामि चत्वारः पंच वा विशिष्टजनाः भवता सार्धं प्रेषयिष्यामि।" कामरूपात् चीनदेशस्य स्थलपथयात्रा प्रसिद्धैव। तस्मिन् काले मासद्वयस्य चीनदेशात् कामरूपस्य वर्त्म आसीत्। किन्तु पन्थानोऽतिविकटस्तथा भीषणसर्पैः युक्ताः आसन्, स्वयं ह्वेन्त्सांगमतमिदम्। भास्करवर्मणः समये एव चीनदेशात् कोऽपि गायकः स्थलमार्गेण कामरूपमागच्छत्, स च चीनदेशस्य स्सिनप्रदेशस्य राज्ञः कापोत्सौ इत्यस्य दुष्टसेनापतेः ल्यू-वऊ-बाऊ इत्यस्योपरि विजयवार्ताया उल्लेखः करोति। पेलियाटमहोदयः स्वग्रन्थे लिखति यत् पूर्वीयभारतस्य तथा कामरूपस्य व्यापारिकसम्बधः चीन-उत्तर-ब्रह्मदेश यूनानप्रदेशैः साकमासीत्। चीनदेशात् कामरूपमागमनस्य प्रधानौ द्वौ मार्गौ आस्ताम्। चीनतः 'चौ-कौं-लियान' स्थानमतिक्रम्य दक्षिणभागे 'तेन-च्योग' स्थानं एवं 'ओनी' पर्वतं चातिक्रम्य व्यापारिणः 'लीसोपी' स्थानं प्रापुः। 'लीसोपी' वर्तमानमनुस्थानसमीपमस्ति। अतः परं ते 'लांग सिवान्' नाम्नीं एव 'भिन्नो' नाम्नीं नदीं तीर्त्वा कामरूपमगच्छन्[२]। भास्करवर्मणः समये एकः बौद्धपरिव्राजकः बुद्धगुप्तः कामरूपात् स्थलमार्गेण ब्रह्मदेशमगच्छत्[३]।

प्राचीनकालात् त्रिविष्टप (तिब्बत) राज्येन सह कामरूपस्य यद् व्यापारिकसम्बन्धः आसीत् स सुविदित एव। भास्करवर्मणः राज्यकाले त्रिविष्टपदेशात् कति अश्वाः क्रीताः, तेषांम् आनयनार्थं ३५ पर्वतान्नतिक्रम्य

---

१. Life of Hindu Tsiang, p. 188.

२. P.C. Bagchi, India and China, p. 18.

३. G. Tuaci, The Seoupand land travel of a Buddhist Sadhu in the Sixteenth century, Indian Historical Quarterly, Vol. VII, p. 683-701.

तस्य जनाः तद् देशं प्रापुः[१]। तदा जनाः 'ल्हासा' स्थानाच्चलित्वा मासद्वयानन्तरं 'चोना' स्थानं प्राप्नुवन्ति स्म। 'चौनातः' क्रोशद्वयदूरं 'गोगुनसूर' स्थानमस्ति यच्च कामरूपेऽवस्थितमासीत् तदा जग्मुः। आसामप्रदेशात् पशूनां चर्माणि, क्षोयवस्त्राणि, मौक्तिकादीनि वस्तुजातानि त्रिविष्टपराज्यमक्रीणात् एवमेवोक्तप्रकारेण तिब्बतदेशात् बहुविधानि वस्तुजानि कामरूपराज्यमप्यक्रीणात्।

कामरूपदेशमध्यानेकनद्यः प्रावहन्। याभिस्तत्र व्यापारिकं कार्यं सुचारुरूपेण प्रचलदासीत्। आसु समासु कूलंकषासु नावां प्रचलनमभवत् ताभिश्च नौकाभिः व्यापारिणः वतूर्सनि आदाय जलयानस्थानकं (बन्दरगाह) अगच्छन् कामरूपस्य प्राग्ताम्रशासनेषु एतासां नदीनां न केवलमुल्लेख एव अपि तु सुविस्तृतं सुचारु च वर्णनमप्यस्ति। भास्करवर्मणः निधनपुरशासने स्रोतस्वतीनां नदीनामुल्लेखो विद्यते ययोर्नाम्नी कौशिका गंगणिका च वर्तेते[२]। वनमालस्य तेजपुरशासने एकस्याः नद्याः वर्णनमस्ति या सदातोयासीत्, तस्याञ्च नौकाभिर्यातायातमभवत्। सदा गाधतोया नदी यस्याञ्च आवर्षं नौकानां संचारो भवति सा च उत्कृष्टतया नदी निर्धार्यते। तत्र कामकूटगिरिसमुद्भवायः तस्याः नद्याः स्रोतः त्रिकालं पूतमुद्घुष्यते[३]। बलवर्मणो नवगांवशासनेऽपि एकस्याः नद्याः वर्णनं विद्यते, यापि स दानीरासीत्, तस्यां आवर्षं नौसंचारस्यास्ति संकेतः, 'नौकाबन्धिक[४]'। रत्नपालस्य बडागांवशासने इन्द्रपालस्य गुआकुचीगौहाटीशासनयोः 'नौकाबन्ध[५]' शब्दस्योल्लेख उपलभ्यते।

कामरूपस्य व्यापारे वाणिज्ये सर्वाधिकसहयोगदायिका नदी आसीत् लौहित्यनाम्नी नदी। नद्येषा कामरूपे प्राचीनतमा, प्रसिद्धतमा प्रधाना चासीत् रत्नपालस्य बडागांवशासने, "सर्वकुलुषं लौहित्यसिन्धुर्जगत् निर्दिष्टं विद्यते। इन्द्रपालस्य गौहाटीशासनेन ज्ञायते यत् तत्काले नदीभिरासीत् प्रचुरं

---

१. जर्नल ऑफ दी रिसर्च सोसाइटी ऑफ आसाम, खण्ड ८, पृ० २४१-४७.

२. कामरूपशासनावल्याम्, पृ० २६.

३. कामकूटगिरे······पवित्रपयः सम्पूर्य स्रोतसा। तत्रैव, पृ० ६३

४. तत्रैव, पृ० ७८.

५. तत्रैव, पृ० ९९, १२२, १३७.

वाणिज्यम् । यथा शैवा 'नदी' 'दिग्गुरम्भा' नदी च निर्दिष्टे आस्ताम्[1] । शुभंकरपाटकशासने सैव नदी दिग्जिन्ना नदी, एव द्वयोः नद्योः नाम्नी समुपलभ्येते । धर्मपालपुष्पभद्रशासने स्वर्गङ्गानद्या व्यापारिकयातायातस्योल्लेखः प्राप्यते, नद्येषा तत्कृते प्रधानतयासीत् । अस्मिन् न केवलं नदीनां नामानि एव अपितु ताभिः सम्पाद्यमानानां कार्याणां सचित्रमुल्लेखोप्यस्ति । तत्रास्त्युल्लेखः यत् तत्र कापि नदी गंगेवासीत् । तद्विषये 'गुरुमङ्गतसङ्गरजिता' एवमस्ति उल्लेखः । अन्यस्याः विषये 'गंगासंगोच्छलित' एवमुल्लेखः कृतः । अपरस्याः विषये 'दक्षिणेन वेक्कशुष्कानदी' संकेत्यते यदेषा नासीत् सदानीरा, प्रावृड्दिवसेषु एवं हिमद्रवणसमये एषा नदी जलयुक्तामवत्, तदा च तस्यां नवा यातायातमभूत् । एवं प्रकारेण प्राचीनकामरूपे विविधप्रमाणैः व्यापारिकायाः स्थितेः परिचयः प्राप्यते तथा च ज्ञायते यत् तस्मिन् काले कामरूपराज्ये विविधवस्तूनां निर्माणमभवत् निर्मितानां वस्तूनां निर्यातञ्चाक्रियत जनैः एवमेव आयातस्यापि प्रमाणानि समुपलभ्यन्ते । एतस्तु पूर्वमेव वर्णितं यत् व्यापारसाधनभूतद्रोणीनामुत्पादनविषयदेशः स्वावलम्बी आसीत् । एवं कामरूपदेशः सर्वप्रकारेणार्थिकीं स्थितिमात्मानुरूपां स्वीचकार ।

भूमिव्यवस्था

प्राचीनेषु भारतीयशास्त्रेषु भूमिसम्बन्धिप्रश्नमादाय सुचारुसमाधानमभवत् । सम्पत्तिः या मूलतः द्विधा आसीत्, १. गतिशीला, २. स्थितिशीला च । स्थितायाः सम्पत्तेरन्तर्गतं भूमेः पुष्करिण्याः गृहादीनामासीत् स्थानम् । ऋग्वेदे एकस्मिन् स्थलेऽस्ति समुल्लेखा यत् ऋग्वेदीयजनैः तत्कालीनैः (रगुओ) दण्डेन परिमाणमक्रियत । पुनश्च वर्णनमस्ति अन्यस्मिन् स्थलेऽस्ति व्याख्यानं यत् वयं पितुः भूमौ धान्यान्यवपन्[3] । अन्यस्मिन्नैकस्थले वर्तते संभाषणं यत् पुत्रः भूमिश्च द्वावपि महार्घौ स्तः[4] । तस्मिन्काले जनाः भूमिपतिमहत्त्वमददन् यत् तत् सम्बन्धेऽसत्यभाषणं विनाशमूलमासीत् । ऋग्वेदकाले भूमिदानस्योल्लेखः नोपलभ्यते परवर्तिकाले शतपथब्राह्मणे प्रथमवारं यत् आवासार्थं भूमेः स्वल्पेनापि दानेन दाता धनवान् जायते ।[5] महाभारत-

१. कामरूपशासनावल्याम्, पृ० ६२१.

२. तत्रैव, पृ० १२४; ऋग्वेदे, १.११०.५.

३. ऋग्वेदे, ८.८०.५.

४. तत्रैव, ४.४.६.

५. शतपथब्राह्मणे, १३.७.१५.

काले एवंभूतानामनेकानां भूमिदानानामुल्लेखाः प्राप्यन्ते । महाभारतस्य ६६ अध्यायेऽस्ति वर्णितं यदेवंभूता भूमिः यक्षाभिक्षु-यव-गोघूमादीनामुत्पत्तिः क्रियते तस्याः दानेन दातारो जन्मान्तरे सौभाग्यशालिनो भवन्ति एवमेव यत्र भूमौ कोयला-लौह-ताम्रादीनामस्ति खनिः तस्या अपि दानेन । महाभारतानुशासनपर्वणि ६९ अध्याये श्रोत्रियब्राह्मणाय भूमिदातास्ति केवलं क्षत्रिय राजा एव नान्यः कोऽपि ।

पालिसाहित्येऽपि भूमिदानस्यास्ति अत्यन्तगौरवपूर्णवर्णनम् । तस्मिन् काले आसीत् प्रत्येकस्य परिवारस्य भूमिः । भूमिदानप्रथायाः भूमिविक्रयप्रथायाश्चासीत् प्रचलनम् । ब्राह्मणाय भूमिदानं पुण्यमूलकमासीत् ।[1] अस्मिन् प्रसंगे ध्यातव्यमिदं यत् तत्काले भूमेरस्ति स्थले-स्थले समुल्लेखः परन्तु तस्याः परिमाणस्य न कुत्रापि । मनुसंहितायाः ९.२१९ इत्यनेन ज्ञायते यत् सज्जाभूषणवाहनशकटिकाभोजनद्रव्यजलस्त्रीपशुवारणानां कृते भूमिविभागो नैव भविष्यति । शंखेनापि कारिकायामपि भूमिः अविभाज्या प्रतिपादिता ।

भूमेः प्राकृतिकः कः अधिकारीत्येतद्विषयमादाय वैदिककालाद् विवादः प्रचलति । कामरूपे समुपलब्धानुशासनेष्वपि नाप्नोत् किमपि शान्तिपूर्णं समाधानम् । एकस्मिन् पक्षेऽस्ति प्रतिपादनं यत् राज्ञो राज्ये यावती भूमिः स तस्याः समस्याः भूमेरधिकारी, विधानेनानेन लोकेषु मनःसु सर्वदासीच्चिन्ता यत् तेषां कृषिर्भूमि कदा हरेत् । शतपथब्राह्मणस्यानुसारं स्वेच्छया राजा यस्मै कस्मै भूमिं दातुं प्रभुः ।[2]

अस्य विरोधे एकः वादः प्रचलितोऽस्ति यद् भूमिः केषाञ्चिद् व्यक्तिविशेषाणामस्ति सम्पत्तिः न राष्ट्रस्य । वैदिकसाहित्ये व्यक्तिगतभूमिरस्त्यतीवोल्लेखनीया । मनुरपि कथयति यत् पूर्वं प्रथुनामक आसीदेको राजा सः यस्याः भूमेः रक्षणमुपभोगश्च व्यक्तिगतरूपेणाकरोत् तस्याः भूमेर्नामास्ति पृथ्वी । अनेन भूमिरेषा व्यक्तिविशेषस्य प्रमाणिता भवति । रामायणे महाभारते च एकाधिकाः प्रमाणानि समुपलभ्यन्ते यथा 'कोऽपि स्वभूमौ बीजानि नोप्त्वा, अन्यस्य क्षेत्रे बीजान्यवपत्' । केपि स्वक्षेत्रं कण्टकैरावेष्टितं करोति, येन तत्र श्वभल्लुकादयः नागच्छेयुः । नीतिशास्त्रे अन्यभूम्युयानापहारकाय पुरुषाय

१. जर्नल ऑफ एशियाटिक सोसाइटि, १९०१, रैसडेविड्स ।
२. शतपथब्राह्मणे, ७.१.८.

कठोरतमदण्डस्यास्ति विधानम्। अत्र विषयेऽस्त्येकं तृतीयमतं यत् भूमेः स्वामी पुरुषः परन्तु तस्यां भूमौ समुत्पादितानां वस्तूनामेकांशस्य स्वामी राजा अवश्यमेव भवति। यदा भूमिः अत्यत्याचारैः व्याप्याभवद् एवं सर्वत्र मत्स्यन्यायस्य स्थितिरासीत् तदा ब्रह्मा मनुं अस्याः पृथिव्याः राजानं कर्त्तुमैहत, परन्तु मनुस्तु अस्माद् राजपदाद् भयमत इवासीत्। प्रजाभिः सः आश्वस्त यत् ताः स्वपशुधनेभ्यः ५० प्रतिशतम्, सुवर्णादिभ्यः १० प्रतिशतं भागं दास्यामि, एवमेव ताः धान्योञ्छादीनां षष्ठांश भागं दातुमकथयन्। सूत्रकालेऽपि सूत्रकारेषु नास्ति मतैक्यम्। गौतम-बृहस्पति-नारद-वसिष्ठादीनामस्ति सर्वेषु परस्परं मतैक्याभावः। उपर्युक्तेषु त्रिषु मतेषु मध्यात् कस्यापि मतस्यैकस्यैतेऽवश्यमेवानुसरणं कुर्वन्ति।

प्राचीनकामरूपाभिलेखेषु अनेकस्थलेषु भूमिदानस्योल्लेखोऽस्ति। एतैर्भूमिदानोल्लेखैर्भूमेर्वास्तविकः कः स्वामी आसीत् अस्य स्पष्टकरणार्थं समेषामभिलेखानामध्ययनमावश्यकं प्रतीयते। पूर्वस्य तथोत्तरस्य भारतस्याभिलेखेषु सामान्यतयेदं प्रमाण्यते यत् तात्कालिकभूभागस्य स्वामी पूर्णरूपेण राजैवाभवत्। अस्माभिः सर्वेषां कामरूपताम्रशासनानामध्ययनं कृत्वा तेषु मध्यादत्यन्तानि तथ्यपूर्णानि प्रयोजनानि च उदाहरणान्यादायात्र दीयन्ते। बलवर्मणः नवगांवताम्रशासनेऽस्त्युल्लिखितम्—

"श्रीबलवर्मदेवेन दक्षिणकूले·········भूमि·········श्रुतिधमनामाय विप्राय दत्ता।"[1]

एवमेव रत्नपालस्य बडागांवशासने, इन्द्रपालस्य गौहाटीशासने एवं गुआकुचीशासने च धर्मपालस्य च शुभंकरपाटकशासने पुष्पभद्राखोनमुखशासनयोश्च सन्ति भूमिदाने विवरणानि। एतेषां समेषामुपुर्युक्तांशानां पर्यालोचनया स्पष्टं प्रतिभाति यत् तत्काले भूमेः केवलमेकमात्रं राजैव प्रभुरासीत्। यदि राजैव तासां समेषां भूमीनां स्वामी न स्यात् तर्हि स कामपि भूमिं कथं दातुं समर्थो भूयात्। उत्तरभारतात् पूर्वभारताच्चोपलब्धानामभिलेखानामध्ययनेनास्य मतस्य पुष्टिर्भवति।

किन्त्वत्रेदं विचारणीयं यद् यद्यपि राजा भूभागस्य पतिरासीत् अस्मिन्विषये नास्यि वैमत्यम्। परन्तु प्राचीनानां कामरूपताम्रशासनानाम-

---

१. कामरूपशासनावल्याम्, पृ० ७८.

अध्ययनेन ज्ञायते यद् भूमागस्य दानादेशेन केवलं राजाधीनकर्मचारिण एव प्रतीयते स्म, अपितु प्रदत्त तत्तद् भूमिखण्डपार्श्ववर्तिजना प्रसिद्धा ग्रामपंचायत-संस्था अपि तदादेशेन अवबुद्धयन्त । बलवर्मणः नवगांवताम्रशासने उल्लिखितमस्ति—

"समुपस्थितान्ब्राह्मणादिविषयकरणव्यवहारिकप्रमुखजानपदान् । राज-राज्ञीराणकाधिकृतानन्यांश्च यथाकालभाविनोपि सर्व्वान् सम्माननापूर्व्वम्मान-यति बोधयति समादिशति च ।"[1]

अनेन नवीनं तथ्यमवगम्यते यद् एतेषु प्रदत्तभूमिखण्डेषु ब्राह्मणानां प्रमुखग्राम-वासिनाञ्च कोऽप्यधिकारोऽवश्यमेवासीत् । न्यूनातिन्यूनमेवमधिकारो येन तान् सूचनां विना राज्ञा ब्राह्मणेभ्यः प्रदत्तं तद्दानं न्यायिकदृष्ट्या पूर्णतां नालभत । राज्ञा दाने प्रदत्तायाः भूमेः आहरणं शास्त्रगर्हितमासीत् । एवञ्च अनेकेषु अभिलेखेषु लिखितं वर्तते यत्ते राजानः ये पूर्वपुरुषैः प्रदत्तां भूमिं तेभ्यः हरन्ति ते पूर्वजैः सह विष्टायां कृमयो भवन्ति नारकीं यातनामनुभवन्ति च । ब्राह्मणेभ्यः प्रदत्ता भूमिः द्विविधा आसीत्, प्रथमा कृषिकार्ययोग्या, द्वितीया तदयोग्या ।

रत्नपालस्य बडागांवताम्रशासनेऽपकृष्टभूमेरुल्लेखोऽस्ति केनापि आङ्ग्लविदुषा अस्याः अपकृष्टभूमेरर्थो निम्नस्तरीया भूमिरक्रियत । किन्त्वत्रा-स्माकं सम्मतिः यत् राज्ञां राज्येषु उत्कृष्टभूमेः परिमाणं किमेवं न्यूनमासीत् यदपकृष्टभूमेः धार्मिकं दानं दत्त्वा तेऽधर्मसंचयनार्थं प्रयत्नशीला अभवन् । कठोपनिषदि नचिकेता स्वपित्रा यज्ञे ब्राह्मणाय वृद्धां गां ददता दृष्ट्वा विरोधमकरोत् । अपकृष्टभूमिदानग्रहीतुर्न कोऽपि लाभ आसीदपितु हानिरेव, अतो राजानः पापभागिनः स्युः । अतएवास्ति मन्मतं यदपकृष्टस्य कोऽप्यन्य एवार्थः स्यात् । रत्नपालस्य प्रथमशासनेऽस्ति लिखितं यत्—

"उत्तरकूले त्रयोदशग्रामविषयान्तः पातिवामदेवपाटकापकृष्टभूमिसमेत-लावुकुटिक्षेत्रे धान्यद्विसहस्रोत्तपत्तिक भूमौ ।"[2]

यत्र द्विसहस्रद्रोणपरिमाणकधान्योत्पत्तिः स्यात् तत्क्षेत्रं कथमपकृष्टं ब्रूयात् । अपकृष्टमिदं पदं केवलं कामरूपस्य राज्ञामभिलेखेषु नोपलभ्यते परन्तु बंगदेशे-

१. कामरूपशासनावल्याम्, पृ० ७८.
२. तत्रैव, ९८-९९.

पालवंशीयानां राज्ञां शासनावल्यामपि बहुवारमुल्लिखितमभूत्। महाभारतस्योद्योगपर्वणि १.१५ अध्यायेस्त्युल्लिखितम्—

'पित्र्यं हि राज्यविदितं नृपाणां यथापकृष्टं धृतराष्ट्रपुत्रैः।'

दुर्योधनादिभिः धार्तराष्ट्रैः पाण्डवानां पैतृकराज्यमपह्रियत। यद्यपि कामरूपाभिलेखेषु यत्र यत्रापकृष्टशब्दानां प्रयोगोऽभवत् तस्यार्थः नापहरणं भवितुमर्हति, तथापि तस्यार्थोऽयं भवितुं संभाव्यते, यत् तस्य भूभागस्यान्यकोऽप्यधिकार्यासीत्, यस्माद् राज्ञापहृत्यास्मै ब्राह्मणायादीयत। रत्नपालस्य पौत्रः इन्द्रपालस्य द्वितीयशासनस्य ३४-३५ पंक्त्योः भूमिसम्बन्धिविवरणे लिखितमस्ति यत्—

'उत्तरकूले मन्दिविषयान्तः पातिपण्डरीभूमितोऽपकृष्टधान्यद्विसहस्रोत्पत्तिकभूमौ।'[1]

अत्रापकृष्टशब्दः भूमिशब्दश्च इति द्वौ शब्दौ वर्तेते। अस्य कारकमपादानं विद्यते। अपादानकारकस्यार्थस्तु एकतोन्यत्रगमनं विश्लेषमिति तात्पर्यम्। धर्मपालस्य प्रथमशासनेऽस्त्युल्लेखः यत्—

'ओलिन्दापकृष्टकञ्जियामिद्रिव·शुभंकरपाटकभूमौ।'

पुनश्च तस्यैवाभिलेखस्य श्लोकेऽस्ति--

'आलिन्दभूतलसमन्तिककञ्जियकभिट्वीभूवान्वितशुभंकरपाटकाख्याम्।'[2]

इदमेव वक्तुं शक्यते यद् गद्ये यत्रापकृष्टशब्दोऽस्ति, पद्ये तत्रैव समन्वितपक्षमस्ति यदि कोऽपि तत्रापकृष्टशब्दस्य अर्थः उपर्युक्तादुधृतार्थाद् भिन्नः अर्थः करोति तर्हि सोऽर्थो भवितुं नैव शक्यते। अतोऽनेनास्य स्थलस्यायमेवार्थः प्रतीयते यद् 'अलिन्द' युक्तभूभागस्य नाम 'कञ्जियभिट्' इत्यासीत्। 'कञ्जियाभिट्ट' स्यैकांशस्य शुभंकरपाटकस्य दानमभूत्।

करप्रथा

कामरूपस्याभिलेखेषु दाने प्रदत्तां भूमिं 'अग्रहार'-संज्ञासीत् तथा च एतानि सर्वाणि अग्रहाराणि अवश्यमेव निःशुल्कान्यासन्। केनापि अभिलेखेन एवं न ज्ञायते यद् ब्राह्मणेभ्यः प्रदत्ताय भूमेः किमपि शुल्कमदुह्यत। विदुषां

---

१. कामरूपशासनवल्याम्, पृ० १२२.

२. तत्रैव, पृ० १५६.

पूज्यानां ब्राह्मणानां वैदुष्यताया पुरस्कारस्वरूपं तेषां परिवाराणां योगक्षेमाय तेभ्यः निःशुल्कभूमिप्रदानम् 'अग्रहारम्' राजानोऽकुर्वन्, तद्दानेन ते पुण्यार्जनञ्चाकुर्वन् । किन्त्वनेन नैतत् स्पष्टं भवति यत् तस्मिन् समये सर्वेषां भूमिर्निःशुल्कासीत् तथा एतत् भवितुमर्हतीति नैव शक्यते। साधारणभुक्तायाः भूमेः अग्रहारभूमेश्च मध्यऽन्तरमस्त्यत्यन्तमिति । यतः अग्रहारभूमिः निःशुल्कैवासीत् । अस्यायमर्थो यद् स सम्पूर्णा भूमिः निःशुल्कासीत् अर्थाद् विभिन्नप्रकारकाणि कराणि भूमेरासन् । अस्य प्रमाणं भास्करवर्मणो निधनपुरशासने उपलभ्यते ।

'विदितमस्तु भवतामेतद्विषयान्तः पातिमयूरशाल्मलाग्रहार क्षेत्रं राज्ञा श्रीभूतिवर्मणा कृतं यत् तत्ताम्रपट्टाभावात् करदमिति महाराजेन ज्येष्ठभद्रान् विज्ञाप्य पुनरस्याभिनवपट्टककरणाय शासनं दत्त्वा ।'[1]

एतेन प्रतीयते यद् महाराजभूतिवर्मा मयूरशाल्मलभूमिमग्रहाररूपेण येभ्यः ब्राह्मणेभ्यः प्रदत्तवान्, तेषां, तस्य ताम्रपट्टस्य विलोपात् पुनः राजकोषे शुल्कदानमावश्यक भविष्यति, अतः भास्करवर्मा पुनः आज्ञापयति यत् तदेवाग्रहारं तेभ्य एव ब्राह्मणेभ्यः निःशुल्कं दीयते एवञ्च यावत् सूर्यचन्द्रमसौ स्यातां तावत् ते तस्याः भूमेरुपभोक्तारो भविष्यति अन्यच्चोल्लिखितं यद् अस्यां भूमौ भूमिच्छिद्रं नैव सम्भविष्यति। कौटिल्यस्यार्थशास्त्रे भूमिच्छिद्रस्य प्रथममुल्लेखः उपलभ्यते । तदनुसारं राजा गोचरण-पशुपालन-कृषिकर्मभ्यो भूमिदानमददात् । ब्राह्मणेभ्यः सोम-धान्य-वन्यसामग्रीणामुत्पादनाय भूमिर्दीयते ।[2] गौडलेखमालायामस्योल्लेखः समुपलभ्यते । वैद्यदेवस्य कमऊलीशासने—"भूछिद्रञ्च अकिञ्चित्करग्राह्यम्" । यादवप्रकाशस्य 'वैजयन्त्यभिधानग्रन्थे' उल्लिखितम्—

'भूमिच्छिद्रं कृषियोग्यः ।'[3]

अतोऽस्य भूमिच्छिद्रस्य कृषियोग्यभूमिरिति पारिभाषिकोऽर्थः स्पष्टं प्रतिभाति। वैद्यदेवस्य कमऊलीशासनानुसारमकिञ्चत् करदराज्यसत्त्वात् भूमिच्छिद्रस्य तात्पर्यमिदमेव स्यात्, यथा अपकृष्टभूमेर्नासीत् किमपि शुल्कं तथैव शासने

---

१. कामरूपशासनावल्याम्, पृ० १६-१७.

२. अर्थशास्त्र, खण्ड २, ११.५२-५३.

३. वैजयन्तीग्रन्थे, भूमिकाण्डे, वैश्याध्याये श्लोक १८.

प्रदत्तायाः भूमेर्नासीत् किञ्चिदपि करम्। डॉ० किशोरीमोहनगुप्त 'इण्डियन एण्टीक्वेरी', वाल्यूम् ५१, पृ० ७३-७९ ग्रन्थे "Land System in accordance with Epigraphic evidences". स्वनिबन्धे भूमिच्छिद्रस्यालोचनामकरोत्। तस्यानुसारमभिलेखानां भूमिच्छिद्रस्यार्थोऽत्रासभूमिं त्यक्त्वा अन्यप्रकारा सम्पूर्णा भूमिरस्ति। भूमिच्छिद्रस्य न्यायिकोऽर्थः भूमिदानविषयकसीमानिर्देशविधिविधानैर्वर्तते। डॉ० जे० एफ्० फ्लीट महोदयः 'कार्पस् इन्स्क्रिप्शनम् इण्डिकारम्', वाल्यूम ३, पृ० १३८, भूमिच्छिद्रस्य अन्यर्थवार्थमकरोत्।[1] डॉ० उपेन्द्रनाथघोषालमहोदयस्यास्ति वक्तव्यं यन्नियमोऽयं तस्याः भूमेः कृते एव आसीत् या पूर्वं वन्ध्याथवा कृषिकर्मायोग्यासीत् तथाचान्तरं बहुश्रमेण कृषिकार्ययोग्याभूत्।[2]

प्राचीनकामरूपताम्रशासनाध्ययनजाततिपत्त्यानिम्नाङ्कितांशान्नुधरिष्यामहे। भास्करवर्मणः निधनपुरशासने—

मयूरशाल्मलाग्रहारक्षेत्रं राज्ञा श्रीभूतिवर्म्मणा कृतं यत् तत्ताम्रपट्टाभावात् करदमिति महाराजेन ज्येष्ठभद्रान् विज्ञाप्त पुनरस्याभिनवपट्टकरणाय शासनं दत्वा चन्द्रार्कक्षितिसमकालमकिञ्चित्प्रगृह्यतया[3]।

वैद्यदेवस्य कमऊली-शासने—

भूच्छिद्रञ्च अकिञ्चितकरग्राह्यं।[4]

वनमालतेजपुरशासने—

प्रालेयाचलश्रृङ्गतुङ्गमतुलग्रामेभवेश्याजनै-
र्युक्तं हाटक शूलिनः क्षितिभुजा भक्त्या नवं चक्रुषा।[5]

कस्य विज्ञसमालोचकस्य वक्तव्यमिदं यत् भास्करवर्मणो निधनपुरलेखे २०६ ब्राह्मणेभ्यः यद् भूमिदानमभवत् तत्र प्रत्येकस्य नामोल्लेखस्य कारणमिदं यत् तेषां ब्राह्मणानां देहावसानानन्तरं तेषां पुत्राणां तस्मिन् भूभागे कस्यापि अधिकारो न भविष्यति। किन्तु वयं भास्करवर्मणः पुनः मयूरशाल्मलाग्रहार-

---

१. कामरूपशासनावल्याम्, पृ० ३३, टिप्पणी १.
२. हिन्दू रेवेन्यू सिस्टम, पृ० १८५.
३. कामरूपशासनावल्याम्, पृ० १६-१७.
४. पंक्ति ५१.
५. कामरूपशासनावल्याम्, पृ० ६२.

दानप्रदानस्य समये स्पष्टमेतद् विचारमकुर्वाम यद् यावत् सूर्यचन्द्रमसौ पृथ्वी च इत्येतेषां स्थितिः तावत् तत्तत्भूभागेषु तेषामधिकारो भविष्यति। एकस्य ब्राह्मणस्य जीवने इदं निश्चप्रचं पृथिव्याश्च नैवान्तो भविता। अतः सूर्यचन्द्रमसोः वसुधायाश्चोक्त्या स्पष्टं यत् तेषां ब्राह्मणानां वंशावल्याः बह्व्यस्तनपुरुषाः संकोच विहाय निःशुल्कं भोक्तारो भवितारः। एतदेव तस्य स्पष्टमुचितञ्च तत्वमिति। उपरोक्तप्रसिद्धसमालोचकः एम० बी० वर्नेटमहोदयस्य मतेन वयं न सहमताः।

अस्मिन् प्रसंगे बंगदेशात् प्राप्तः दामोदरपुरताम्रलेखः उल्लेखनीयः, अस्मिन् सर्वर्थवैकस्य नूतनस्य करविधानस्योल्लेखो विद्यते, यन्नीवीधर्मो अथवापरार्कधर्मः प्रत्यपाद्यत[1]। एष एको विशिष्टविधिः, यत्र राज्ञा ब्राह्मणेभ्यः यद्भूमिदानं दीयते, तां भूमिं ते तेषां पुत्राः पौत्राश्चोपभोक्तारो भविष्यन्ति। परन्तु ते स्वेच्छया तां दातुम्, विक्रयितुं बन्धककरणञ्च कर्त्तुं नैव प्रभविष्यन्ति। अस्यार्थोऽयमेव यद् राजानः ब्राह्मणेभ्यः यद्भूमिदानमकुर्वन्, तत्र प्रतिबन्धोऽवश्यमेवाभवत्। किन्तु कामरूपे प्राप्ते अभिलेखेरेवं कस्यापि भूभागस्योल्लेखो नोपलभ्यते। तस्याभिलेखस्य प्रदत्ते भूभागे एकमन्यं पार्थक्यं दरीदृश्यते, तद् ब्रह्मदाय इति नाम्नाभ्यधीयता ब्राह्मणेभ्य कस्यचिद् ग्रामस्यार्थं सम्पूर्णं वा भूभागः तस्मिन्नदीयत, एतस्योरदेशो यमासीद् यत् सः ग्रामस्योपभोगं करिष्यत्येवं सर्वेभ्यो विप्रेभ्यो वेदशास्त्रपुराणादीनां शिक्षाञ्च दास्यति।

अभिलेखेषु भूमेः अन्यप्रकारस्यापि दानस्य विधिरुपलभ्यते। राजा, राजमहिषी, राजकर्मचारिणश्चापि विशेषधार्मिकोद्द्शेन यथा देवालयादीनां निर्माणार्थं भूमिदानमकुर्वन्, दानमिदं सामूहिकम् मन्यत, अस्य व्यक्तिविशेषः स्वामी न भूत्वा समूहोऽस्य स्वामी चाभवत्। अस्य भूदानस्य आयद्वारा मन्दिराणां निर्माणम्, देवप्रतिमानां नित्यावश्यकव्ययश्चाभवत्। वनमालस्य तेजपुरशासनस्यानुसारं राजा हाटकेश्वरशिवमन्दिरस्य जीर्णोद्धारमकरोत् मन्दिरस्य बन्धिव्ययार्थञ्चानेकान् ग्रामानयच्छत दाने[2]। कीर्तिपुरस्य पूर्वदिग्भागे स्थिते हप्पैव मण्डलेऽधिष्ठितमहादेवस्य निकटे भक्तशालायाः निर्माणार्थं राज्ञा भूमिरदीयत। अस्योल्लेखो वल्लभदेवस्याभिलेखे प्राप्नोति।

---

१. इपि० इण्डि०, वाल्यूम १५, पृ० १३०.

२. प्रालेयाचलशृङ्गतुङ्गमतुलग्रामेभवैश्याजनैर्युक्तं हाटकशूलिनः क्षितिभुजा भक्त्या नवं चक्रुषा।—कामरूपशासनवल्याम्, पृ० ६२.

११८५ ईसवीये वर्षे बल्लभदेवः तस्या एव भक्तशालायाः जीर्णोद्धारार्थं निम्नोक्तसप्तग्रामाणां सभामपि भूमिं दानेऽयच्छत्। चाण्डी-देवनीकुञ्जी-सज्जाप्रगा-बन्गक-साश्रुहि-कुञ्चयिका-दोषनीपाटकसप्तग्रामा।

परवर्तिकाले आसामप्रदेशराजा यस्याः भूमेः दानमकुर्वन् तस्याः विभागत्रयं कर्त्तुं शक्यते (१) ब्राह्मणोत्तरभूमिः ब्राह्मणानां पुष्ट्यर्थं एवञ्च धर्मप्रचारार्थं प्रदत्तभूमिः। (२) धर्मोत्तरभूमिः—धार्मिकसंस्थायाः पुष्ट्यर्थमेवञ्च देवानां पूजनार्थञ्च प्रदत्तभूमिः। (३) देवोत्तरभूमिः—अस्याः अपि प्रकारद्वयं भवितुमर्हतः—(१) भोगदानी, (२) पैकानभूमिः। भोगदानी—भूमौ देवानां पूजनार्थं किञ्चिद् भूमिखण्डं प्रतिदिनमदीयत। पैकानभूमौ नासीदेवंविधः कोऽपि नियमः।

वैद्यदेवस्य कमऊलीलेखे अन्यैरन्यैर्वस्तुभिः सह शान्तिपाटक-मन्दर-नामकौ द्वौ ग्रामौ कस्मै विशिष्टाय ब्राह्मणाय दाने दीयेताम्। तत्रायमप्यस्त्युल्लेखः यद् भूमिच्छिद्रन्यायानुसारमेतयोर्ग्रामयोः प्रबन्धौ भविष्यति। अतः पूर्वं भूमिच्छिद्रस्यार्थं प्रतिपादितः अत्रैव लेखेऽन्यदपि अस्ति वक्तव्यं यद् दाने ययोः ग्रामयोः सर्वविधिमुपभोक्ता भविता[1]। अनेन ज्ञायते यत् बहुविधभूमिदान-प्रकाराः आसन् तथा च बहुविधकरप्रणाल्यपि प्रचलितासीत्। तथ्यतस्तेषां समेषां कराणां स्वरूपम्, भेदो वैशिष्ट्यञ्च किमासीत्, एतेषां प्रमाणाभावाद् वयं मौनिः स्याम। तत्रापि करशब्दस्य समानार्थबोधकानामथवा किञ्चिद् भिन्नार्थबोधकानां शब्दानाम् उपरिकर-उत्खेटन आदि शब्दानां दर्शनाद् ज्ञायते यत् तदा विभिन्नप्रकारकाणां कराणां प्रचलनमासीत्।

अतः पूर्वं भास्करवर्मणः निधनपुरलेखस्य कञ्चिदंशः उदाहरणरूपेण प्रदत्तः। भास्करवर्मणः पूर्वपुरुषः मयूरशालमलाग्रहारदानपत्रमक्रियत ब्राह्मणेभ्यः, तस्य दानपत्रस्य विलोपे, भास्करवर्मा तद्दानं न्यायिकं कर्त्तुं पुनः दानपत्रमकरोत्। अनेन ज्ञायते यत् तस्मिन् काले कापि करव्यवस्थावश्यमेव प्रचलितासीत्।[2] धर्मशास्त्रनिबन्धग्रन्थेषु भागकरस्य प्रायः यः उल्लेखः प्राप्नोति, तद्भागकरं कामरूपशासनेषूल्लिखितभूमिकराणामिवैवास्ति।[3] गुप्तकाले या

---

१. इपि० इण्डि०, वाल्यूम ११, पृ० १५३.

२. कामरूपशासनावल्याम्, पृ० १६-१७.

३. गौतमधर्मसंहिता १०.२४-२७। मनुसंहिता ८.१३०-२७६.

करव्यवस्था प्रचलितासीत् अर्थात् प्रजानां सम्पत्सु राजा षष्ठांशः आसीत्, तदेव भूमेः करमस्ति[1]। डी० फ्लीटमहोदयः स्वग्रन्थे उपरिकरस्य व्याख्या-प्रसङ्गे इदमेव प्रतिपादितं यद्—उपरिकरपदेन प्रतीयते यदिदमेकमेवं विधं करम्, यस्मिन् प्रजाः अर्थात् यो भूमिदानप्राप्तकर्त्ता, तस्य तस्यां भूमौ स्वामित्वं न स्वीक्रियते स्म।

प्राचीनतमिलग्रन्थेषु मेडवारन करस्य उल्लेखोपलब्धिर्भवति, यस्यार्थः प्रत्येकभूभागेः राज्ञः सम्पूर्णस्वामित्वमासीत्।[2] डा० उपेन्द्रनाथघोषालमहोदयः बार्नेटमहोदयस्य मतस्य प्रतिपादनमकरोत्। तस्य कथनमस्ति यद् उपरिकरेण राज्यलब्धकरमित्यर्थो न भवति, यतः तस्य कृते धर्मशास्त्र-प्राचीनमध्ययुगीन-लेखेषु भाग-भोग-हिरण्यशब्दानां प्रयोगो मिलति। अत्रेदं ध्यातव्यमस्ति यद् बलवर्मणो रत्नपालस्य लेखेषु उपरिकर-उत्खेटनकरयोः ग्रहणार्थं राज्ञा ये कर्मचारिणो नियुज्यन्ते स्म तान् उत्पीडकसंज्ञासीत्। परन्तु तस्यां भूमौ तान् प्रवेशाधिकारो नासीत्। अर्थादिमे द्वेऽपि करे स्वाभाविककररूपेण चिह्निते आस्ताम्। एतेषां कर्मचारिणामेवं विधः निषेधनियमः किमासीत्। मतमस्माकमेतद्विषये एते द्वे करे नियमिताऽनुचितकरेष्वास्ताम्। अतः फ्लीटमहोदयस्य व्याख्यानुमोदतीया, यतः उपरिकरः शब्दद्वयस्य संयोगेनास्योत्पत्तिरस्ति उपरि करः, अत्र उपरिशब्दः अव्ययम्, अस्यार्थ अधिकम्, अतः तद्भूभागे कृषि-कर्मकरकाणां प्रजानां स्वतन्त्ररूपेण स्वत्वं नासीत्। स भूभागः वंशपरम्परा-नुसारकृषितभूभागात् पृथगासीत्। अतः ते तदर्थं च उपरिकरमददत्। अयमेकः स्वतन्त्रकरः आसीदत्र न कोऽपि सन्देहः[3]। यतः उपरिकराणामोपरिकराणाञ्च द्विप्रकारकाणां राजकर्मचारिणां वर्णनमुपलभ्यते, ये विशिष्टप्रकारकान् करान् अगृह्णन्। बलवर्मरत्नपालयोः नवगांवबडागांवशासनयोः सूक्ष्मदृष्ट्याध्ययन-विश्लेषणकरणात् ज्ञायते यद् अन्यप्रकारककरस्वरूपवैशिष्ट्यञ्च किमासीत्। निम्नांकितो योजनेभ्य राजप्रदत्तभूभागे प्रवेशनिषेध आसीत्, यतः एते न्याया-चरणैः ग्रसीयातं अपीडयन्। अस्यान्तर्गतम् राजपत्नि-राजपुत्र-राजवल्लभ-राजान्तःपुरनियुक्तप्रौढस्त्री - हस्तिपक-नानाविक-अपहृतद्रव्योपरक-दण्डप्रदातृ-

---

१. जे० फ्लीट— कार्पस इन्स्क्रिप्शलम् इण्डिकारम् वाल्यूम ३, पृ० ९८.

२. जर्नल ऑफ दी रॉयल एशियाटिक सोसाइटी, १९३१, पृ० १६५-१६६.

३. बलवर्मनवंगावशासनम्।

पाशदण्डप्रयोगकारक-औपरिपरिक-औत्खेटिका आसन्।[1] आलोचनयैषा स्पष्टा प्रतीयते यत् तस्मिन् काले कामरूपे बहुविधाः कराः प्रचलिताः आसन्। एते करे नैव नियमतः कराः आसन् अपितु वास्तविकात्यधिकोपरिकरा अप्यासन्। यदा राजकुलात् कोऽपि विशिष्टकर्मचारिणस्तत्रागच्छन् तदा तेषां कृते भोजन-व्यवस्थार्थं पशुचरणार्थञ्च किञ्चिदतिरिक्तकरविधानमासीद्, इदमेवोल्लि-खितमस्ति।

भास्करवर्मणः निधनपुरलेखस्याध्ययनविश्लेषणकरणाच्च ज्ञायते यत् तत्काले भूमेः परिमापं शुद्धमभवत्। एतदपि ज्ञायते यत् राजकर्मचारिणां पुरः तद्विशिष्टभूमेः परिमापं समुपस्थाप्यते स्म। राष्ट्रियराजकोषकर्मचारिणः समुपस्थितिः, एकं भूखण्डं अन्यभूखण्डात् पृथक्करणम्, सम्यक् सीमानिर्धा-रणमुचित परिमापकरणञ्च एवमादिकार्याणि सम्यग् अभवन्। कामस्या-भिलेखज्ञानं ज्ञायते यद् एतानि कार्याणि राजपुरुषादेशं विना नैव समभाव्यन्त, अतः परमेव कस्या अपि भूमिखण्डस्य दानं दातुमशक्यत। तस्याः भूमेः चतुर्दिक्सीमास्पष्टनिर्धारणमपि अभिलेखेषु अलिख्यत। तस्यां भूमौ उत्पद्यमान-धान्यमात्रालेखनमस्तिस्पष्टमुदलिख्यत। अनेन ज्ञायते यत् तत्कालीनाः राज-कर्मचारिणः स्वकार्ये दक्षाः आसन्। तथा च पत्रावल्यां (Record) तत्तद् भूभागस्य पूर्णविवरणसीमारेखातच्चतुर्दिक् स्थितनदीपर्वतदेवालयप्रासादवना-दीनां वर्णनमेवं प्रत्येस्मिन् भूखण्डे समुत्पन्नं वार्षिकमर्धवार्षिकं धान्यम्, तस्य परिमाणमपि वर्णयतिस्म। अतः तस्याः भूमेः स्वत्वाधिकारं वा राजपुरुषेणैव स्वीक्रियते स्म। परवर्तिकाले चक्रध्वजसिंह-रुद्रसिंह-शिवसिंहसमये कामरूप-सम्पूर्णभूभागस्य परिमाप कार्यमभवत्। इदं सर्वं 'पैरावाटक' इत्यस्मिन्न-

---

१. राजपुत्रस्य प्रवेशः किमर्थं निषिद्धः आसीत्, इदमप्यद्भुतं प्रतिभाति। यतः राज एव राजा भविता, यस्मै भूमेः प्रत्यक्षज्ञानमावश्यकमेव। कौटिल्यार्थशास्त्रेषु एवं भूतायां स्थितौ निषेधः तथा च अत्याचारिभिः कर्मचारिभिस्तुलनाकरणमसम्भवमिवैवावबुध्यते। अस्माकं सम्मतिः यदत्र राजपुरुषस्यार्थो न राज्ञः पुत्रेण संभवतोऽनेन प्राकृतराउतशब्दस्या-वबोधो भवति यथाधुनिकनव्यार्यभाषायाः मराठीभाषायाः रउत बंगला-भाषायाः रायत गुजरातीभाषायाः रावत आदिरूपमुपलभ्यते। यस्यार्थः अश्वारोहिसैनिकः, अतः ज्ञायते यदश्वरोहिण्यं तत्र गमनं निषिद्ध-मासीत्।

लिखयत। तेनैव ज्ञायते तदा कामरूपे कति कृषियोग्यभूमिभागः एवं अन्य-प्रकारभूमिभागः, ब्रह्मोत्तरभूभागः देवोत्तरभूभागः धर्मोत्तरभूभागञ्चासन्। तदा कामरूपे यो भूभागः दाने अदीयत तस्य अष्टदिग्भागे स्पष्टं विशिष्टञ्च चिह्नमदर्शयतिस्म। भास्करवर्मणो निधनपुरलेखे मयूरशाल्मलाग्रहारक्षेत्रं दाने अदीयत, तस्मिन् अष्टानां सीमानां विवरणमस्ति। १. पूर्वदिक्, २. पूर्व-दक्षिणदिक्, ३. दक्षिणदिक्, ४. दक्षिणपश्चिमदिक्, ५. पश्चिमदिक्, ६. पश्चिमोत्तरदिक्, ७. उत्तरदिक्, ८. पूर्वोत्तरदिक्, अस्मिन् सम्बन्धे भास्करवर्मणः शासनस्य निम्नपङ्क्तयः उल्लेखनीया सन्ति।

सीमानो यत्र पूर्वेण शुष्ककौशिका। पूर्वदक्षिणेन सैव शुष्ककौशिका डुम्बरीच्छेदसंवेद्या। दक्षिणेनापि डुम्बरीच्छेदः। दक्षिणपश्चिमेन गङ्गिणिका डुम्बरीच्छेदसंवेद्या। पश्चिमेनाधुनासीमगङ्गिणिका। पश्चिमोत्तरेण कुम्भकार-गर्त्तस्सैव च गङ्गिणिका प्रागभूज्यमाना। उत्तरेण वृहज्जाटली। उत्तरपूर्वेण व्यवहारिखासोकपुष्करिणी सैव शुष्ककौशिका चेति।

एतेन ज्ञायते यत् तस्याः भूमेः पूर्वदिशि शुष्कौशिकानदी, पूर्वदक्षिण-दिग्भागे शुष्ककौशिकाडुम्वरीक्षेत्रयाः सङ्गमक्षेत्रम्, दक्षिणदिशि डुम्बरीक्षेत्रम्, दक्षिणपश्चिमदिशि गङ्गिणिकाडुम्बरीक्षेत्रमिलनस्थलम्, पश्चिमदिशि गङ्गि-णिका, पश्चिमोत्तरदिशि कुम्भकारगर्तं गङ्गिणिका तस्मिन् काले परिवर्तित-प्रवाहासीत्, उत्तरदिशिजाटिलवृक्षम्, उत्तरपूर्वदिशि पुष्करिणी शुष्ककौशिका-चादीनामुल्लेखोऽस्ति। अस्मिन् अभिलेखे प्रदत्तभूमिसीमायैः विशिष्टैः वस्तु-भिर्निर्मिता, तैः ज्ञायते यत् तदानीं निम्नांकितानामेव वस्तूनां सीमानिर्धारणे व्यवहारमभवत् — उन्नतस्तूप-पर्वत-विविधप्रकारवृक्ष- गर्त - परिखा-सरोवर-पुष्करिणी-नदी-तट-भित्ति-मन्दिरादीनामिति। मनु-विष्णु-अत्रि-हारीत-आदीनां धर्मशास्त्रग्रन्थेषु द्वयोः राज्ययोः सीमा एवमेव निर्धारिता यत्र एवं भूतानां वस्तूनां यथावत् सीमानिर्धारणं नाभवत् तत्र तदर्थं वृक्षारोपणम् मन्दिराणां भित्तीनाञ्च निर्माणमावश्यकमासीत् धर्मपालस्य शुभंकरपाटकशासने प्रदत्त-भूमेः सीमा निम्नप्रकारास्ति—

अस्याः सीमा पूर्वेण चतुर्विंशतितन्त्राणां भूसीम्नि............क वृक्षः कूर्म्मनाथसत्कशासनभूसीम्नि शाखोटवृक्षः। पूर्वदक्षिणेन वीटसत्कशासन-भूसीम्नि क्षेत्रालिः। दक्षिणेनाश्वत्थवृक्षः। दिज्जिन्ना नदी। पश्चिमदक्षिणेन सैव नदी। पश्चिमेन कूर्म्मनाथसत्कशासनभूसीम्नि अश्वत्थवृक्षः लोचनवृक्षः।

पश्चिमोत्तरेण रोपितशाल्मली वृक्षः क्षेत्रालि तद्भूसीम्नि ओड़िअम्भवृक्षः अस्ति। एवमपरखण्डओलिन्दासमेतकञ्जिया भिट्वभूमेः सीमापूर्वेण ओरङ्गितन्त्राणां भूसीम्निं लोचनवृक्षः। वक्रानुवक्रेण हिज्जलवृक्षः। पूर्व्वदक्षिणेन शाल्मलिवृक्षः। दक्षिणेन विजयश्रीनौभुक्तकभूसीम्नि कण्टावक्कडवृक्षवंशस्तूपः। लहुचवृक्षः। डुम्बरीमस्तकं। दक्षिणपश्चिमेन भल्लाभिठिभूसीम्नि घूमारदेवः। पश्चिमेन भरिपाकटी वृक्षः। अन्तरेण वंशवृक्तिः। पश्चिमोत्तरेण विजयश्रीनोक्तभूसीम्नि वंशस्तूपः। उत्तरेण क्षेत्रालि शाल्मलिवृक्षः। वक्रेण ओरचोषजोलं। वृहद्रावा भूसीम्नि काशिम्बलावृक्षः। वटवृक्षः। क्षेत्रालिः। उत्तरपूर्व्वेण ओरङ्गितन्त्राणां भूसीम्नि बहुआलवृक्षः वाल्मीकस्तूपश्चेति।

अत्र प्रदत्तभूमिपश्चिमोत्तरसीमाप्रदेशे शाल्मलिवृक्षः आसीत्, यः अन्यसीमानिर्धारिकवस्त्वभावात् आरोपित आसीत्। दक्षिणभूभागे तद्भावात् वंशस्तूपस्थापनमभवत्। एवमेव सर्वेषु ताम्रशासनेषु प्रदत्तभूमिसीमावर्णनमुपलभ्यते। बडागांव-गुआकुची-शुभङ्करपाटकताम्रशासनैः ज्ञायते यत् कस्यापि भूभागस्य किमपि विशिष्टनामासीत्। यथा भविषभूमि-कञ्जियाभूमि-पण्डरीभूमि-मिट्टभूमि-आदीनि नामानि।

भूमिपरिमाणमपि विविधमासीत्। कामरूपे मुख्यतः द्रोणपरिमाणस्य प्रसिद्धिरासीत् द्रोणवापपरिमाणभूमिः सा एवासीत् ३२ सेर परिमाणबीजानां वपनमभवत्। द्रोणात् लघुपरिमाणं नलमित्यासीत्। सामान्यतया एकद्रोणभूमावेकपाटकभूमावेकसहस्रमुद्राणां धान्यस्योत्पत्तिरभवत्।

दशशयोदतशासनञ्च[१]।

प्रायः ४० द्रोणानामथवा प्रणावापस्यैकपटकमभवत्। एतत्सर्वमभिलेखे प्रमाण्यते। मध्यकाले आसामप्रान्ते एकनलमिति १० हस्तभूमेरेकद्रोणमेकबीघाभूमेः संज्ञासीत्।

खाद्यान्नव्यवस्था

प्राचीनकामरूपे कृषिजातखाद्यान्नवस्तुनि शालिधान्यस्य प्राधान्यमासीत्। प्राचीनाभिलेखेषु ब्राह्मणेभ्यः यद् भूमिदानमदीयत तस्यां विशेषतः शालीनामेवोत्पादनमभवत्। तात्कालिकसाहित्येऽभिलेखेषु च ब्रीहीणामुत्पादनार्थं सर्वोपरि प्राधान्यमस्ति। तस्मिन् काले राजकोषबलिरपि शालिभिर्व्रीहि-

१. सिलीमशासने, श्लोक २२.

भिर्वादीयत । प्राचीनकामरूपे विविधानां शालिनामुत्पादनमभवत् योगिनीतन्त्रे[1] विंशतिप्रकारकशालिनामुल्लेखः अस्ति—

यष्टिधान्यं राजधान्यं वृहतधान्यं च वल्लभे ।
सोमधान्ययिकनधान्यं वगमंवोई रक्तशालिकम् ।।
केतकी फलवीकंन धान्यं नारायणं तथा ।
मानलञ्च प्रदीपञ्च विष्णु धान्यं च वल्लभ ।
भोग्यधान्यं अशोकञ्च नागाच्छम् पंचमम् तथा ।।[2]

योगिनीतन्त्रे धान्यारोपणधान्यछेदनविषयकविस्तृतालोचना विद्यते, यथा ज्ञायते तदा कामरूपे खाद्यपदार्थेषु धान्यानां प्राधान्यमासीत् । धान्यशस्यपरिपोषणार्थं सिंचनादीनां वर्णनमभिलेखेषु प्राप्नोति । वसन्ते ऋतौ उप्ताः शालियः निकृष्टाः निर्दिष्टाः, अत्र योगिनीतन्त्रे—

वसन्ते रोपितं धान्यं यत्नेन च विवर्जयेत् ।

रत्नपालबडागांवशासने या पाराशरगोत्रियकण्वशाखावाजसनेयिब्राह्मणेभ्यो भूमिरदीयत सा धान्यद्विसहस्रोत्पत्तिकासीत् । तस्यामेव भूमौ शालिनां छेदनानन्तरं कूष्माण्डादीनां फलानां कृषिरभूत् । तस्मिन् अनुशासने तस्य भूमिखण्डस्य संज्ञा लावकुटिक वर्तते । महामहोपाध्यायपद्मनाथभट्टाचार्यः लावकुटिक शब्दं संज्ञा-विशेषमेव स्वीकरोति । किन्तु डा० आर्ले महोदयः तदनुवादे अकथयत् । लावकुटिकक्षेत्रस्य विशिष्टा संज्ञा किमर्थमस्ति, अत्र विचारणायां स्पष्टंभवति यत् हार्ले मतं समुचितमिति । यतः तदानीं कामरूपे कुष्माण्डादीनां फलानामुत्पादनमधिकतामभूत् । बाणभट्टहर्षचरितानुसारं तानि फलानि अधिकतमानि उत्पद्यन्त येषु विविधानि चित्राणि अंकितान्यासन् । अतः लावकुटिक क्षेत्रस्य विशिष्टार्थोऽस्ति नात्र कोऽपि सन्देहः ।

कामरूपाभिलेखे तदतिरिक्तबहुविधफलविविधवृक्षनामोल्लेखो वर्तते । फलानि द्विप्रकारकाणि अभूवन् । (१) मधुराणि स्वाभाविकभक्षणीयानि आम्रनारङ्गदाडिमकदलीत्यादीनि (२) यानि च अन्यपदार्थसाहाय्येन भक्षणीयानि

---

१. योगिनीतन्त्रे—२.५.२८९-२९१.

२. कामरूपशासनवल्याम्, पृ० ९९.

आसन्। वृक्षा अपि द्विप्रकारकाः आसन्—१. येषां फलानि भक्षणीयानि २. येषां फलानि अभक्षणीयानि अन्यकार्योपयोगिनी चासन्। एतेषां वृक्षाणां फलानां च नाम्नामुदाहरणपूर्वं लेखेभ्यः ऋते साहित्यिकप्रमाणान्यप्यावश्यकान्येव। ह्वेन्त्साङ्गभारतभ्रमणवृत्तान्तेऽस्ति यत् कामरूपे पनसनारिकेलादीनां कृषिर्विशेषरूपेणाभवत्। भास्करवर्मणा हर्षवर्धनाय अनेकानि उपहाराणि अदीयत, तेषु वंशखण्डेषु निवेशिताम्ररसस्य विशेषास्ति ख्यातिः[२]। अकबरकाले लिखित—'आइने-अकबरी' ग्रन्थेन ज्ञायते यत् तदा कामरूपे एकविचित्रप्रकारकः आम्रवृक्षः आसीत्, स लतेव कोमलः फलं मधुरञ्चासीत्।[३] पुनः अस्मिन्नेव ग्रन्थेऽस्ति लिखितं यत् तदानीं कामरूपे अनेकप्रकाराणि मधुराणि रुचिकराणि नारङ्गकफलानि उत्पद्यन्त एवञ्च एकेन पणकेन दशफलानि प्राप्नुवन्। हर्षचरितेऽपि उल्लिखितमस्ति, तदानीं हरितनारिकेलकदलीफलानां प्रचुरमुत्पादनमभवत्। कामरूपोपलब्धशासनानुसारं तदादीमुत्पद्यमानानां फलानां निम्नविवरणमस्ति। वलवर्मणो नवगांवशासने जम्बु[४]-श्रीफल[५]-आम्र[६]-पुंगीफलानाम्[७], रत्नपालवडागांवशासने कंटकिफल[८]-आम्रफलयोः[९], धर्मपालस्य शुभङ्करपाटकशासने आखोट[१०]-अवम[११]-कंटकिफल[१२]-लहुच या लहुच-दुम्वरीफलानाम्[१३], तस्यैव खोनमुखशासने कान्ताफलस्य[१४], वैद्यदेवस्य कमऊलीशासने

---

१. बुद्धिस्ट रेकर्डस इन दी वेस्टर्न वर्ल्ड, वाल्यूम् २, पृ० १९५.

२. ए डिस्क्रिप्शन ऑफ आसाम, पृ० ११७-११८।

३. आइने अकबरी, पृ० ११७-१८.

४. कामरूपशासनावल्याम्, पृ० ७९.

५. तत्रैव, पृ० ७९.

६. तत्रैव, पृ० ८०.

७. तत्रैव, पृ० ७३.

८. तत्रैव, पृ० १००.

९. तत्रैव, पृ० ११३.

१०. तत्रैव, पृ० १३८.

११. तत्रैव।

१२. तत्रैव, पृ० १५७.

१३. तत्रैव।

१४. तत्रैव, पृ० १५८.

श्रीफलादिफलानाम्[१], इति एवमासामप्रान्ते फलानामुत्पादनस्य विवरणं यच्चोपलभ्यते अभिलेखे[२]।

बहुप्राचीनकालात् वनं कस्यापि व्यक्तिविशेषस्य नासीत् सम्पत्तिः। राज्ये अनेकानि वनानि आसन् तेषाञ्च केवलं राज्यप्रजाः एव न अपितु अन्य-राज्यप्रजाः यात्रिणश्चापि उपभोगमकुर्वन्। राजकीयवनानि यानि न विशेष-रूपेण संरक्षितानि चासन्, तेषु प्रजानां पशवः उन्मुक्ततया व्यचरन्। मार्ग-निर्माणम्, मन्यानां दाहसंस्कारकरणम्, आदीनि कार्याणि अपि वने समपद्यन्त। यथा नदीनां जलानि सर्वेभ्यः उन्मुक्तानि भवन्ति, इत्येषां सामान्यपरम्परा तथैव प्राचीनभारतवर्षे विशेषतः कामरूपप्रदेशे वनानि अपि सर्वजनोपभोग्यानि आसन्। कालक्रमेण राष्ट्राणां सुसङ्गठनात् राष्ट्रियप्रशासकानां दृष्टिः राष्ट्रस्य अमूल्यनिधावपतत्, अतः वन्यसम्पत्तिसंरक्षणाय ते वनपालारण्यपालादिपदानि संसृज्य तत्रोपयुक्तराजकर्मचारीणां नियुक्तिमकुर्वन् तथा वनानि राष्ट्रिय-सम्पत्तिस्थानानि चाभूवन्। कामरूपस्य राजान्ते वनानि स्वसम्पत्तिस्थानानि निर्धार्य तेषां सम्यक् संरक्षणाय च कृतप्रयत्नाः बभूवुः। वनानामपि दानानि सम्यगुपयुक्तानि च इति निर्धार्य तैः ब्राह्मणेभ्यो दाने वनानि अप्यदीयन्त, यतः तदानीं यावदरण्यानां महत्त्वं तैरज्ञायत। कौटिल्येन अर्थशास्त्रेऽपि नृपैः ब्राह्मणेभ्यः देवेषु वस्तुषु वनदानस्योल्लेखः कृतः। कामरूपशासनावल्यामपि वनानां सत्ता तेषां विश्राणनस्य चोल्लेखो[३]। बलवर्मणो नवगांवशासने राज्य-सीमायां वृहद्वनस्योल्लेखोऽस्ति। वैद्यदेवस्य कमऊलीशासनेन ज्ञायते यत् तस्मिन् समये कामरूपेऽन्यवस्तुभिः सह वनदानकरणमतिपुण्यकार्यमासीद् ब्राह्मणेभ्यः।[४]

अरण्यानां समालोचनाय अनन्तरं वनेभ्योऽधिगम्यमानानां वस्तुजातानां विवरणमावश्यकमिव प्रतीयते, यतः बहुविधवृक्षाणामुपलब्धिस्तेभ्यो जायत, तेषाञ्च नानाविधकार्येषु नानाविधप्रयोगोऽपि अभवत्। एतेभ्यो वनेभ्यः उप-लभ्यमानानां फलानां विवरणं पूर्वमेव प्रदत्तमस्माभिः। अत्राभिलेखेभ्यः समु-

---

१. कामरूपशासनवल्याम्, पृ० १५८.

२. इपि० इण्डि०, वाल्यूम् ३०, पृ० २०८.

३. कामरूपशासनावल्याम्, पृ० ७४.

४. कमऊलीशासनम्।

पलभ्यमानानां फलानां विस्तृतं विवरणं प्रस्तूयते भास्करवर्मणो निघनपुरताम्रशासने वृहज्जाटली[1]-दुम्बरीच्छेदयोः,[2] बलवर्मणो नवगांव-शासने जम्बुवृक्ष[3]-श्रीफलवृक्ष[4]-सुवर्णदारुवृक्ष[5]-आम्रवृक्ष[6]-शालमलीवृक्ष[7]-वृहद्वट-वृक्ष[8]-जाटिवृक्ष[9] ताम्बूलवृक्षाणाम्[10], रत्नपालस्य वडगांवशासने शालमली-वृक्ष[11]-वदरीवृक्ष[12]-कासिम्बलवृक्ष[13]-अश्वत्थवृक्ष[14]-हिज्जलवृक्ष[15] - वेतसवृक्षा-णाम्[16], रत्नपालस्यश्यालकुचीताम्रशासने शरकरा[17]मूल-आम्रवृक्ष-[18] वेतसवृक्ष[19]-हिज्जल[20]वृक्षभद्राक्ष[21]वृक्ष-शालमली[22]वृक्ष-चोरक[23]वृक्ष-वरुणवृक्षा-

---

१. कामरूपशासनावल्याम्, पृ० २६.

२-३. तत्रैव ।

४. तत्रैव, पृ० ७९.

५-९. तत्रैव, पृ० ८०.

१०. तत्रैव, पृ० ७३.

११-१२. तत्रैव, पृ० १००.

१३. तत्रैव, पृ० १००—अस्य अन्यनाम काशालमलीवृक्षोऽथवा कूटशालमली-वृक्षः । ऋग्वेदे, ३.५३.२२. शिम्बलाशब्दः प्राप्नोति । सायणाचार्येणा-स्यार्थः शालमलीपुष्पमिति स्वीकृतमेतच्च समुचितमपि प्रतिभाति ।

१४-१५. तत्रैव, पृ० १००.

१६. तत्रैव—यद्यपि वेतसवृक्ष वल्लीजातिवृक्षोऽस्ति तथापि प्रान्तस्य सीमा-विभाजने नायमसमर्थ आसीत् । मनुसंहितायाम्, ८.२४६-४७ श्लोकेषु यत्र सीमावृक्षाणामुल्लेखोऽस्ति—

सीमावृक्षांश्च कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान् ।
शाल्मलीन्छालतालांश्च क्षीरिणश्चैव पादपान् ।।
गुल्मान् वेणुंश्च विविधान् शमीवल्लीस्थलानि च ।
शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति ।।

१७. कामरूपशासनावल्याम्, पृ० ११३.

१८-२२. तत्रैव।

२३. तत्रैव—आसामप्रदेशे एष बाउर वृक्षः अभिधीयते । अयं नारिकेलवृक्ष इव दीर्घः स्थूलश्च भवति, तस्यैवास्य वर्णानि भवन्ति । देवदासकृतटीका-यामासचोरकश्चोरपुष्पी एवं व्याख्या विद्यते, अतः अस्य नामान्तरं चोरपुष्पी प्रतीयते । बंगभाषायामयं 'चोरहुली' इत्यभिधीयते ।

णाम्[१], इन्द्रपालस्य गौहाटीताम्रशासने वंशवृक्ष[२]-शाखोटकवृक्षयोः,[३] इन्द्रपालस्य द्वितीये शासने कण्टाफल[४]-जिङ्गिनीवृक्ष[५]-शाखोटक[६]-आम्र[७]-कल्पद्रुम[८]वृक्षाणाम्, धर्मपालस्य शुभङ्करपाटकशासने शाखोटकवृक्ष[९]-आखोट-वृक्ष[१०]-अश्वत्थवृक्ष[११]-लोचन[१२]-वृक्ष-शाल्मली[१३]-अडिजम्मवृक्ष[१४]-कण्टावक्कड[१५] वृक्ष-वंशस्तूप[१६]-हिज्जलवृक्ष[१७]-लहुचवृक्ष[१८]-झरीपाटकीवृक्ष[१९]-कसिम्बलावृक्ष[२०]-वटवृक्ष[२१]-बहुआल[२२]वृक्ष-डुम्बरीवृक्षाणाम्,[२३] तस्यैव द्वितीये शासने सुवर्ण-दारुमुण्ड[२४]-मधुराश्वत्थमुण्डवृक्षयोः[२५], पुनः तृतीये खोनमुखशासने वटवृक्ष[२६]-चनावृक्ष[२७]-अश्वत्थवृक्ष[२८]-कान्ताफल[२९]- बतावृक्ष[३०]- शहदजोतका[३१] वृक्षाणाम् ।

उपरोक्तवृक्षेषु वंशवेतसवृक्षाणां स्थानं प्रधानं विद्यते । कामरूपारण्य-भूमावनेकविधवंशवेतस्वृक्षाः समुद्भवन् । कामरूपग्रामनिवासिनो गृहनिर्माण-पल्लीनिर्माण-मत्स्यग्रहण-आखेटादिषु वंशवृक्षाणामधिकमुपयोगमकुर्वन् । काम-रूपे अद्यापि वंशनिर्मितपात्रेषु जलमाधीयते । कामरूपे वस्तुनिवेशनार्थमद्यापि पात्राणि (टोकरी झउवा) वाद्यानि सुकोमलखण्डानां साकार्थं जनाः उपयोगं कुर्वन्ति । सुकोमलवंशखण्डानां अलुकः सह यः साको भवति आसामनिवासिनः

---

१. अस्य लैटिनभाषायां संज्ञास्ति, ···अस्य शाखानां परस्परं संघर्षणादग्नि-रुत्पद्यते ।
—कामरूपशासनावल्याम्, पृ० १३१

२. तत्रैव ।

३. तत्रैव, पृ० १२४.

४. तत्रैव ।

५-१०. तत्रैव, पृ० १३८.

११. तत्रैव, पृ० १५७.

१२. तत्रैव ।

१३. तत्रैव, पृ० १५७.

१४-१७. तत्रैव ।

१८-२५. तत्रैव, पृ० १५८ ।

२६. इपि० इण्डि०, वाल्यूम ३०, पृ० २०८.

२७-२८. तत्रैव ।

२९-३०. तत्रैव, पृ० २०९.

तं खरिचा अथवा गाजतेंगा कथयन्ति। एवं वंशस्याधिकमुपयोगः कामरूपेऽभूत्, अतः दिवसविशेषेषु अस्य छेदनस्य निषेधः आसीत्। आसामप्रदेशे प्रचलिते पंचांगे कस्मिन् दिवसे वंशच्छेदनं कर्तव्यमस्यास्ति परिगणना, एवं वंशातिरिक्तान्यशुभकल्याणकारिवृक्षाणां छेदनस्यापि निषेध आसीत्।

प्राचीनकालादेव कामरूपे सुगन्धितद्रव्याणि यथा—अगरुचन्दनादीनि, रत्नानि, स्वर्णादीनि पशुचर्माणि चोत्पद्यन्ते स्म। महाभारतस्य सभापर्वणि लिखितमस्ति यदा भीमसेन युधिष्ठिरस्य राजसूययज्ञे पूर्वाशा जेतुमगच्छत् तदा कामरूपदेशं विजित्य अगरुचन्दनादीनि सुगन्धितद्रव्याण्यप्यानयत्[1]। कामरूपे किराताबहुवस्तुजातैः सह युधिष्ठिराय मणिस्वर्णागरुचन्दनमुक्तादीः सामग्रीरूपहारे समर्पयन्[2]। भास्करवर्मा यानि वस्तुनि हर्षवर्धनायोपहारे प्राददात् तेषु वस्तुषु गोषीर्षचन्दनकाष्ठादीनि प्रसिद्धानि सन्ति। कौटिल्यस्यार्थशास्त्रे, कामरूपजातज्योङ्गकमेरुकाजापकतोरुपादीनि सुगन्धितद्रव्याणि विख्यातानि सन्ति[3]। कामरूपे सुगन्धितद्रव्येकं प्रसिद्धमासीत् यत् नागपर्वतात् प्राप्यते स्म[4]। रघुवंशे महाकविकालिदासेन विलिखितं यत् यस्मिन् काले राजा रघुः दिग्विजयाय प्राग्ज्योतिषपुरं प्राविशत् तस्मिन् समये सः कृष्णागरुवृक्षानपश्यत्। एषु वृक्षेषु हस्तिनो वध्यन्त।[5] हर्षचरिते लिखितम्स्ति यत् भास्करवर्मा हर्षाय कृष्णागरुस्तैलमुपहारे प्राददात्। प्राचीनकामरूपे समुत्पन्नेषु सुगन्धितद्रव्येषु पारसमुद्रकमप्युल्लेखनीयमस्ति। लेखनार्थम् अगरुवृक्षस्य वल्कले सांचीपटं निर्मीयतेस्म[6]। कौटिल्यार्थशास्त्रे दशवस्तूनि उल्लिखितानि सन्ति येषु बहुवस्तूनि प्राचीनकामरूपे समुपलभ्यन्ते, तेषु अशोकग्रामिकाभोग-

---

१. महाभारतसभापर्व, ३०.३९.

२. तत्रैव, ५२.१०.

३. अर्थशास्त्र, पृ० ८६-८७.

४. जर्नल ऑफ दी इण्डियन सोसाइटी ऑफ ओरियण्टल आर्ट, वाल्यूम ८, पृ० ८५.

५. रघुवंशे, ४.१.

६. कामरूप एण्ड कौटिल्य, जर्नल ऑफ आसाम रिसर्च सोसाइटी, वाल्यूम ७. एच० वी० त्रिवेदी, ज्योग्रेफी ऑफ कौटिल्य, इण्डियन कल्चरल, वाल्यूम १.

कार्यामेकुकासुवर्णकुट्कमातुतुङ्गपूर्णदीपकभद्रश्रीः परलौहित्यकान्तरवत्यकालेय-कौत्तरपर्वतकानि वस्तुनि प्रसिद्धानि सन्ति ।[1]

यद्यपि तेजपत्रस्य जन्मोत्तरपश्चिमप्रान्ते दुर्लभमेव, तथापि प्राचीन-कामरूपेऽस्योत्पत्तिरधिकाऽसीत्[1] । टालेमीमहोदयस्य विवरणेन प्रतीयते यत् तेजपत्रस्य व्यापारो भारतवर्षे मूलतः कामरूपादेव प्राचलत् । पैरीप्लास-महोदयः स्वभ्रमणकथायां सेसाटीजजनानामुल्लेखं कृतवान् । ते च काम-रूपाद् बहिर्देशः सार्धं वाणिज्यमकुर्वन् । एते सेसाटीजजनाः मुख्यतया कामरूपवास्तव्या एवासन् । यतो हि सः तेषामुत्सवानामाचारव्यवहारञ्च यादृग्वर्णनं कृतवान्, तेन वर्णनेन तात्कालिककामरूपनिवासिनामाचारव्यवहा-राणामैक्यमस्ति अतः स्पष्टं भवति यत् तेजपत्रस्य व्यापारः प्रायः कामरूपा-देवाभवत् ।

प्राचीनकालादेव कामरूपे विभिन्नप्रकाराणि वन्यानि वस्तूनि समु-पलभ्यन्ते तेषु वस्तुषु लाक्षामरिचयो द्वयोर्वस्तुनोर्नाम प्राचीनकामरूपसाहित्ये, केषुचित् ताम्रपट्टेषु च मिलति । परवर्तियुगे लाक्षाव्यापाराय एशियामहाद्वीपे कामरूपं प्रसिद्धं आसीत् । मुख्यतया तस्य चीनजापानदेशाभ्यां लाक्षाव्यापारोऽ-भवत् । लाक्षाव्यापारेण कामरूपदेशो बहुधनमर्जयत् । प्रतिवर्षं षोडशसहस्र-मणलाक्षाव्यापारोऽभवच्च । तत्रेयं गारोरवासीजयन्तियापर्वतेषु प्राप्यतेस्म । लाक्षानिर्माणस्य प्रक्रिया कामरूपे बहुप्रकाराऽऽसीत् । कौटिल्यार्थशास्त्रे वन्य-सामग्रीणां यत् विवरणं विद्यते तस्मिन् वन्यजन्तुचर्मणां, अस्थिनां, दन्तपुच्छ-जीवितवन्यजन्तुनां पक्षिणाञ्चापि गणना वर्तते । बाणभट्टः हर्षचरिते लिखितं, इमानि सर्वाणि वस्तूनि तत्र प्राप्यन्ते स्म । अस्यैव कथानुसारेण च धवलाः कृष्णाश्च कर्पदिका किम्पुरुषयुगलानि जीवकपक्षिणः, स्वर्णार्गलायुक्तखगान्, कस्तूरीमृगान्, चामरमृगशुकशारिकादिपक्षिणो भास्करवर्मा स्वराज्यात् हर्ष-वर्द्धनायोपहारे प्रददात् । कालिदासस्य रघुवंशवर्णनानुसारेणासामप्रान्तस्य वनेषु बहुहस्तिनो न्यवसन्[2] ।

बहुप्राचीनकालादेव कामरूपे प्रसिद्धबहुबाहुपर्वणानुसारं गण्डकव्याघ्र-

---

१. कार्मसियल प्रोडक्टस् ऑफ इण्डिया, पृ० ३१०.

२. रघुवंशे, पृ० ४.८३.

महिषीसुकराः भयङ्करः वन्यजीवाः न्यवसन्[1]। योगिनीतन्त्रे विविधपक्षिणां वर्णनं मिलति, अस्य समर्थनञ्चाभिताम्रलेखैर्जायते[2]। अन्यस्थानस्य पक्षिणामिव कामरूपस्थितपक्षिणामपि द्वौ विभागौ वर्तेते, जलचरः स्थलचरञ्च, तत्र मयूराणां[3] राजहंसानाञ्चोल्लेखो बहुधाभिलेखेषु मिलति। भास्करवर्मणो निधनपुरलेखे मयूराणां[4] तथा रत्नपालस्य बडागांवशासने च हंसानामुल्लेखोऽस्ति। एतदतिरिक्तं कौकिलानां केतकीत्यादिपक्षिणाञ्चाप्युल्लेखोऽनुशासनेषु प्राप्यते। चन्द्रप्रकाशपानकर्तृपक्षिणाञ्चकोरस्यैवं पारावतकपोतशुकखञ्जनधनेशादीनां विभिन्नपक्षिणां नामानि प्राचीनकामरूपस्य साहित्ये लिखितानि सन्ति। यथा बबुवाहोः पञ्चमाध्याये त्रिंशत्श्लोकात् द्वात्रिंशत् श्लोकं यावत् अतिविचित्रपक्षिणां नामानि सन्ति। सर्वे इमे प्राचीने मध्ययुगे च कामरूपे प्रसिद्धाः आसन् किन्तु कामरूपसमुपलब्धाभिलेखे न समर्थ्यते।

औद्योगिकस्थितिः

प्राचीनकामरूपस्य हस्तशिल्पे सर्वोत्कृष्टं स्थानमासीत्। प्राचीनकाले तत्र कुण्डलानि, वस्त्राणि, स्वर्णरजतनिर्मितपात्राणि हस्तिदन्तैर्निर्मितविविधालङ्काराणि कीचककाष्ठचर्मभिश्च रचितानि शिल्पवस्तूनि प्रसिद्धानि आसन्। तेषु कौशेयवस्त्राणां सर्वाधिकं महत्त्वपूर्णं स्थानमासीत्। इत्थञ्च प्रतीयते यत् भारतवर्षे प्राचीनकाले सुन्दरकौशेयवस्त्राणि भारतस्य पूर्वोत्तरचीनदेशात् मङ्गोलियादेशात् वा यान्ति स्म। कालिदासः शाकुन्तलनाटके चीनदेशागतानां कौशेयवस्त्राणामुल्लेखं कृतवान्[6]। कौशेयवस्त्रं भारते बहुकालादेव प्रसिद्धमस्ति। महाभारते पुराणेषु चास्योल्लेखोऽस्ति प्राचीननाटचकारभासेन नाटके कथितं यत्—शितदुकूलः धृतोत्तरीयः[7]।

---

१. रघुवंशे, ४.४३.

२. बबुबाहुपर्व, ५.२८.

३. योगिनीतन्त्रे, २.९.२५८-६०.

४. कामरूपशासनावल्याम्, पृ० १२.

५. तत्रैव, पृ० ९७.

६. अभिज्ञानशाकुन्तले, प्रथमेऽङ्के, अन्तिमश्लोकः।

७. माषदूतवाक्यम्।

कौटिल्यार्थशास्त्रे भारतस्य येषु येषु भागेषु कौशेयवस्त्राणि न्यर्मीयन्त तेषु स्थानेषु सुवर्णकुडपस्य अर्थात् कामरूपस्य नाम सर्वप्रथममस्ति। कौटिल्यानुसारेण कामरूपस्य कौशेयवस्त्राणि बालसूर्यरक्तानि अभवन् तथा च शिल्पकलाभवत्। बहुमूल्यमणय इव सुप्रसिद्धानि आसन् तेषु सूचिकर्मणा वर्गाकारं मिश्रितञ्च स्यूत। दुकूलवस्त्रमध्ये वस्त्रैकं भवतिस्म यत् कौटिल्येन पत्रोर्णा चाकथयत्। अर्थशास्त्रानुसारेण भारते यत्र यत्र पत्रोर्णा निर्मीतिस्म तेषु कामरूपस्य पत्रोर्णावश्यं श्रेष्ठतममासीत्[1]। बाणभट्टस्य हर्षचरितानुसारेण भास्करवर्मा स्वदूतहंसवेगेन यानि-यानि वस्तूनि उपहारे प्रेषयत्, तेषु चन्द्रकिरणानामिव शुक्लानि, वृक्षाणां कोपलानीव सुकोमलानि पुष्टिपरिमितानि भवन्ति स्म[2]। कामरूपस्य कौशेयवस्त्रोत्पादनस्य साक्ष्यं महर्षिवाल्मीकिरपि ददाति, सः किष्किन्धाकाण्डेऽकथयत् यत् यदा मनुष्याः पूर्वीय भ्रमतः प्राग्ज्योतिषपुरमगच्छन् प्रायशोऽयं द्वीपो दुकूलवस्त्रस्योत्पत्तिस्थलमस्ति।[3] प्राचीनेतिहासकारटॊनादिमतानुसारेण प्राचीनकाले ब्रह्मपुत्रधौतप्रदेशादर्थात् कामरूपात् कौशेयवस्त्राणां व्यापारो विदेशेष्वभवत्[4]। मध्ययुगेऽपि तत्र कौशेयवस्त्राणां वार्ता आसामसाहित्ये प्राप्नोति। अधिकांशेतिहासकारा इत्थमपि कथयति यत् कामरूपे जातकौशेयस्य सुन्दराणि वस्त्राणि भवन्तिस्म। परवर्त्तियुगे कामरूपशासनं यदा अहोमराजाः अग्रह्णन्। तदा तैः अतिसूक्ष्मकौशेयवस्त्रनिर्माणाय तन्तुवायेभ्यः स्वराज्ये स्थानमदीयत, प्रशासने एकं विभागं चास्थाप्यत, येन कौशेयशिल्पस्योन्नतिर्भवेत्। फलतः कामरूपे वर्तमानत्रिप्रकाराणां कौशेयवस्त्राणां पाठ एण्डी मुङ्गा इत्यादीनां प्रचलनमस्ति, तानि सर्वाणि प्राचीनकालादेव प्रचलितानि सन्ति। एषु त्रिषु नामसु द्वयोर्नाम्नोरुत्पत्ति संस्कृतभाषात एव जाता। यथा—पाठशब्दः संस्कृतपट्टजाशब्दस्य रूपान्तरमस्ति। एषु केवलं तृतीयशब्दो मुङ्गा (विद्रुम) एव आसामप्रान्तीयं देशजमस्ति यतो

१. आसामपत्रोर्णानाम सौवर्णकुड्टिका श्रेष्ठा।

२. कौटिल्यार्थशास्त्रे, पृ० १६५.

३. रामायण, किष्किधाकाण्डम्।

४. पेरिप्लास ऑफ दी इयोथ्रीम, पृ० २६४.

५. हेल्फर, आन दी इण्डिजिनियस सिल्क वर्म्स ऑफ इण्डिया—जर्नल ऑफ एशियाटिक सोसाइटी ऑफ बंगाल, वाल्यूम ६, पृ० ४३.

हि, अस्य (मुङ्गा) स्वरूपं संस्कृते नहि ज्ञातमस्ति ।[1]

प्राचीनकामरूपनरपतीनां प्राप्तैः ताम्रशासनैः ज्ञायते यत् कामरूपराज्ये प्राचीनकालादेव सुवर्णसम्बन्धिकार्यजातमभवत्, एतञ्चापि परिज्ञायते यत् तत्र पुराकालत स्वर्णसम्बन्ध्युद्योगस्य प्रचलनमासीत्। तत्र सुवर्णभूमिः प्रवहमानाः नद्यः एवासन्[2] तत्रस्थाः तत्कार्यकारणे संलग्ना जनाः नदीभ्यः सुवर्णकणिकामिश्रितबालुकां संगृह्य बालुकातश्च क्षालनादिकर्मणा सुवर्णकणिकाः प्रथगक्रियन्त। पेरिप्लासमहोदयः लिखति यत् गङ्गायाः तटीयमागतसुवर्णं हाटेषु आनीयत ।[3] अस्य वक्तव्यस्य ताम्रशासनैरपि पुष्टिर्भवति। वनमालस्य तेजपुरशासनतोऽवगम्यते यत् लौहित्य नाम्नी नदी पवित्रकैलासपर्वतशिखरात् सुवर्णं प्रवाहयत्—

श्रीमत्कैलासभूभृत-पृथुकनकशिलासञ्चयास्फालनोत्थै-
रासारैर्हैमपङ्काविलतुहिनकरैः सिक्तवेमानि सार्थः ।
अम्भः क्रीडत् सुमूखप्रवरसुरवधूकेशहस्तच्युतैर्यो
नाकेशपुप्रसूनैररूणितसलिलो व्यात् स लोहित्यसिन्धः ।[4]

सिलीमपुरशासने राज्ञा जयपालेन विदुषे ब्राह्मणाय स्वतुलादानमक्रियत। यस्मिन् दाने नवशतानि (९००) स्वर्णमुद्राः आसन्—

यः कामरूपनृपतेर्जयपालदेवनाम्नः तुलापुरूषदातुरचिन्त्यधाम्नः ।
हेम्नाभ शतानि नवनिर्भरमध्यमानो नैवाददे दशशतोदय शासनञ्च ।।[5]

'तबक्वा-ह-नासिरी' नामके ग्रन्थे लिखितमिदमस्ति यत् तदानीम् कामरूपे सुवर्णस्य रजतस्य वा प्रतिमानां निर्माणमभवत्। तत्र एतदपि प्रतिपादितं यत् कामरूपस्य एकस्मिन् देवालये प्रायसो द्वित्रिसहस्रमणप्रमाणपरिमितसुवर्णनिर्मितामूर्त्येका संस्थापिता आसीत् ।[6] 'फातिया-इ-ब्रियाह' ग्रन्थस्य

---

१. राय, टेक्सटाइल इण्डस्ट्री इन इन्शण्ट इण्डिया, जर्नल ऑफ बिहार एण्ड उड़िसा रिसर्च सोसाइटी, वाल्यूम ३, पार्ट २, पृ० १८०-२४५.
२. जर्नल ऑफ दी एशियाटिक सोसाइटी ऑफ बंगाल, पृ० ६१२-२५.
३. तत्रैव, पृ० २५८-५९.
४. तेजपुरशासनम्, श्लोक १.
५. इपि० इण्डि०, वाल्यूम १३ पृ० २९२.
६. रावर्टी—पृ०५६९.

लेखकस्य मतेन कामरूपे स्वर्णक्षालनकर्मणि प्रायः दससहस्रमनुष्याः संलग्नाः आसन्[1]। वाणभट्टेन हर्षचरितेऽपि कामरूपे प्रचुरसुवर्णस्योल्लेखकृत एव यतः भास्करवर्मणा हर्षवर्धनाय उपहार वस्तुषु अनेकानि सुवर्णनिर्मितवस्तूनि यथा अभोगवारूणछत्रं प्रभृतीनि प्रेष्यत। कालिदासेनापि रघुवंशे ग्रन्थे प्राग्ज्योतिष-राज्ये सुवर्णवाहुल्यस्य वर्णनमक्रियत[2]। रत्नपालस्य बडागांवताम्रशासनेन अवबुद्धयते यत् कामरूपे ताम्रखनयोऽपि आसन्। कामरूपे सैन्यशस्त्रास्त्राणां, कृषिकर्मशस्त्राणाम् च उल्लेख दरीदृश्यते, अनेन प्रतीयते यत्र तत्र लौह-खनयः अपि आसन् अथवा तत्रात्यः राजानः साधारण-जनाश्च वहिर्देशादा-यातमकुर्वन्।

ताम्रशासनैः इदमपि ज्ञायते यत् काष्ठसम्बन्धिवृहदुद्योग नौका-निर्माणादि कार्यमभवत् तथा च काष्ठवस्तूनां क्रीडनकादीनाम् वंशपात्राणाम् औद्योगिककार्यं प्रचलदासीत्, एवं च रगेन रजनं चित्रीकरणं कर्मापि व्यापारदृष्ट्या प्राचलत्। तत्र वंशपात्रेषु स्वर्णरंगेन विविधानि मन्जूनि चित्राणि अचित्र्यन्त। वनमालस्य तेजपुरशासने राजकीयनौकायाः विविध-रंगैः चित्रीकरणस्य उल्लेख समुपलभ्यते[3]। साहित्यिकप्रमाणैः सूचित्रितानाम् शीतलपट्टिकानाम् निर्माणकार्यमभवदित्यपि प्रमाण्यते, यासां धनिनो जनाः समुपयोगमकुर्वन्। बडागांवश्यालकुचीपुष्पभद्राताम्रशासनैः अवगम्यते यत् तस्मिन् काले राजकीयरथेषु, ताम्रशासनेषु शिलालेखेषु शोभना चित्रकारी भवतिस्म, एवं च राजमार्गाणां निर्माणकार्यं मन्दिराणां निर्माणकार्यं स्थापत्यकला पूर्णमासीत्। हनीमहोदयः लिखति प्राचीनकामरूपे हिन्दुमन्दि-राणां आकारसंरचना अतीवसुन्दरासीत्।[4] आरामबुरून्जीग्रन्थेन ज्ञायते यत् अहोमराज्यकाले स्थापत्यकौशलं समाप्तं प्राय एवासीत्।

कमउलीनिधनपुरशासनयोः मृत्तिकापात्राणां निर्माणं अवगम्यते।

---

१. जर्नल ऑफ आसाम रिसर्च सोसाइटी ऑफ बंगाल, वाल्यूम ३०, पार्ट १, पृ० ४९.

२ रघुवंशे ४.८४.

३. कामरूपशासनावल्याम्, पृ० ६४.

४. जर्नल ऑफ दी एशियाटिक सोसाइटी ऑफ बंगाल, वाल्यूम २०, पृ० २६१-६४.

यतः तयोः कुम्भकारशब्दस्य कुम्भकारगर्तस्य उल्लेखः दृश्यते । आसाम-प्रदेशे निर्मितानि वस्तूनि सुन्दराणि आसन् अतः तेषां वस्तूनां अन्ये प्रान्तेषु विदेशेषु च निर्यातं अभवत् । एतद् विषये अस्मिन् अध्याये पूर्वभागे सविस्तरं कृतं अस्ति । बाणभट्टस्य हर्षचरिते प्राग्ज्योतिषि राज्ये चर्मणां मदिरायाश्च उद्योगस्यास्ति वर्णनम् ।

निष्कर्षतः ताम्रशासने यत् प्राचीनकामरूपदेशः औद्योगिकदृष्ट्या सुसम्पन्नः आसीत्, तस्य सामाजिक अर्थनीतिः विकेन्द्रिता आसीत् । अतः तत्रस्थाः जनाः कुशलिनः देशस्य कुशलता राज्ञां कौशलं च दरीदृश्यते, दृश्यते च प्राचीनकामरूपस्थितिः सुपुष्टा ।

चतुर्थः परिच्छेदः

नारीणां स्थितिः

प्राचीनकाले स्त्रीणां स्थितिः समीचीनाऽसीत्। ऋग्वेदकाले स्त्रीणां दशा बहुसुन्दरासीत् यतो हि विवाहानन्तरं स्त्रीपतिगृहे सम्मानभाजनमासीत् सा च गृहस्वामिनी अभवत्[1]। परन्तु ब्राह्मणकाले स्त्रीणां दशाऽत्यन्तशोचनीयाभवत् तथा च बौद्धकाले तासां दशाऽतीव दयनीयाभवत्। यतो भगवान् बुद्धः संघे स्त्रीभ्यः प्रवेशस्यानुमतिं न दत्तवान्।[2] डॉ० पाटिलमतानुसारेण पुराणेष्वपि स्त्रीणां दशा ऋग्वेदकालतुल्यैवाऽसीत्[3]। श्रीकाणेमहोदयानुसारेण प्राचीनसमये स्त्रीवधं नैवाभवत्[4]। शतपथब्राह्मणानुसारेण स्त्रियः अवध्या आसन्[5]। अस्य प्रमाणं रामायणमहाभारतयोर्मध्येऽपि प्राप्यते[6]। पद्मपुराणे भूमिखण्डे स्त्रियो वध्याः प्रतिपादिताः[7]। तदा स्त्रीपुरुषयोः सम्बन्धः पूततमः आसीत्[8] बन्धनस्त्विदं शास्त्रानुमोदितं पुनीतञ्चासीत्[9]। बन्धनमिदं वैदिक-

---

१. वैदिक इण्डेक्स, १.४८५.

२. ओल्डेनवर्ग, बुद्ध, १६४-३७७. बी० सी० ला—वोमेन इन बुद्धिस्ट लिट्रेचर।

३. पाटिल, पृ० १५२.

४. पी० बी० काणे, हिस्ट्री ऑफ धर्मशास्त्र; २.५९३.

५. एस० बार, वाल्यूम ११, पृ० ४.

६. अवध्याः स्त्रिय इत्याहुर्धर्मज्ञा धर्मनिश्चये।—महाभारत, १.१५८.३१.

न ह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षिताम्।
वीर्यं चास्या गतिं वापि हनिष्यामीति मे मतिः॥

—रामायण, १.२७.३

७. अवध्या स्त्री सदा नृपः, स्त्रीणां बधे महत्पापं दृष्टमस्ति द्विजोत्तमैः। २०.१०६.१०७.

८. तत्रैव, ४२.३९.

९. पी० बी० काणे, हिस्ट्री ऑफ धर्मशास्त्र, वाल्यूम २, पृ० ४२७.

कालादेव मध्यमासीत्[१]। अतः स्पष्टं भवति यत् प्राचीनकाले स्त्रीणामतिसम्मानमासीत् भारतदेशे तथा च ताः गृहस्वामिनीपदमलञ्चक्रुः। अतः पतिपत्न्योः पुनीतसम्बन्धः चिरादेवास्ति। योगिनीतन्त्रे स्त्रीणां महत्त्वप्रतिपादनायैव सम्भवतः कुमारीपूजाविधानम्, तच्च कामरूपे कुमारीपूजायाः प्रचलनेन अधिकं प्रमाण्यते यदा व्यक्तीनां हृदये स्त्रीः प्रति सम्मानस्य भावनायाः जागृति भवेत्।[२] अभिलेखैः ताम्रशासनैश्च ज्ञायते यत् प्राचीनकामरूपे स्त्रियः सम्मानदृष्ट्या विलोक्यन्ते स्म। ताश्च गृहस्थव्यवस्थायां स्वतन्त्रा स्वामिन्यश्चासन्। कामरूपराजानां समुपलब्धेष्वभिलेखेषु च स्त्रीणां नामानि पुरुषैः सहैव मिलन्ति, यैः स्पष्टं भवति यत् तस्मिन् कालेऽपि स्त्रीणां सम्मानं प्रतिष्ठा च समानेऽत्यधिकाऽसीत्। ताः गृहे पूर्णस्वतन्त्रा अभवन्। अगुंठनप्रथायाः विषये (पर्दाप्रथा) वक्तुं न शक्यते सा प्रथाऽऽसीत् न वा। परन्तु ताम्रलेखेषु समुपलब्धप्रमाणैर्ज्ञायते यत् तस्मिन् काले सा प्रथाऽऽपि नासीत्। वनमालस्य तेजपुरशासने न विदितं भवति यत् स्त्रियः स्वतन्त्राः भूत्वा स्नानमकुर्वन्।

मज्जद्विलासिनी कुचकलशतदाश्लिष्टदपङ्काविलसुगन्धाम्भसा[३]।

ताम्रशासनेष्वुल्लिखितेषु नामसु नामान्भागे 'वती', 'देवी' शब्दयोः प्रयोगोऽवश्यमेव मिलति। तत्रोल्लिखितानि नामानि देवानि देवीनां प्रियवस्तूनां नामानीव तासामधिकांशतो नामानि सन्ति। अनेन ज्ञायते यत् तस्मिन् काले तत्समाजे च स्त्रीणां स्थानं गौरवपूर्णमासीत्। तथा च निधनपुरताम्रशासने रत्नवती गन्धर्ववती यज्ञवती नयनदेवी श्यामादेवी[४] इत्यादीनि, एवं हर्जरवर्मणः प्रथमशासने जीवदेवी, मंगलश्रीः[५], तथा च वनमालतेजपुरताम्रशासने जीवदेवी, महादेवी[६], रत्नपालस्य बडागांवताम्रशासने च श्यामायिका[७] प्रभृति प्रमदाभिधानानि समुपलभ्यन्ते।

---

१ अल्तेकर, पोजिसन ऑफ वोमेन इन हिन्दू सिविलाइजेशन।

२. योगिनीतन्त्रे, १.१७.३३.

३. कामेरूपशाशनावल्याम्, पृ० ६२.

४. तत्रैव, पृ० १३-१४.

५. तत्रैव, पृ० ४९-५१.

६. तत्रैव, पृ० ६०-६१.

७. तत्रैव, पृ० १००.

ताम्रशासनेषुल्लिखितनारीनामौपम्यं देवीभिः प्रकृतिविशेषावस्थानामात्मकदेवीदेवतादिभिः सार्धञ्चास्ति, येन प्रमाण्यते यत् तत्समाजे तासामुत्कृष्टस्थानं प्रतिष्ठा चासीत् । वनमालतेजपुरताम्रशासने हर्जरवर्मणो जनन्याः जीवदेव्याः प्रभातसन्ध्याभ्यां सहोपम्यमस्ति, यथा प्रभातवेला लोकानां कृते दिव्यज्ञानात्मिका सायं सन्ध्या च श्रान्त्युपहन्त्री अतश्चोभे वन्दनीये पूजनीये च तथैव लोकेषु सापि आसीत् ।

श्रीजीवदेतिसंज्ञां राज्ञी हृदयानुगा भवतस्य ।
बहुजनवन्द्या महतः प्रभातसन्ध्येव तेजसो जननी ।[1]

पुनश्च हर्जरवर्मणः प्रथमशासने कुन्त्या सुभद्रया च साकमौपम्यमक्रियत जीवदेव्याः । जीवदेवी स्वजन्मनः तस्यां पृथायामिव धर्मपुत्र सुतः सुभद्रात इवाभिमन्युः ।[2] धर्मपालपुष्पभद्राताम्रशासने गोपालपत्नीनयनदेवी लोकेषु परमयशस्विनी श्रद्धेया नासीदिति उक्तेनोद्धरणेन ज्ञायते ।

पत्नी बभूव नृपतेर्नयनाभिधाना तस्य प्रसिद्धमहसो महनीयकीर्त्तिः[3] ।

इन्द्रपालस्य गौहाटीताम्रशासनस्यानुसारं पुरन्दरपालस्य पत्नी दुर्लभा स्वपतिं पुरन्दरपालं तथैवास्निह्यद् यथा शची देवराजमिन्द्रम्, शिवं शैलतनया, विष्णुमिन्द्रा, कामदेवं रतिः, चन्द्रमसं रोहणी च । अत्र दुर्लभायाः औपम्य मुक्ताभिः देवपत्नीभिः सहास्ति, अनेन ज्ञायते सा स्वसमाजेऽतीव सम्मानभाजनतामुपगतासीत् ।

शचीव शक्रस्य शिवेव शम्भो रतिः स्मरस्येव हरेरिव श्रीः ।
सा रोहणीव क्षणदाकरस्य तस्यानुरूपप्रणया बभूव[4] ।

धर्मपालस्य शुभंकरपाटकताम्रशासनस्यानुसारं हर्षपालस्य पत्न्याः रत्नायाः समाजे ख्यातिः तस्याः दयया, दानशीलतया पुनीतगुणैश्चादभ्रमभवत् यया सा जनैः पार्वतीवाधारिताभवत् ।

---

१. कामरूपशासनावल्याम्, पृ० ६०.

२. तत्रैव, पृ० ४९.

३. तत्रैव, पृ० १७३.

४. तत्रैव, पृ० १२०.

देवस्य तस्य महिषी प्रवरा सतीनामात्मानुरूपकुलजा गिरिजेव शम्भोः।
रत्नाभिधा विविधपुण्यपवित्रकीर्त्तिरुत्कीर्य शीतकिरणादिव निर्म्मिताभूत् ॥[1]

ताम्रशासनानामध्ययनेनेत्यपि ज्ञायते यद् राजपरिवारप्रमदानामिव तत्कालब्राह्मणपरिवाराणामपि स्त्रियः स्वभर्तृन् प्रति प्रेम्णा, श्रद्धया, भक्त्या च पूर्णाः पुनीतगुणाश्चासन्, येन प्रमाण्यते यत् न केवलं राजपरिवाराणामेव स्त्रियः अपितु ब्राह्मणपरिवाराणां स्त्रियः तथा च अन्येषां समुदायानामपि स्त्रियः सादरमवलोक्यन्त सम्मानिताश्चाभूयन्त। रत्नपालस्य वडागांवताम्रशासने ब्राह्मणसदङ्गदतस्य जाया श्यामायिका पतिभक्तिश्रद्धापरायणा, पूतगुणैरभूषिता, चान्द्रमसीव शुद्धा अवगुणान्धकारज्ञानोपहन्त्री चासीत्।

श्यामायिका तस्य बभूव पत्नी प्रतिव्रता शीलगुणोपपन्ना।
उग्रेन्वुलेखेब विराजते या विशुद्धरूपा तमसो निहन्त्री[2] ॥

रत्नपालस्य श्यालकुचीशासनानुसारं च्छेप्यायिका नाम्नी नारी लक्ष्मी इव सर्वकल्याणविधायिका, सत्यशीला, सर्वजनविश्वासभानम्, सौन्दर्येण रतिरिवासीत्।

लक्ष्मीरिव जनसेव्या यार्यासीदस्य वल्लभा साध्वी।
च्छेप्यायिकेति विदिता सद्धर्म्मा वर्ण्णभूषणा रम्या[3] ॥

इन्द्रपालस्य गौहाटीताम्रशासनानुसारं ब्राह्मणस्त्री सौख्यायिका सेवाधर्मपरायणा, शुभगुणसमुदयसम्पन्ना पतिसुखप्रसन्नतायोपितस्वचिता, पतिभक्ता पार्वतीव पतिव्रता चासीत्।

सौख्यायिकेति तस्याभूत् परिचर्यासुखप्रदा।
आर्याचारस्य साचारा पत्नी गुणवती सती[4] ॥

पुनश्च तस्यैव गुआकुचीताम्रशासनोल्लिखिता अनुराधा महर्षिवसिष्ठस्य पत्नी अरून्धतीवासीत्, तस्याः पुतमाचरणं गंगोदकमिवासीत्।

---

१ कामरूपशासनावल्याम्, पृ० १५३.

२. तत्रैव, पृ० १००.

३. तत्रैव, पृ० ११२.

४. तत्रैव, पृ० १२३.

अस्य मुनेरिव वशिनः पत्नी शीलेऽरुन्धतीवासीत् ।
अनुराधेति कुलीनाङ्गेवापास्तकलिकलुषा[1] ॥

ताम्रशासनानामध्ययनेन ज्ञायते यत् तत्कालीनकामरूपे स्त्रियः विवाहानन्तर-मेकवीरादर्शपुत्रजननीरूपे आत्मानमवलोकितुं कामयमाना आसन्। हर्जरवर्मण-स्तु तस्य मातरं जीवदेवीं युधिष्ठिरस्य मातरं कुन्तीमिव अभिमन्योः मातरं सुभद्रामिव तस्यैव प्रथमताम्रशासने प्रत्यपादयत्। भास्करवर्मणो निधनपुर-ताम्रशासने यज्ञवती यज्ञविधिनामास्याग्नेरिव, वीरस्य आदर्शपुत्रस्य महेन्द्र-वर्मणो जननी आसीदिति प्रतिपादितं विद्यते[3] ।

रत्नपालस्य बडागांवताम्रशासनाध्ययनेन प्रतीयते यत् समाजसंस्था-श्रेणिविभागानुसारं श्रेणीद्वयमासीत्, द्विप्रकारिकाः स्त्रियः आसन् ऐश्वर्य-शालिपरिवाराणां स्त्रियः सामान्यपरिवाराणां स्त्रियञ्च, तयोः जीवनयापन-विधौ महदन्तरमासीत्। राजप्रासादेषु नागरेषु च निवासिनीनां विलासिनीनां, सीमन्तीनीनां जीवनं विलासपूर्णमासीत् ताश्च सौन्दर्यप्रसाधनोपकरणदर्पणां पेशलसुवासिततैलंगरागादीनामुपयोगमकुर्वन्। योगिनीतंत्रानुसारं पवित्रपानूर-भवनगरस्य स्त्रियः पवित्राः सुन्दर्यः कमलनेत्राः, हंसगतयः, चन्द्रपकौलिन्यः, कोकिलकण्ठ्यश्चासन्[4]। रत्नपालस्य बडागांवशासनादपि योगिनीतन्त्रतथ्य-समर्थनं भवति।

उन्मदकलहंस कामिनीकुलकुणितपेशलमरुन्मन्दान्दोलितोर्म्मिशीकरे ....
.........**नागेशकामिनीविभ्रवमणिदर्प्पणेन**.........[5] ।

तत्कालीनताम्रलेखैरवगम्यते यत् तत्कालीनसमाजसंस्थायामपि वेश्याजनाना-मवतिस्थिरासीत्। यासामन्यजनानां मनोरञ्जनमेव वृतिरासीत्। पुराणानाम-नुशीलनेन ज्ञायते यद् या स्त्री पञ्चजनैः सह सम्पर्कमकरोत् सा वेश्यानामा-सादयत्[6]। प्रायः तृतीये ईसवीये शते देवालये नृत्यगीतार्थं देवतानां सेवार्थञ्च

१. कामरूपशासनावल्याम्, पृ० १३४.
२. तत्रैव, पृ० ४६.
३. तत्रैव, पृ० १३.
४. योगिनीतन्त्रे, २.६.१६.
५. कामरूपशासनावल्याम्, पृ० ६७.
६. हिस्ट्री ऑफ प्रास्टीट्यूत इन इण्डिया, पृ० १५४.

स्त्रियः विन्ययुज्यन्त[1]। एवमेव मध्यभारते दक्षिणभारते च देवदासीप्रथायाः प्रचलनमासीत्।

पेन्जरमहोदयः ग्रन्थे अलिखत् यद् मथुरास्थितदेवालये रूमिणिका नाम्नी नृत्यकलाविशारदा कन्या सेविकापदे विन्ययुज्यत प्रथैषाद्यापि च आसामप्रान्ते प्रचलन्त्येवास्ति। प्राचीनकाले आसामप्रान्ते शिवायतनेषु नटाः नर्तकीणां गायिकानां व्यवस्थामेवं शिवायतनान्यन्यकर्माणि चाकुर्वन्[3]। अहोमराजशिवसिंहः शिवायतननटीफुलेश्वरी सौन्दर्यमुग्धो भूत्वा तया सार्धं विवाहमकरोत्[4] ताञ्च प्रधानमहिषीपदमददात्[5]। अनेन प्रमाणितं भवति यदुच्चवर्गे विहाहसंबन्धिप्रतिबन्धावहेलनाजन्यसामाजिकन्यायभीतिरासीत्। वनमालस्य तेजपुरशासनेनावगम्यते यद्वेश्याजनाः मन्दिरेषु नृत्यगीतादिककार्यं देवालयसेवाकार्यञ्चाकुर्वन्। अतः ताः सम्भवतः देवालयस्य शोभावर्धनार्थमाकर्षणार्थञ्च नियुक्ता अभवन्।

प्रालेयानलशृङ्गमतुलग्रामेभवेश्याजनैर्युक्तं।[6]

पुनश्चास्मिन्ननेव ताम्रशासने नटीवेश्याजनानामुल्लेखो ताञ्च देवालयाकर्षणदेवप्रतिमाग्रनृत्यगीतकार्यमालाकरणकर्मकरणार्थं विनियुज्यन्ते स्म, तासां सममपि जीवनं सामाजिकजनानां सांस्कृतिककार्ये मनोविनोदार्थमेवासीत् ताश्च स्वरूपेण सुशोभनाः सुन्दराः आकर्षिकाश्चाभवन्—

> **वेशाङ्गनाभिरिव नानाभरणशोभितप्रकटावयवाभिर्वलिकुमारिकाभिरिव ......रमणीयदलुहाङ्गनाभिरिव सकलजनमनोहारिणीभिर्नटीभिरिव।**[7]

---

१. अल्तेकर—दी पोजिशन ऑफ वोमेन इन हिन्दू सिविलाइजेशन, पृ० २१४-१५.

२. दी ओसन ऑफ स्टोरी, १, एपेण्डिक्स ४, पृ० २३४.

३. सेन्सस ऑफ इण्डिया, १९०१, आसाम, पार्ट १, पृ० १४१.

४. पुरानी आसाम बुरुन्जी, पृ० ८२-८३.

५. गेट, हिस्ट्री ऑफ आसाम, पृ० १८३-१८४.

६. कामरूपशासनावल्याम्, पृ० ६२.

७. तत्रैव, पृ० ६४.

डॉ० ककाटीमहोदयाः दलुहाङ्ग व्याख्यावसरे प्रतिपादयति—दलु शब्दस्यार्थः मन्दिरम्, अङ्गना शब्दस्यार्थः स्त्री[1]।

प्राचीनकामरूपताम्रशासनानामध्ययनेन स्त्रीशिक्षाया अपि प्रचलनमासीदिति ज्ञायते। वैद्यदेवस्य कमऊलीताम्रशासनेन ब्राह्मणानां स्त्रियः न केवलं विदुष्य एव अपितु कलाकोविदाः काव्यानां कवयित्र्योऽपि भवन्तीत्यवगम्यते।

पद्मागर्भोद्भवश्चैव प्रसस्तिं श्रीमनोरथः............शश्वद्विश्वपरिभ्रमन्नवनवोन्नीलधराः.........कर्ण्णभद्रेण भद्रेण शिल्पिनानल्पबुद्धिना।
ताम्रं विनयनम्रेण निर्म्मितं साधुकर्म्मणा।

तेन प्रमाणितं भवति यत् प्राचीनकामरूपे स्त्रीशिक्षायाः प्रचलनं चारु आसीत्।

ताम्रशासनैः ज्ञायते यत् प्राचीनकामरूपे प्रमदा सौन्दर्यप्रसाधनप्रविधाने विशेषरुचिरासीत, येन स्त्रियो विविधानां प्रसाधनपदार्थानामुपयोगमकुर्वन्। वनमालस्य तेजपुरशासनेऽस्ति उल्लेख यत् प्रमदाः विविधसुरभिवस्तूनां शरीररुचिप्रवर्धनार्थं विलेपनं कुर्वन्ति स्म, तथा च सुवणरुचिभ्राज्यमानकुचकलशानां विविधैः सुरभितपदार्थैः विलेपनं, प्रसाधनमाचरन्। मज्जन्दिलासिनीकुचकलशतटाश्लिष्टमदपङ्काविलसुगन्धाम्भसा। भूयो अनेनाभिलेखेनैवावगम्यते, यत् तत्कालीनकामरूपे स्त्रियः शरीरशोभावर्धनाय विविधालंकाराभूषणैः शरीरमलंचक्रुः। अत्र बालकुमारिकाणां अलंकारविशेषकिंकिणीद्वारा तासां शरीरभूषायाः उल्लेखो दृश्यते—

बालकुमारिकाभिरिव क्वणत् किङ्किणीभिः।[2]

वल्लभदेवस्य ताम्रशासनानुसारं नार्यः चन्दनादिसुरभिद्रव्याणां नानाविधानामलङ्कराणामुपयोगमकुर्वन्नित्यस्त्युल्लेखः। रत्नपालबडागांवताम्रशासने स्त्रियः विभिन्नविधदर्पणपेशलमालादिवस्तूनां प्रयोगमकुर्वन्।

कामिनीकुलकुणितपेशलमदन्मदान्वो.........
नागेशकामिनीविभ्रममणि दर्प्पणेन[3]।

---

१. न्यू इण्डियन एण्टीक्वेरी ४, पृ० २९०.
२. कामरूपशासनावल्याम्, पृ० ६३.
३. तत्रैव, पृ० ९७.

कामरूपात् प्राप्तताम्रशासनानामाधारमाकलय्य वक्तुमिदं शक्यते यत् प्राचीनकामरूपे स्त्रीणां दशा शोभनासीत् समाजे तासां सम्मानात्मकं स्थानमासीत्। कामरूपवासिनः तासां शिक्षायै सौन्दर्यवर्धनाय च सन्नद्धा आसन्। कामरूपसम्बन्धितप्राप्तताम्राभिलेखप्रमाणैस्तत्र सामाजिकार्धांग-भूतानां स्त्रीणां सामाजिकसंस्थायां शिक्षाया सौन्दर्येण, सम्मानेन सुस्थितिर्दरीदृश्यते जनाश्च तासां सुस्थितिसंरक्षणाय च कृतप्रयत्ना अपि परिदृश्यन्ते। एवं स्त्रीणां सामाजिकस्थितिस्तत्र सुशोभनासीदिति निःशंकं वक्तुं शक्यते।

खाद्यव्यवस्था

प्राचीनकामरूपे बहुप्रकारकखाद्यपदार्थानामुपयोगोऽभवत्। अत्र खाद्य-वस्तुषु मुख्यधान्यं शालिरासीत् ततः प्राप्तेषु अभिलेखेषु प्रचुरशाल्युत्पादनस्य प्रमाणमुपलभ्यते। यतः भूमेरनुमापनं धान्यप्रमाणेनाभवत्। रत्नपालस्य बडागांवशासने धान्यभूमौ[1], इन्द्रपालस्य गौहाटीताम्रशासने-धान्यं[2] तस्यैव द्वितीयशासने धान्यशब्दस्यास्त्युल्लेखः, धर्मपालस्य शुभंकरपाटकपुष्पभद्रा-खोनमुखशासनेषुधान्य शब्दस्य भूयो भूय आवृत्तिरवगम्यते। एवं समस्तेषु अभिलेखेषु धान्यशब्दस्य प्रयोगः परिदृश्यते, येन प्रतीयते यत् तस्मिन् काले कामरूपे अन्यखाद्यपदार्थापेक्षया व्रीहीणामधिकमुपयोग आसीत्। कामरूपस्य प्राचीनसाहित्येऽपि विभिन्नभोज्यपदार्थानां समुपयोगः समुपलभ्यते। योगिनी-तन्त्रे विंशतिप्रकारकाणां शालिनां नामावली वर्तते—

यष्टि धान्यं राजधान्यं वृहत्धान्यं च वल्लभे।
सोमधान्ययिकधान्यं, वंगम् वोई रक्तशालिकम्॥
केतकी कलवी कंच धान्यं नारायणं तथा।
मानलचं प्रदीयचं विष्णुधान्यं च वल्लभम्॥
भोगधान्यं अशोकञ्च नागाच्छम् पंचकम् तथा॥[6]

---

१. कामरूपशासनावल्याम्, पृ० १२९.
२. तत्रैव, पृ० १२२.
३. तत्रैव, पृ० १३७.
४. तत्रैव, पृ० १७७.
५. तत्रैव, पृ० ११७.
६. योगिनीतन्त्रे, २.५.२८९-९१.

अतः इति निश्चप्रचमेव यत् कामरूपे शालिनामुत्पतिरुपभोगश्च विशेषत आसीत्। योगिनीतन्त्रेण एतदपि ज्ञायते यत् महिष्याः दुग्धदधिनवनीतानामपि भोज्यपदार्थेषु समुपयोग आसीत्।[1] कामरूपस्य प्राचीनसाहित्यावलोडनतो ज्ञायते यत् तत्र तदानीन्तने काले पंचाशताधिकं प्रकारकभोज्यपदार्थानां विविधैः व्यंजनैः शाकैः, द्विदलेन, मत्स्यैः मांसेन भुज्यन्ते स्म। कामरूपे मत्स्यानां भोज्यपदार्थेषु सम्भवतः उत्तरवैदिककालात्स्थानम् आसीत्, एतत् प्रायः मंगोलियनजनानामाक्रमणसमयात् प्रचलितमभवत्। यतः तत्रस्थजनेषु मत्स्यग्रहणस्य अनेकसाधनानि प्रचलितानि आसन्। आसामप्रान्ते पिलंगी (जालः) खोको (मत्स्यग्रहणविधिः) एतयोः शब्दयोः अधिकं प्रयोगः समुपलभ्यते येन प्रमाणितं भवति यत् तदा अधिकाधिकं मत्स्यग्रहणकार्यमभवत्।[2] योगिनीतन्त्राद् ज्ञायते यद् उच्चवर्णेषु मत्स्यभक्षणनिषेधः आसीत्[3] पुनश्च योगिनीतन्त्रकालिकापुराणाभ्यां ज्ञायते परिज्ञानं तस्मिन् काले तत्र पशुबलिप्रथा प्रचलितासीत्। अस्याः प्रथायाः विषये द्वितीये अध्याये विस्तृतं विवेचनमस्मिन्नेव निबन्धे मया कृतम्। योगिनीतन्त्रप्राप्तविवरणानुसारं कामरूपे मांसोपभोगविषये नासीन्निषेधः।

'कामरूपे न त्यजेत् सामिषाम्'।

उपरोक्तप्रमाणैर्ज्ञायते यत् कामरूपे ब्राह्मणाः किमपि प्रतिबन्धं विना मांसप्रयोगमकुर्वन्।

बाणभट्टकृतहर्षचरितग्रन्थेन कामरूपप्राप्तताम्रशासनलेखैश्च कामरूपे विविधजातीयानां फलानामुत्पादनस्योपलभ्यन्ते साक्षिभूतप्रमाणानि। भास्करवर्मप्रभृतीनां राज्ञामभिलेखेषु आम्र-कंटकिफलनारंगक-जम्बीर-जम्वुकूष्माण्डादीनां फलानां वर्णनं वर्तते। अस्यैव निबन्धस्य तृतीयाध्याये एतदधिकं न परिज्ञायते।

मनोरञ्जनम्

प्राचीनकामरूपे विविधप्रकारकाणि मनोरञ्जनसाधनानि प्रचलितानि आसन्। कालिकापुराणे कामरूपस्य पुरुषाः अक्षैरक्रीडन्त, स्त्रियश्च

---

१. महिषं वर्जयेत् मांसम् क्षीरं दधि घृतन् तथा योगिनीतन्त्रे ११.९.२५७.

२. आसाभीज, हट्स फार्नेशन एण्ड डवलपमेण्ट पृ० ७७.

३. योगिनीतन्त्रे, ११.५.२७५.

पुत्तलिकाभिः (गुडिया इति भाषायाम्[1]) । इन्द्रपालस्य गोहाटीगुआकुचीताम्राभिलेखयोः अक्षाणामस्ति समुल्लेखः । एतयोरभिलेखयोः अक्षैः क्रीडतोः पार्वतीपरमेश्वरयोः वन्दनाश्लोकः वर्तते । अस्मिन् वन्दनापद्ये मञ्जुप्रकारेण अक्षक्रीडनस्य विधिं प्रास्तौत् । एतदक्षक्रीडाचित्रमालोक्य परिज्ञानं भवति यत् तत्कालीनाः तत्रस्थाः सामाजिकजनाः क्रीडन्ते स्म । तत्काले तत्र अक्षैः क्रीडनं पवित्रं मनोरञ्जनसाधनमासीदित्यप्यवबुध्यते, अन्यथा पार्वतीपरमेश्वराभ्यामेवमक्षैः क्रीडा नैवार्चयत । अतः सन्देहं विहाय एतद् वक्तुं शक्यते यज्जना अक्षैरक्रीडन्त ।

> **खट्वाङ्गं परशुर्वृषः शशिकलेत्यादि त्वदीयं मया**
> **सर्वस्वं, जितमद्य नाम कितव प्रत्यर्पितं ते पुनः ।**
> **प्रेष्या केवलमस्तु मे जलवहामङ्गेति गौरीगिरा**
> **शम्भोर्द्युतकलाजितस्य जयति क्रीडाविनम्रं शिरः[2] ।।**

आसामबुरुञ्जी ग्रन्थेऽपि बहुविधानां क्रीडाविधीनामुल्लेखः समुपलभ्यते । प्राचीनकामरूपवासिनो जना समये समये विविधानां खेलानामायोजनमकुर्वन् यथा गजानां महिषाणाञ्च युद्धम्, सिंहेष्वधिवासम्, पारावततित्तिरकुक्कुटानां युद्धम् एवमादिक्रीडाविधीननाचरन्नपश्यञ्च । अहोमराजः कपोतेभ्यः विविधप्रकारकाः शिक्षाः अदापयत्[3] । बतकाः मन्टानामकखेलमखेलन् नाम्ना क्रीडन्ति[4] । प्राचीनकामरूपे आखेटमपि मनोरञ्जनस्योत्तमं साधनमासीत्, यद् अद्यापि देशे बहुत्र प्रचलति ।

बल्लभदेवस्य शासने महिषाणामाखेटस्य वर्णनमस्ति । भास्करवर्मणः दुबीशासने जालं प्रसार्य हरिणानामाखेटस्योल्लेखः समुपलभ्यते । इन्द्रपालस्य गोहाटीशासनेऽपि जालप्रसारणद्वारा सिंहस्याखेटकरणविधेरुल्लेखो विद्यते । पशुपक्षिणां युद्धं द्रष्टुं कामाः जनाः मल्लयुद्धस्यावश्यमेवाभिरुचिमकुर्वन् इति कल्प्यते । मल्लयुद्धे व्यायामस्य नितरां नित्यमावश्यकता भवति, अतः

---

१. कालिकापुराणे ८६.१३४.

२. इन्द्रपाल—गोहाटी—गुआकुचीशासने—श्लोकः १.

३. आसामबुरुञ्जी-परिचय-१५. ।

४. कालिकापुराण-अध्याय ८४.

एतदपि कल्प्यते यत्ते व्यायाममकुर्वन् । व्यायामेन स्वास्थ्यं स्वस्थतां गच्छति, अतः व्यायामकर्तारस्ते मनोरञ्जनव्याजेन स्वास्थ्यमजेयत् अतस्ते दृष्टाः पुष्टाः स्वस्थाश्चासन् ।

परिवहनसाधनानि

प्राचीनकामरूपे परिवहनसाधनानां समीचीनं विकास आसीत् । तत्र समुपलब्धेषु ताम्राभिलेखैः वहुविधानि परिवहनसाधनानि परिज्ञायन्ते । तानि विविधानि द्विधा विभक्तु शक्यन्ते—

१. स्थलीयपरिवहनसाधनानि,

२. जलीयपरिवहनसाधनानि

स्थलीयपरिवहनसाधनेषु हस्तिनः, अश्वाः, रथाः, वृषभाः, रथाः, शकटिकाश्च इत्येतेषां ताम्रलेखेषु तत्कालीनसाहित्ये च प्रमाणं अधिगम्यते । हस्तिनामश्वानां रथानाञ्चोपयोगः युद्धेष्वपि अभवत् । अश्वानाम्, वृषभाणां, शकटिकानाञ्च कृषकाः व्यापारिणश्चोपयोगमकुर्वन् । धनवन्तो जनाः यात्रार्थं रथानामश्वानामुपयोगं कुर्वन्ति स्म । कामरूपकारुकाः विविधप्रकारकान् रथान् न्यर्मीयन्त इति हर्जरवर्मणः ताम्रशासनात् ज्ञायते । प्रायः समस्तेषु ताम्रशासनाभिलेखेषु रथ[1]हस्ति[2]घोट[3]कानां विवरणस्योपलब्धिर्जायते ।

जलीयपरिवहनसाधनानि नौकाः आसन् । यासां निर्माणं कामरूपे एवाभवत् । एताः आकारेण स्वल्पाकाराः वृहदाकाराश्चाभवन् । जलसेनायां नौकानामुपयोग आसीदतीव महत्त्वपूर्णम् । नौकाभिश्च जना एकस्थानात् अन्यमपि स्थानमगच्छन् । व्यापारविधौ व्यापारिकाणां विशालाकाराणां नौकानामुपयोगोऽभवत् । याभिश्च देशे, बाह्यदेशेभ्यश्च व्यापारमभवत् । ताम्रशासनेषु[4] साहित्ये च नौकापरिवहनसाधनानामुल्लेखः वनमालस्य तेजपुरशासने एकस्याः राजकीयाः नौकायाः मञ्जुवर्णनं लभ्यते या विविधैः अलंकारैः सुसज्जितासीत्, येषु क्षुद्रकिंकिणीः संलग्नाः आसन् । ताम्रशासनैरेवं विविधपरिवहनसाधनानां कामरूपे प्रचलनमासीदिति ज्ञायते ।[5]

---

१. कामरूपशासनावल्याम् पृ० ६०, १७५.

२. तत्रैव, पृ० ९९, १२२, १३७, १५५, १७८.

३. तत्रैव, पृ० ९९, १३७, १५५, १७८.

४. तत्रैव, पृ० ९९, १२२, १३७, १५५, १७८.

५. तत्रैव, पृ० ६४.

परिवारः (कुटुम्बः)

प्राचीनकाले प्रायः समाजस्य लघुतमा संस्था कुटुम्ब एवासीत्। प्राचीनकामरूपे सम्भवतः संयुक्तपरिवारप्रथासीत्, यस्यां मातापितरौ अविवाहितवालिकाः, तयोः पुत्रास्तेषां स्नुवाः न्यवसन्। भास्करवर्मणो निधनपुरताम्रशासनस्य भूमिदानेन ज्ञायते यत् द्वित्रिभ्रातृणां कृते भूमिरेकस्मिन्नेवांशे दीयते स्म। पुनः द्वाभ्यां भ्रातृभ्यां संहैवार्द्धमर्द्धं भूमिः प्रदत्ताऽभवत्।

श्रीवसुर्भ्रातृत्रयेण एकोंऽशः। सोमवसुर्भ्रातृसहितोद्धांशः[1]।

धर्मपालस्य शुभंकरपाटकशासनेन ज्ञायते यत् हिमांगत्रिलोचनौ द्वौ भ्रातरौ बहुकालं यावत् संयुक्तपरिवारस्य सदस्यो नास्ताम्। सम्भवत एतौ सम्पतिरावासस्थानञ्च व्यभजताम्। अनेन स्पष्टं भवति यत् तदानीं उत्तरीभारतवर्षमिव कामरूपेऽपि संयुक्तपरिवारस्य एवं सम्पत्तेश्च विभागप्रथा प्रचलिताऽसीत्।

नाराचमोक्षगतिपातगुणप्रवीणाः प्राणाधिकोऽजनि ततोरधिकोहिमाङ्गः ······त्रिलोचनाय तेनैवभ्रात्रेऽस्मादेव शासनात्। सोदराय ददौ भूमिर्द्वयोर्द्धाज्यसहस्रयोः[2]।

विवाहः

प्राचीनकामरूपस्य सामाजिकेषु संस्कारेषु विवाहो मुख्यसंस्कार आसीत्। विद्याध्ययनान्तरं तेषां गृहस्थाश्रमप्रवेशः सम्मानजनकमासीत्, ते च सन्तानोत्पत्त्या पितृऋणमुक्ता अभवन्। गुरुगृहात् प्रत्यावर्त्य केचन ब्राह्मणयुवका राजसभामभिगच्छन् यत्र तेषां वहुसम्मानमभवत्, पश्चात् गृहस्थाश्रमं प्रविश्य गृहस्थजीवनमयापन् अस्य प्रमाणं बलवर्मणो नवगांवशासने दरीदृश्यते।

स सभावृतो गुरुतो गृहधर्मविधित्सुरागतस्साधु।
काले विषुवत्यर्थी धर्म्मपरः पण्डितः कथानिष्ठः।।
तस्मै विप्राय मया स्नात्वा सम्यक् समाविना दत्ता।
यदिह फलं तत् पित्रोर्म्यमपि लोकोत्तरं भूयात्[3]।।

---

१. कामरूपशासनावल्याम्. पृ० १७.

२. तत्रैव, पृ० १५६.

३. तत्रैव, पृ० ७९.

प्राचीनसमये यदि कस्यचित् स्नातकस्य विवाहः, समावर्तनसंस्कारानन्तरं नाभवत् तावत् कालं स तु न ब्रह्मचारी नहि गृहस्थ एव भवेत्[1]। मध्यकालीनलेखकमित्रमिश्रानुसारेण समावर्तनसंस्कारानन्तरं वैदिकधर्मावलम्बिनां सनातनानां द्विजातीनां कृते गृहस्थाश्रमप्रवेशकरणमावश्यकमासीत्[2]।

ताम्रशासनैरपि प्रमाण्यते यत् तस्मिन् समये समावर्तनसंस्कारोऽभूत्, अर्थात् गुरुगृहादागते सति समावर्तनसंस्कारविधिर[3]भूत्। तदानीं कामरूपे बालविवाहस्योल्लेखो न समुपलभ्यते। यतः विवाहो गुरुगृहादागते सति एव सम्भव आसीत्। प्राचीनभारते शास्त्रानुसारेणाष्टधा विवाहाः प्रचलिता आसन्—

१. **ब्राह्मविवाहः**—अस्मिन् स्वतन्त्ररूपेण कन्या पित्रा योग्यपतये दीयते स्म।

२. **दैवविवाहः**—अस्मिन् कन्याया विवाहः केनचित् तपस्विना सहाभवत्।

३. **आर्षविवाहः**—अस्मिन् वरः कन्यापित्रे वृषभद्वयमददात्।

४. **प्राजापत्यविवाहः**—अस्मिन् कन्यायाः पिता वराय कन्यादानमकरोत् ताभ्यां धर्मपालनस्योपदेशं चाददात्।

५. **राक्षसविवाहः**—अस्मिन् बलेन कन्यामपाहरत्।

६. **पैशाचविवाहः**—अस्मिन् मदेनोन्मत्तया, सुप्तया वा कन्यया सम्बन्धं क्रियते।

७. **गान्धर्वविवाहः**—अस्मिन् उभौ पितृभ्यामाज्ञायाः कृते प्रेम्णा परस्परं शारीरिकसम्बन्धस्थापनपूर्वकं विवाह सूत्रे अवध्नीताम्, यथा दुष्यन्तशकुन्तले।

८. **आसुरविवाहः**—अस्मिन् कन्याक्रयमभवत्।

एषु विवाहेषु राक्षसपैशाचगान्धर्वविवाहाश्च क्षत्रियाणां कृते प्रच-

---

१. अल्तेकर, एजुकेशन इन एन्सेण्ट इण्डिया पृ० ३९.

२. पृ० ५७५.

३. वलवर्मताम्रशासनं श्लोक ३१, कामरूपशासनावल्याम्, पृ० ७९.

लिता आसन् । वैश्यानां शूद्राणां च कृते सुरविवाहस्तथा विशिष्टाश्चत्वारो विवाहाः ब्राह्मणानां कृते आसन्[1] । किन्तु चौधरीमतानुसारेण राक्षसपैशाचासुराश्च विवाहाः निम्नजातिष्वेव प्रचलिता आसन्[2] । कामरूपे ब्राह्मविवाहः प्रचलित आसीत् विशेषरूपेण । अस्य विशद्विवरणं एच० सी० वरुआमहोदयस्य पुस्तके प्राप्यते[3] । अस्मिन् विवाहे सप्तपद्याः बहुमहत्वमासीत्, वरेण सह कन्यासप्तपदगमनमकरोत्, कन्या पूर्वस्यां दिशि मुखं कृत्वोपाविशत् पतिश्च उत्तरस्यां दिशि, सः कन्यायाः करं गृहीत्वाऽवोचत्, तव करौ सुन्दरौ, त्वमैश्वर्यवत्यसि, तवायुः ममायुषा सहैवाधिकमस्तु[4] । धर्मपालपुष्पभद्राभिलेखे भास्करजीवयोर्विवाहाभ्यामुपलभ्यते—

जीवामि चारुचिररूपधरायकन्या धन्याकृतिर्विमलवंशभवा बभूव ।
तस्याः करे स करं जगृहे गृहस्थधर्माय कङ्कणधरं धृतकंकणेन[5] ॥

अनेन प्रतीयते यदा कन्या विवाहयोग्याऽभवत् तदा योग्यपतये सा दीयत । तत्र बालविवाहस्योल्लेखो नोपलभ्यते, विवाहः योग्यवर्णकुलयोरेवाभवत् । ताम्रशासने अन्तर्जातीयविवाहानामुल्लेखो न प्राप्यते । परन्त्वन्तर्जातीयविवाहाः प्रचलिताः आसन् । अहोमराजा शिवसिंहः फूलेश्वरीवेश्यया सह परिणयमकरोत् ।[6] तथा च प्रधानमहिषीपदमलंकरोत् ।

जातिव्यवस्था

वर्णव्यवस्था

प्राचीनभारतवर्षे सामाजिकाधारशिला वर्णाश्रमव्यवस्थैवासीत् । समाजः चतुर्षु वर्णेषु ब्राह्मण-क्षत्रिय-वैश्य-शूद्रवर्णेषु विभक्त आसीत् । ऋग्वेदे ब्राह्मणस्य ब्रह्मणः मुखात्, क्षत्रियस्य बाह्वोः, वैश्यस्य ऊर्वोः, शूद्रस्य पदयोश्च प्रतिपादिताभूत् । आधारमिदमेवावलम्व्य तेषां कार्याणामपि प्रविभाग आसीत् । ब्राह्मणस्य कार्यमासीदध्ययनाध्यापन सामाजिकानाम् ।

---

१. कल्चरल हिस्ट्री ऑफ आसाम, पृ० ११६.

२. ब्रजभूषणघोषचौधरी, आसाम और बंगदेश विवाहपद्धति, पृ० ५०.

३. नोट्स आन दी मैरेज सिस्टम ऑफ पीपुल ऑफ आसाम, शिवसागर, १९०९.

४. ऋग्वेद, ८५,३६.

५. कामरूपशासनावल्याम्, पृ० १७६.

६. आसाम का इतिहास, पृ० १८३-८४.

क्षत्रियस्य कार्यमासीद् राष्ट्रस्य जनानाञ्च रक्षणम्। वैश्यवर्णस्य कृषिवाणिज्यादिकं शूद्राणाञ्च त्रयाणां वर्णानां सेवाकार्यमेव[1] वृतिरासीत्। वर्णव्यवस्थाया अन्तर्गते सामाजिकानां जीवनपद्धतिः चतुःषु आश्रमेषु आयुषः कालक्रमेण ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाश्रमेषु प्रविभक्तमासीत्। मनुनापि आश्रमधर्माणाम्, यथा च मानवजीवनप्रथमकाले ब्रह्मचर्यव्रतपालनं कुर्वन् गुरुसकाशे गत्वा शिक्षार्जनकरणम्, समावर्तनसंस्कारानन्तरं गृहस्थाश्रमे प्रविश्य पितृर्णतः विमुक्तभवनम्, प्रौढायां वयसि गार्हस्थ्यजीवनं परित्यज्य वानप्रस्थजीवनयापनम् अन्ते च सर्वे प्रापञ्चिकं जगजलं परित्यज्य संन्यासाश्रमं परिगृह्य तत्रैव शरीरत्यागकरणमिति व्यवस्था परिकल्पिता[2]। गौतम[3]-बोधायनमतन्तु[4] मनोः मततः भिन्नमासीत्। तौ तु गृहस्थाश्रमं प्रधानाश्रममभिमन्येते। ब्रह्मचर्याश्रमं तु जीवनस्य भित्तिरेव, अन्याश्रमे गौणे वर्तेते। गृहस्थाश्रममन्याश्रमाणां पोषकत्वात् कलौ तदेवावशिष्टं भविष्यति अन्यानि चाश्रमाणि विलुप्तप्राय एव भविष्यन्ति[5]।

प्राचीनकामरूपस्य ब्राह्मणेषु बहूनि उदाहरणानि समुपलभ्यन्ते यत् ते गृहस्थाश्रमप्रवेशसमयतन्नियमैरपरिताः एव आसन्[6]। कामरूपराजपरम्परासम्बन्धिप्राप्त-ताम्रशासनैरवगम्यते यत् प्राचीनकामरूपे समाजो वर्णाश्रमव्यवस्थाधारित आसीत्। तत्रस्थाः राजानो वर्णव्यवस्थापरिपालका आसन्। यथा—

अवकीर्णवर्णाश्रमधर्मप्रविभागाय निर्मितो[7]।

वनमालस्य तेजपुरशासने प्रतीसमस्तवर्णाश्रमादपरिमितसुभाग[8] बलवर्मणो नवगांवशासने प्रजारञ्जनलब्धवर्णो वर्णाश्रमाणाम्[9] इन्द्रपालस्य गौहाटी-

---

१. ऋग्वेदे, पुरुषूक्त।
२. मनुस्मृति, १.५.१६६, ६.१.२.३३.
३. गौतमसूत्रे, ३.१.३५.
४. बोधायने, २.६.२९.
५. हिस्ट्री ऑफ धर्मशास्त्र, वाल्यूम् २, पार्ट १, पृ० ४२४.
६. तत्रैव,।
७. कामरूपशासनावल्याम्, पृ० १५.
८. तत्रैव, पृ० ६३.
९. तत्रैव, पृ० ७४.

गुआकुचीताम्रशासनानुसारं तत्काले वसुन्धरा सस्यवसुसम्पन्ना कामधेनुरिव कामदुघा चाभवद् राज्ञः पृथोः काले इव अर्थात् तस्य राज्ये प्रजासुखसम्पत्सम्पन्नासीत् । यतः तस्मिन् काले वर्णाश्रमधर्मस्य पालनं सम्यक् प्रकारेणाभूयत ।

सम्यग्विभक्तचतुराश्रमवर्णधर्मः ।
सा नन्दिनी सकलकामदुहा प्रजानां ।
पृथ्वी पृथ्वोः पुनरिव प्रथितोदयासीत्[1] ।

वर्णेषु ब्राह्मणः

ऋग्वेदसमये वर्णेषु ब्राह्मणः श्रेष्ठ आसीत्[2] । उत्तरवैदिककाले ब्राह्मणाः देवा इवाभवन् तस्मिन् काले एव प्रायः तेषां भूसुर संज्ञा जाता ।[3] ब्राह्मणानामेषा स्थितिरुत्तरोत्तरवृद्धिमेवागमत् । डा० काणेमहोदयः लिखति यद् धर्मशास्त्रानुसारं ब्राह्मणाः देवेभ्यः पूज्यतराः[4] ।

कामरूपस्य राज्ञां ताम्रलेखैरभिज्ञायते यत् तस्मिन् काले ब्राह्मणानामद्भ्रं सम्मानं प्रचुरा च प्रतिष्ठासीत् । अत एव उत्तरभारतवर्षात् बहुसंख्याः ब्राह्मणाः कामरूपं गत्वा तत्रैवान्यवसन् यतः कामरूपनरनाथाः विदुषान्, ब्राह्मणानामाचार्याणां धर्मगुरुणाञ्च संरक्षकाः आसन् । कालान्तरेणोत्तरभारते बौद्धानां प्रभावे यदान्यनतायाता तदा पुनः ब्राह्मणाः पश्चिमभारतमागच्छन् । श्रीभट्टाचार्यस्य मतं यदाधुनिकवंगदेशीयानेकब्राह्मणपरिवाराणामागमनं कामरूपाद[5]भवत् । सिलीमपुरलेखादपि प्रमाणितं भवति यदनेकेब्राह्मणाः कामरूपाद् बहिरगच्छन् । ब्राह्मणानां श्रेष्ठतायाः कारणादेव निधनपुरताम्रशासनानुसारं भास्करवर्मणा स्वराज्ये तेभ्योऽग्रहारभूमिदानमदीयत तेषां धार्मिककार्याणां सम्पादनाय, दानमेतत् यावच्चन्द्रदिवाकरावधि यावदासीत् ।

विदितमस्तु भवतामेतन्विषयान्नः पातिमयूरशाल्मलाग्रहारक्षेत्रं……
चन्द्रार्कक्षितिसमकालमकिञ्चित्प्रगृह्यतमा भूमिच्छिद्रन्यायेन पूर्व

---

१. कामरूपशासनावल्याम्, पृ० १२०, १३६.

२. पी० थामस, हिन्दू रीलिजियस, कस्टम्स एण्ड मेरर्स, पृ० ११.

३. कीथ, रीलिजन एण्ड फिलास्फी ऑफ दी वेद, पृ० ५७६-५७७, ६३१.

४. काणे, हिस्ट्री ऑफ धर्मशास्त्र, वाल्यूम् २, पृ० १३५.

५. इपि० इण्डि०, १४ पृ० २४६.

भोक्तृ ब्राह्मणेभ्यः[१] ।

सिलीमपुरशासनानुसारं राजाजयपालेन पुण्ड्रस्य ब्राह्मणात् नवशत-सुवर्णमुद्राः एकसहस्त्रद्रोणधान्योत्पादिकाभूमिं ग्रहीतुमनुरोधोऽक्रियत ।

यः कामरूपनृपतिर्जयपालदेव नाम्नाह तुल्यपुरुषादतुराचिन्त्यधामनाह ।
हेमनाम सातनीनव विर्भरामार्थायमनो नैवदेददशासटादया शासनाम् च[२] ।।

वैद्यदेवस्य कमऊलीताम्रशासनानुसारं ब्राह्मणेभ्यः दत्तानि उपहाराणि सद्यो तनयनावचि फलानि अंकुरित वीजानि इव वस्तूनि भवन्ति । धर्मपालखोन मुखशासनेन परिज्ञायते यद् स मध्यदेशवास्तव्यैकविप्राय भूमिदानमकरोत् ।

ताम्रशासनैः अवगम्यते यत् ब्राह्मणसमाजस्य सामाजिकीसंघटना वेदशाखागोत्रेष्वाधारितासीत् । अनयोः द्वयोः वेदशाखागोत्रयोः विवाहे, दायकर्मणि नित्योपासनायां विशेषोपासनायाञ्च विशेषमहत्वमदृश्यत । गोत्र-सम्बन्धिनी विचारधारासीदेषा यद् एकगोत्रीयजनाः पुरुषविशेषात् कस्मादपि ऋषेः स्वपूर्वपरम्परामात्मानञ्चोत्पत्तिममन्यन्त । यथा कोऽपि कथयति यदहं भरद्वाजगोत्रीयः, अस्यायमर्थः यद् महर्षिभरद्वाजादारभ्याद्यावत्तस्य पूर्वपुरुषाणां तस्य चाविच्छिन्ना गोत्रधारा प्रवहति । वौधायनः गोत्राणामुत्पत्तिमष्टभ्यः महर्षिभ्यः स्वीकरोति । अनन्तरमेषां गोत्राणां संख्या शताधिकतां गच्छति । परन्तु एभ्यः गोत्रेभ्यः प्राचीनगोत्राणि अर्वाचीनगोत्राणि च पृथक् कर्तुं क्लिष्ट-तमं वर्तते कार्यम् । भास्करवर्मणो निधनपुरताम्रशासनतः षट्पंचाशतगो-त्राणां संख्योल्लिखिता वर्तते[३] । वनमालतेजपुरशासने शाण्डिल्यगोत्रीय ब्राह्मणानां यजुर्वेदशाखानिर्धारिता अस्ति—

शाण्डिल्यकुलप्रदीपो······शुचिर्देवगुणोपपन्न[४] ।

बलवर्मणो नवगांवशासने कपिलगोत्रस्योल्लेखः अस्ति[५] । रत्नपालस्य वडा-गांवशासने पाराशरगोत्रीणां कृष्णयजुर्वेदस्य काण्वशाखा निर्धारिता वर्तते ।

पाराशरोऽभूद्भुवि····· काण्वोऽप्रजो[६] ।

---

१. कामरूपशासनावल्याम्, पृ० १५-१६.
२. इपि० इण्डि०, १३, पृ० २९२.
३. कामरूपशासनावल्याम्, पृ० १७-२५.
४. तत्रैव, पृ० ६४.
५. तत्रैव, पृ० ७८.
६. तत्रैव, पृ० ९९.

तस्यैव श्यालकुचीशासने भारद्वाजगोत्रस्य काण्वशाखा निर्धारयति । इन्द्रपालस्य गौहाटीगुआकुचीताम्रशासनयोः कश्यपगोत्रं पवित्रमिति निर्धारितम् ।

काश्यपगोत्रोऽतिपवित्रो......[1] ।

काश्यपस्तत्र पुण्यात्मा......[2] ।

धर्मपालस्य शुभंकरपाटकशासने शाण्डिल्यगोत्रस्य[3], पुष्पभद्रशासने मौद्गल्यगोत्रस्य कात्स्नयिनगोत्रस्य[4] च खोनमुखशासने कश्यपगोत्रस्य[5] च, एवं त्रिषु धर्मपालशासनेषु गोत्राणामुल्लेखो वर्तते[6] । अनेन प्रमाण्यते यत् तत्काले ब्राह्मणानां श्रेष्ठता गोत्रानुसारिणी आसीत् । अतः ताम्रशासनेष्वपि गोत्रानुसारमेव ब्राह्मणानां पवित्रता श्रेष्ठता च स्वीकृता इति । आपस्तम्वसूत्रानुसारं गोत्रस्यान्तर्गते प्रवरस्यावधारणापि निहितास्ति । प्रवरस्यार्थः प्रार्थनास्ति । प्राचीनकाले यः ऋषिः अग्निसिद्धिमकरोत् प्रवरशब्दो एतादृशस्यैव ऋषेः बोधो भवति । अतः एकस्मिन् प्रवरे एकमधिकानि वा परिवाराणि भवितुमर्हन्ति । प्रवरस्येदमेव विधानम्[7] । प्रवरशब्दस्योल्लेखः ताम्रशासनेष्वपि प्राप्यते येन प्रतीयते यत् तस्मिन् काले गोत्रप्रवरयोः सम्यग्विचारणासीत् । गोत्रमिव प्रवरस्यापि विवाहोपासनादिषु कार्येषु विचारमावश्यकमासीत् । धर्मपालस्य पुष्पभद्रशासने रसप्रवराः द्विजाः[8] खोनमुखशासने प्रवरशब्दस्यास्ति उल्लेखः[9] ।

ताम्रशासनैर्ज्ञायते यत् प्राचीनकामरूपस्य ब्राह्मणेषु प्राचीनपद्धत्याचारविचारनियमानां विधानं दृश्यते । स्मृतिषु ब्राह्मणानां षट्कर्मणाम् यजनम्, याजनम्, अध्ययनम्, अध्यापनम्, दानं पतिग्रहञ्च इत्येतेषामुल्लेखोऽस्ति, एवं षट्प्रकारकाणां स्नानानाम्-नित्यम्, नैमित्तिकम्, काम्यम्, क्रियाङ्गं

---

१. कामरूपशासनवल्याम्, पृ० १११.

२. तत्रैव, पृ० १२१.

३. तत्रैव, पृ० १३७.

४. तत्रैव, पृ० १५५.

५. तत्रैव, पृ० १७५.

६. इपि० इण्डि०, वाल्यूम ३०, पृ० २०८.

७. आपस्तम्बसूत्रे, २४.६-७.

८. कामरूपशासनावल्याम्, पृ० १७५.

९. इपि० इण्डि०, वाल्यूम ३०, पृ० २०७.

मलविकर्षणञ्च इति । ऋषेः अत्रेः अनुसारं ब्राह्मणैः त्रिवारं संध्योपासना कर्तव्या । सन्ध्यासमये गायत्रीप्रभृतिपवित्राणां मन्त्राणां जपकार्यं करणीयम् ।

प्राचीनकामरूपनृपतिताम्रशासनेन ज्ञायते यत् कामरूपस्य विप्राः पवित्रकर्मनिष्ठाचरणयुक्तविद्वांसश्चासन् । रत्नपालस्य बडागांवशासने ब्राह्मणानां षट्प्रकारककर्मणां विवरणं प्राप्नोति—

षट्कर्म्मरतं द्विजेशं……[1] ।

बलवर्मणो नवगांवशासनेन प्रतीयते यत् ब्राह्मणवर्णे षट्प्रकारिका स्नानविधिः प्रचलितासीत् ।

तस्मै विप्राय मया स्नात्वा सम्यक् समाधिना दत्ता ।
यदिह फलं तत् पित्रोर्म्ममापि लोकोत्तरम्भूयात् ।
पुनः वैतानिकं कर्म निराकुलेल[2] ।

वनमालस्य तेजपुरशासने—

साङ्गं यजुर्वेदमधीतवान् यस्त्यागी शुचिर्वेदगुणोपपन्नः……सूनुस्तयोर्वेदविदगुजन्मा[3] ।

वैद्यदेवस्य कमऊलीशासने—

कर्मब्रह्मविदां मुख्यः सर्वाकारतपोनिधिः ।

इन्द्रपालस्य गुआकुचीशासने—

देवः साक्षादिवात्मभूः[4] ।

धर्मपालस्य शुमंकरपाटकशासने—

तस्यामभवद्भरत इत्यभिभूतपापः शाक्योपमः शमदमप्रसवैकभूमिः ।
षट्कर्म्मकर्म्मठतया विरतो शुभेभ्यः सभ्यः सतां गुणवतान्तिलकस्तनूजः ।
……शौष्ठवपदप्रभृतिक्रियावानभ्यस्तचित्रदृढदुष्करकर्म्ममार्ग[5] ।

---

१. कामरूपशासनवल्याम्, पृ० १००.

२. तत्रैव, पृ० ७९.

३. तत्रैव, पृ० ६४.

४. तत्रैव, पृ० १३७.

५. तत्रैव, पृ० १३७.

तस्यैव पुष्पभद्राशासने—

द्विजानां सद्धर्म्मप्रथमपथिकानामनुदिनं त्रिसन्ध्यं स्नानार्थंप्रशमजयपापक्षयकृतां। चतुर्व्वेदीपाठध्वनिरतनु वाचालयति यद् यमीगङ्गासङ्गोच्छलिखजलकल्लोलवहलः[१]।

पुनश्च तस्मिन्नेव पूजाप्रपञ्चरचनां सुचिरं चकार[२]। उपरोक्तोदाहरणैः प्रतीयते यत् प्राचीनकामरूपस्य विप्राः प्रचलितप्राचीननियमानुसारकर्माचरणशीलाः आसन्। ते पवित्राः, सच्चरित्रा साक्षाद् ईश्वरप्रतिनिधिरूपाः इव स्वीक्रियन्ते स्म। तत्र ब्राह्मणानां दिवसाः जीवनञ्च नित्यकर्माचरणै उपासनायां व्यतीयुः। तेषां जीवने तपसः विशेषस्थानमासीत्।

ताम्रशासनेषु ब्राह्मणाः वेदवेत्तारः न्यगयन्त। तस्मिन् काले ब्राह्मणाः गुरुगृहं गत्वा शिक्षार्जनमकुर्वन्। ताम्रलेखेषु वेदानां मीमांसायाश्च उल्लेखोऽस्ति। रत्नपालस्य प्रथमशासने देवदत्तनामकं ब्राह्मणं वेदानां ज्ञातारं पण्डितञ्च प्रत्यपादयत्।

देवदत्तः········वेदविदां पराद्धर्यं त्रय्या कृतार्थामितमिव सम्यक्[३]।

बलवर्पणो नवगांवशासने—

विद्यातपस्सम्पदुपात्त सम्यग्विवेकविध्वस्तसमस्तदोष······
स समावृतो गुरुतो गृहधर्म्मविधित्सुरागतस्साधुः।
काले विषुवत्यर्थी धर्म्मपरः पण्डितः कथा[४]निष्ठः।

वैद्यदेवस्य कमऊलीताम्रलेखे—

शास्त्रवेदपरिशुद्धबोधभूः श्रोत्रियत्वविलसद्यशोनिधिः।

वनमालस्य तेजपुरशासने—

साङ्गं यजुर्वेदमधीतवान् यस्त्यागी शुचिर्वै वगुणोपपन्नः······
सूनुस्तयोर्वेदविदग्रजन्मा इन्दोकनामा गुणवान् वरिष्ठः[५]।

---

१. कामरूपशासनावल्याम्, पृ० १७५.
२. तत्रैव, पृ० १७६.
३. तत्रैव, पृ० ९९.
४. तत्रैव, पृ० ७८-७९.
५. तत्रैव, पृ० ६४.

इन्द्रपालस्य गौहाटी गुआकुचीशासनयोः—

सुविस्तृतानां पदवाक्यतर्कतन्त्रप्रवाहातितरस्विनीनां ।
यः सर्वविद्यासरितामगाधमन्तर्निमग्नश्च गतश्च पारम्[1] ॥

धर्मपालस्य पुष्पभद्राभिलेखात् खोनमुखाभिलेखाच्च ज्ञायते यत् ब्राह्मणाः धर्मशास्त्रस्याध्ययनार्थं मीमांसाशास्त्रस्यापि अध्ययनं अकुर्वन् ।

मीमांसा नयमांसलीकृतमतिश्चाणक्यमाणिक्यभूर्वंशोत्तुङ्गमणिः[2] ।
विश्वतः मीमान्सामद्य सा विशेष······[3] ।

पुनः खोनमुखताम्रशासनानुसारं राजा धर्मपालः मध्यदेशीयाय यस्मै ब्राह्मणाय दाने भूमिमयच्छत्, तं ब्राह्मणं सर्वशास्त्रज्ञातरमिति अवर्णयत्—

सर्वशास्त्रविशारदः······शास्त्रपारंगतः[4] ।

ताम्रशासनेषु ब्राह्मणाः श्रुतिधर, पण्डित, कथानिष्ठादिविरुदैः व्यभूष्यन्त[5] । अनेन स्पष्टं भवति यत् तत्समये ब्राह्मणाः विद्वांसः धार्मिकाचरणां नियमानाञ्च वेत्तारः आसन्, समाजे च तेषामतीवासीत् सम्मानम् । ते द्विजाः न केवलं वेदानां शास्त्राणां धर्मशास्त्राणां पुराणादीनामेवाध्ययनमकुर्वन्नपितु ते विज्ञानकलादिविषयाणामपि अध्ययनमकुर्वन् । धर्मपालस्य पुष्पभद्राताम्रशासनयोः ज्ञायते यत् द्रोणस्य पितामहः निपुणः कलाविदः आसीत्—

सम्यक् कलाभिर्युतः[6] ।

अस्य प्रामाण्यं वैद्यदेवस्य कमऊलीशासनतः पुष्टितां प्राप्नोति ।

कर्णभद्रेण भद्रेण शिल्पिनानल्पबुद्धिना ।

शुभंकरपाटकाभिलेखेऽस्ति उल्लेखः यत् हिमांगः विविधेषु चित्रादिकलाजातेषु दृढं निपुणः आसीत्—

---

१. कामरूपशासनावल्याम्, पृ० १२१, १३६.
२. तत्रैव, पृ० १७५.
३. इपि० इण्डि०, वाल्यूम ३०, पृ० २०८.
४. तत्रैव, पृ० २०८.
५. वलवर्मानवगांवशासनम्, का० शा०, पृ० ७९.
६. कामरूपशासनावल्याम्, पृ० १७५.

अभ्यस्तचित्रदृढदुष्करकर्म्ममार्गः नाराचमोक्षगतिपातगुणप्रवीणाः[१] ।

खोनमुखशासनानुसारं मध्यदेशीयः ब्राह्मणः सर्वासां विद्यानां वेत्तारः आसीत्—

सर्वशास्त्रविशारदः[२] ।

ताम्रशासनैः ज्ञायते यत् तस्मिन् काले ब्राह्मणानां स्वामी देव प्रभ शभा प्रभृति उपाधयः आसन् तथा च तेषां नामानि भट्ट घोष देव मित्रा दत कर आदिशब्दैः समाप्तानि भवन्ति स्म ।

अस्मान्नामप्रथा प्रचलनाद् परिज्ञानं जायते यत् एतानि नाम रक्त-संबद्धानि अर्थात् वंशपरम्पराप्राप्तानि आसन् । ताम्रशासनैः परिज्ञायते यत् ब्राह्मणाः न केवलं धार्मिककार्यमेवाकुर्वन् अपितु स्वयोग्यतया ते प्राशासनिकाः अधिकारिणः राजसभायां कवयः पण्डिताश्चाभवन् प्राचीनकामरूपे । भास्कर-वर्मणो निधनपुरताम्रशासनाद् ज्ञायते यत् तस्य राज्ये जनार्दनस्वामी नामाब्राह्मणः न्यायकर्णिक आसीत् । दिवाकरप्रभस्तस्य राज्ये भाण्डागारा-धिकृद् महासामन्तपदद्वयमलचकार ।

न्यायकरणिकजनार्दनस्वामी······

भाण्डागारादिकृतमहासामन्तदिवाकरप्रभः[3] ।

हर्जरवर्मणः प्रथमशासने—

महाद्वाराधिपत्य श्रीजयदेव । महाप्रतिहारजनार्दनः । महामात्य-श्रीगोविन्दः । मधुसूदनः । ब्राह्मणाधिकारभट्टश्रीकण्ठः[४] ।

पुनः द्वितीयशासनेन अवगम्यते—बलाध्यक्षा सामन्त शिलाकुट्टकबलयो पंचकुल-शंकरभट्टपुत्रसोमदेवादयः[५] ।

उपर्युक्तैः समुद्धितैः समुद्धरणैः सम्यगवगम्यते यत् तदानींतनाः

---

१. कामरूपशासनावल्याम्, पृ० १५६.

२. इपि० इण्डि०, वाल्यूम, ३०, पृ० २०८.

३. कामरूपशासनावल्याम्, पृ० २६.

४, तत्रैव, पृ० ५१.

५, तत्रैव, पृ० १८७ ।

ब्राह्मणाः विप्रकार्याणि कुर्वन्तः सन्तः शस्त्रास्त्रविद्यायामपि निपुणाः कुशलाः शस्त्रिणोऽप्यभवन् । कौटिल्यः अर्थशास्त्रे लिखितं यत् सैनिकेषु ब्राह्मणसैनिकाः श्रेष्ठतमाः आयुधविद्यानिपुणाश्च भवन्ति । खोनमुखताम्रशासने शस्त्रशास्त्र-गारान्याः[1] ब्राह्मणानां कृते प्रतिपादितमस्ति । शुभङ्करपाटकताम्रशासने हिमाङ्गविप्रविषयवैशिष्यट्यविशेषविवरणं विलिखितं वर्तते यत् स न केवलं चित्रकार एव आसीद् अपि तु स कुशलः आक्रामकः आक्रमणानाञ्च कुशलो विनिवारकोऽपि आसीत् तथा च स कविरपि आसीद् विशेषतश्च वीररसकविताः कवयति स्म ।

> निःशेषसौष्ठवपदप्रभृतिक्रियावानभ्यस्तचित्रवृढवुष्करकर्म्ममार्ग्गः,
> नाराचमोक्षगतिपातगुणप्रवीणः·········।[2]

उपर्युल्लिखितमेव यद् पार्श्ववर्तिभ्यः अन्येभ्यः राज्येभ्यः आगत्य ब्राह्मणाः कामरूपं न्यवसन् । प्रतिपादितताम्राभिलेखैरपि प्रमाण्यते यत् सम्मानेन ते विप्राः बहिः प्रान्तेभ्यः कामरूपमागच्छन् । कामरूपे ते ब्रह्मदेवविरुदभाजो ऽभवन् । अनन्तवर्मणस्ताम्रशासनेऽस्त्युल्लेखः यद् द्वाविंशत्युत्तरनवशत ९२२ ईसवीये वर्षे कलिङ्गदेशस्य गङ्गानरेशस्य भ्राता जयवर्मा स्वकथाया कन्यादान-समये काकरूपदेशविषय श्रृङ्गातिकाग्रहार-वास्तव्य विष्णुसोमाचार्याभिधान-कवि प्रायोपहारे भूमिमददात्, सः पाराशरगोत्रीयः वेदानां वेदाङ्गानां लिखि-तानां विद्यानां विद्वान्नासीत् ।

> वेदवेदाङ्गपारगेभ्यः कामरूपविषयभृङ्गातिकाण्डहारवास्तवेभ्यः पारा-शरगोत्रभ्यो विष्णुसोमाचार्यपदेभ्यो विवाहसमये कन्यादानम् उदाकपूर्वकम् कृत्वा ।[3]

मालवदेशस्य परपारनरपतिवाक्पतिभूपतेः ९८१ ईसवीयस्य वर्षस्य लेखे २६ ब्राह्मणेभ्यः प्रदत्तदानस्योल्लेखः समुपलभ्यते[4] । अनेन स्पष्टं भवति यत् पूर्वं भारतवासिब्राह्मणा अपि प्रतिग्रहमकुर्वन्, तेषु वामनस्वामी नामकः एको विप्र उत्तरकुलदेशस्य पुण्डरीकस्य निवासी आसीत् । के० एल० बरुआ

---

१. इपि० इण्डि०, वाल्यूम ३०, पृ० २०८.

२. कामरूपशासनवल्याम्, पृ० १५६.

३. जे० ए० एच० एस०, वाल्यूम् २, पृ० २७१.

४. इपि० इण्डि०, वाल्यूम २३, पार्ट ४.

उत्तरकुलदेशं आसामप्रदेशस्योत्तरकूलमर्यादं ब्रह्मपुत्रस्योत्तरभागं स्वीचकार[1]। सीलीमपुरताम्रशासनेनापि परिज्ञायते यदासामप्रान्तीयविप्राः अन्यप्रदेशं गत्वा न्यवसन्, ब्राह्मण प्रहासस्य पूर्वपुरुषाः कामरूपस्य पुण्ड्रस्य बलग्रामाद् वहिर-गच्छन्[2]। अस्योल्लेखपूर्वमेवाकुर्वम् अनेन स्पष्टं प्रमाणितं भवति यद् उत्तर-भारते बौद्धधर्मपतनानन्तरं ब्राह्मणाः कामरूपात् अन्येषु प्रान्तेष्वगच्छन्।

अन्यजातयः

कामरूपे प्राप्तेषु ताम्रशासनाभिलेखेषु अन्यासां जातीनां विशेषो-ल्लेखो नोपलभ्यते। यत् किञ्चिदुपलभ्यते तच्चाति स्वल्पमेवास्ति। परन्तु प्राचीनभारते वर्णव्यवस्थायाः अन्तर्गते अन्यासाम् जातीनामुपस्थितिरप्यासीत् तासु शूद्रवर्णा जातिः निम्नतमा आसीत्[3]। ऋग्वेदानुसारं पंचविंशब्राह्मणा-नुसारञ्च शूद्राणामुत्पत्ति पद्भ्यां अजायत, तेषु कार्यं स्वामिनां चरणक्षा-लनमासीदिति[4]। धर्मशास्त्रेष्वपि शूद्राणां स्थान निम्नमेव वरीवर्तते, तेषां कार्यं त्रयाणां वर्णानाम् विशेषतः विप्राणां सेवाकार्यमेव प्रतिपादितमस्ति[5]। महाभारतस्यानुसारं कस्याः अपि सम्पत्तेरधिकारः शूद्राणां नासीत्[6]। काय-स्थजातेः करणजातेश्च सामाजिकं स्थानं शूद्रजातेरुन्नतमासीत्। अनयोः जात्योर्वैश्येन पित्रा शूद्रायां मातरि समुद्भवः सम्पद्यते[7]। करणजातः महा-भारतेऽपि वर्तते समुल्लेखः[8]। क्षीरस्वामिना अमरकोशाधारमाकलय्य करणम् अधिकारिणां तेषां समूहं स्वीकृतम् ये कायस्थाध्यक्षा अभवन्। अनेन प्रतीयते यत् कालान्तरेण करणजातिः शनैः शनैः कायस्थजातेरेवैकशाखा-

---

१. जर्नल ऑफ दी आसाम रिसर्च सोसाइटी, वाल्यूम ५, १९३७-३८, पृ० ११२-११५.

२. कामरूपशासनावल्याम्, पृ० १६१-१६७.

३. पी० थामस, आप० सीट०, पृ० १९.

४. मेकडोनल एण्ड कीथ, वैदिक इण्डेक्स, २.२८९.

५. पी० थामस, आप० सीट०, पृ० १९.

६. हॉकिन्स, जर्नल ऑफ दी आसाम, उड़ीसा सोसाइटी, १३, १२, ७३.

७. तच्छरीरसमुत्पन्नैः कायस्थैः करणैः सह।
क्षेत्रज्ञाः समवर्तन्त गात्रेभ्यस्तस्त धीमतः॥
—पद्मपुराण, सृष्टिकाण्ड, ३.१५६.

८. हिस्ट्री ऑफ धर्मशास्त्र, वाल्यूम २, पार्ट १, पृ० ७४.

संजाताभवत्। भास्करवर्मणो निधनपुरताम्रशासने न्यायकरणिकं पर्जीटर-महोदयः संस्कृतशब्दं न स्वीकृत्य करणशब्दस्यैवापरपर्यायं स्वीचकार[१]। परन्तु असङ्गतमिवेदं प्रतीयते।

विष्णुस्मृतौ याज्ञवल्क्यस्मृतौ च प्राशासनिकाः अधिकारिणः कायस्थ पदेनाभ्यधीयन्त, विष्णुस्मृतौ कायस्थमेव राजरक्षिकमपि आसीत्[२]। वेदव्यासेन कायस्थस्य शूद्रश्रेण्यामुल्लेखो क्रियत यथा नापितः कुम्भकारश्च[३]। ककाटीमहोदयः कायस्थशब्दस्य आनर्ताणां काथो अथवा कैयथो शब्दाभ्यां व्युत्पत्तिमुत्पत्तिञ्च वर्णयति। प्राचीनकामरूपे कायस्थजातिः काथशब्देन अभिधीयते स्म[४]। कायस्थजात्युपाध्यायपदमधिगम्य डॉ० डी० आर० भण्डारकरमहोदयः डॉ० घोषमहोदयश्च, कायस्थजाति नागरब्राह्मणजात्युपशाखां प्रत्यपादयत्[५]। वसुमहोदयः 'सोसल हिस्ट्री ऑफ कामरूप' पुस्तके उक्तयोः उभयोः विदुषोः मतस्य विखण्डनं कुर्वन् कतिचिद् उपनामसाम्यं विहाय न किमपि नागरैः समं साम्यम्। गौडीयकायस्थानां कामरूपकायस्थानाञ्च परस्परं परम्परा अपि भिन्नाः सन्ति। एतेषां नागरब्राह्मणैः सार्धं न किमपि सम्बन्धं परिलक्ष्यते। कायस्थानां परम्पराः क्षत्रियाणां परम्पराभिः किमपि साम्यं गच्छन्ति[६]।

९ ईसवीयशतकस्य लेखैः कायस्थजातेरस्तित्वं भारतवर्षस्यान्येष्वपि भागेषु अवबुध्यते। अमोघवर्षस्य ९९९ ईसवीयस्य लेखेषु पश्चिमभारतस्थितकायस्थजातिः वल्लभकायस्थवंशीया[७] इति उत्तरभारतीयलेखेषु कायस्थजातिः गौडकायस्थवंशीया[८] कायस्थवंशीया[९] मथुरान्वयकायस्थवंशीया[१०]

१. जर्नल ऑफ दी एशियाटिक सोसाइटी ऑफ बंगाल, १९११, पृ० ५०१.
२. विष्णुधर्मसूत्र, ७.३.
३. हिस्ट्री ऑफ धर्मशास्त्र, वाल्यूम २, पार्ट १, पृ० ७६.
४. न्यू इण्डियन एण्टीक्वेरी, वाल्यूम ३, १९४८.
५. इण्डियन हिस्टारिकल क्वार्टरली, ४, पृ० ६०.
६. सोसल हिस्ट्री ऑफ कामरूप, ३, पृ० १६७.
७. इपि० इण्डि०, वाल्यूम १८, पृ० २५१.
८. तत्रैव, वाल्यूम १२, पृ० ६१.
९. जर्नल एण्ड प्रोसीडिंग्स ऑफ दी एशियाटिक सोसाइटी ऑफ बंगाल, १८८०, पृ० ७८.
१० इपि० इण्डि०, वाल्यूम १२, पृ० ६४.

चेत्येवमित्यादिरूपाः प्रतिपादिता। अनेन प्रमाण्यते यदुत्तरभारतेऽपि कायस्थजातेरस्तित्वमासीत्। कामरूपराजानां ताम्रशासनेष्वपि कायस्थशब्दस्योल्लेखः सम्प्राप्यते। यस्य प्रयोगः प्रशासनिकाधिकारिरूपे प्रायुज्यत। निधनपुरलेखे व्यवहारिहरदत्तकायस्थः इत्येवमस्योल्लेखोऽस्ति[१]।

प्राचीनकामरूपे कैवर्तजातेरपि सम्प्राप्नोत्युल्लेखः, मनोरनुसारं जातिरेषा संकरजातिरासीत्, कैवर्तजातेरुत्पत्तिविषये याज्ञवल्क्यर्षिरपि लिखति विषादेन पित्रा आयोगव स्त्रियां मातरि उत्पन्नसन्ततिः केवलं नामभाग् भवति। ते एव दाससंज्ञां सम्प्राप्नुवन्, ये नौकापरिचालनद्वारा आत्मवृत्तिमर्जयन्[२]। पुराणेषु च एतेषामुत्पत्तिविषये क्षत्रियेण पित्रा वैश्यायां मातरि उत्पन्नसन्ततिरित्येवं प्रतिपादितम्[३]। फिक्महोदयः कथयति यत् जालेन मत्स्यानामाखेटं कुर्वतः जनान् केवटशब्दभाजो ब्रुवन्[४]। अद्यापि ते तत्र हलवाहा जलोवा शब्देन अह्वीयन्त[५]।

कामरूपप्राप्तताम्रशासनेष्वपि कैवर्तशब्दस्यास्तित्वं विद्यते एव। हर्जरवर्मणः तेजपुरशासने उल्लेखः यत् कैवर्तः नदीशुल्कविभागीयाधीक्षकः आसीत्। ......कैवर्तं......[६]। धर्मपालस्य पुष्पभद्रालेखे अवञ्चिकैवर्तानाम्......[७] इत्युल्लेखो अस्ति। ताम्रशासनेषु वैद्यशब्दस्यापि उल्लेखः अस्ति। शुभंकरपाटके एव कमऊलीशासने च वैद्य[८]शब्दस्यास्ति उल्लेखः। भट्टाचार्यस्य मतानुसारं शब्दोऽयं प्रारम्भतः नैव जातिपरक आसीत्। दक्षिणभारतस्य ८ ईसवीयशतकस्य त्रिषु अभिलेखेषु वैद्यशब्दस्य प्रयोगः एतादृशाणां जातानां समूहार्थं कृतमस्ति, ये समाजे राज्ये च उच्चजनाः आसन्। डॉ० कृष्णस्वामिनोऽनुसारं ब्राह्मणानामिव तेषामपि सम्मानमासीत्[९]। बलवर्मणः नवगांवशासने भिषग् शब्दस्योल्लेखः अस्ति।

---

१. कामरूपशासनावल्याम्, पृ २३.
२. मनुस्मृति, १०.४.
३. ब्रह्मवैवर्तपुराण, १०.३४.
४. तत्रैव।
५. सेन्सस ऑफ इण्डिया, १९०१, आसाम, पार्ट १, पृ १३२.
६. कामरूपशासनावल्याम्, पृ० १८७.
७. तत्रैव, पृ० १७८.
८. तत्रैव, पृ० १५४.
९. इपि० इण्डि, वाल्यूम् ७, पृ० ३१७-३२१.

सम्भवतः भिषक्शब्दः वैद्यशब्दस्यैव प्रतीकं स्यात् । येषां कार्यं औषधवितरणमासीत् । लङ्घितभिषजा[1] उशनाः क्षत्रियायां कन्यायां ब्रह्मपुराणस्यानुसारं सः ओषधीम् विक्रीय आत्मवृत्तिमबिभ्रत्[2] । भास्करवर्मणः निधनपुरशासने कुम्भकारजातेरुल्लेखोऽस्ति[3] । उशनाः अस्योत्पत्ति वैश्यायां ब्राह्मणात् स्वीकरोति । वेदव्यासः एतान् शूद्र एव स्वीकरोति । वर्तमानासामप्रान्ते कुम्भकाराः द्विप्रकाराः सन्ति—१. कुम्भार, २. हीरा । हीराजातिस्तत्र अन्त्यजजातिस्तथा चाण्डालजातेः एका शाखा अस्ति । परन्तु हीराजातीयाः जना चाण्डालजातीयेषु अन्नपानादिकव्यवहारं न कुर्वन्ति तथा च तेषामाजीविकावृत्तिरपि भिन्ना । अन्य कुम्भकारेभ्यस्तेषु भेदोऽस्ति । तेषु स्त्रियोऽपि कार्यं कुर्वन्ति ते चक्रेण घटादीनां निर्माणं न कुर्वन्ति अपितु हस्तेनैव । ते आदौ चतुःषु भागेषु तस्य निर्माणं कुर्वन्ति । अनन्तरं अग्निना घटान् पक्वान् कुर्वन्ति[4] । धर्मपालस्य पुष्पभद्राशासने भूमिसीमासम्बन्धेऽस्ति वक्तव्यं यत् पूर्वदक्षिणसीमास्थले आसीत् दिज्जरतिह डी हडी शब्दस्य तात्पर्यमद्यतनीया हीराजाति अस्ति[5] । हीरा अन्त्यजजातीयैः चाण्डालैश्च सम्बद्धा जातिरस्ति । केषुचित् दिवसेषु तेषां काचित् समुन्नतिर्जाता । अधुना ते वाणिज्यकार्यं सुवर्णकारकार्यञ्च कुर्वन्ति । तेषु मध्ये अनेके जनाः व्यापाराधारेण स्वजातिनिर्धारणं कुर्वन्तो दरीदृश्यन्ते[6] । साहित्यप्रमाणैर्ज्ञायते यत् प्राचीनकामरूपे बह्वयः जातयः आसन् यासु कलितजातिः प्रमुखा वर्तते । एतेषां कामरूपे विशेषवैशिष्ट्यमासीज्जनेषु[7] । डाल्टनमहोदयस्यानुसारम् आसामप्रान्तीयहिन्दुजनेषु ते शुद्धतराः प्रतीयन्ते एतेषां शूद्रा एव कर्मकराः भवन्ति[8] । कलितजातीयाः जना आत्मना कायस्थजात्या समतां स्वीकुर्वन्ति स्म तथा ब्राह्मणेभ्यो न्यूनताञ्च[9] । १६६२ ई० वर्षे मीरजुमला अनेन सह फातियाइ-

---

१. कामरूपशासनावल्याम्, पृ० ७६.
२. तत्रैव ।
३. तत्रैव, पृ० २६.
४. सैन्सस ऑफ इण्डिया, आसाम, वाल्यूम १, पृ० २७२, १८९१.
५. कामरूपशासनावल्याम्, पृ० १७८.
६. सैन्सस ऑफ इण्डिया, १८९१, आसाम, वाल्यूम १, पृ० २७७-२७८.
७. डाल्टन, डिस्क्रीप्टिव एथनालाजी ऑफ बंगाल, पृ० ३२१-२२.
८. तत्रैव, पृ० ७९.
९. सेन्सस ऑफ इण्डिया, १८९१, आसाम, वाल्यूम १, पृ० २११.

त्रियाह इत्यस्य लेखकोऽपि आसामप्रान्तमागच्छत् स अलिखद् यद् प्रान्ते अहोमराज्यं कलितराज्यं च इति राज्यद्वयमस्ति[1] । एतदाधारमेवाकलय्य एलेनमहोदयः अलिखद् ब्राह्मणान् विहाय समेऽपि आसामप्रान्तीयहिन्दुजनाः कलितजातौ समाविशन्ति[2] । तत्र कलितजातिविषयेऽस्ति किंवदन्ती यत् परशुरामेण उत्पीडितेभ्यः क्षत्रियेभ्यः, ये जनाः पलायित्वा कामरूपमगच्छन् ते तत्र कलिजात्यां परिगणिता अभवन् । यतस्ते गृहाणि परित्यज्य वनं वनं विचरन्तः सन्तः तेषां कुलनामपरम्परा च विलुप्ताभवत् अतएव ते कलित संज्ञामापुः । अनेन प्रतीयते यत् कलितजना वहिः प्रदेशेभ्यः आसामप्रान्तमाजग्मुः ।

---

१. हिस्ट्री ऑफ आसाम, पृ० ५८.

२. डिस्ट्रिक्ट गजेटियर, नवगांव, पृ० ७८.

95
C
JAC